जहा पुव्वभवे सम्मं, धम्मकम्मं समज्जियं ।
तहा चंदप्पहो सामी, आढत्तो कहियं कहं ॥४१६॥ तीहिं विसेसगं ॥

धाईसंडंमि दीवंमि, पुव्वविदेहमंडणो ।
अत्थि पत्थिवसंकिण्णो, विजओ मंगलावई ॥१॥

अत्थि तत्थ पुरी रम्मा, नामेणं रयणसंचया ।
जत्थ धम्मदुमो देइ, जहेव मग्गियं फलं ॥२॥

तत्थासी पउमो नाम, राया रायनमंसिओ ।
जं परिणीयभज्जेव, छंडेइ पउमा न य ॥३॥

सो अन्नया सहामज्झे, उवविट्ठो समुब्भडो ।
सयं सीहो व्व दप्पेण, भूवे मिग व्व मन्नए ॥४॥

दिव्वसंगीयकारीहिं, गंधव्वेहिं निसेविओ ।
वारविलासिणीहिं सो, सव्वत्तो परिवारिओ ॥५॥

दिव्वंगरागनेवत्थदुगूलेहिं विभूसिओ ।
जियगुरूहिं बुद्धीए, मंतिवग्गेहिं मंडिओ ॥६॥

ढालिज्जमाणचमरो, पढिज्जमाणविक्कमो ।
विण्णविज्जमाणकज्जो, जो राया चिट्ठए तओ ॥७॥

निवस्स दिट्ठिविसए, ठाणमेगंमि संमुहं ।
अत्थि अंगासलं एगं, कलविंगाण रम्मयं ॥८॥

तओ को वि पडिवक्खी, आगम्म चडओ दुयं ।
चंचुउडेण नीडाओ, तिणाइं कड्डए खणा ॥९॥

इओ तओ य छंडेइ, तिणाइं कोवभावओ ।
पासित्ता नीडमज्झंमि, अंडयाइं तओ य सो ॥१०॥
दिप्पंतकोहदहणो, किं पि वेरमुवागओ ।
चंचुउडेण गिण्हित्ता, अंडयाइं खिवेइ सो ॥११॥
पडिया अंडया हिट्ठे, तट्टित्ति फुट्टयंति य ।
चडओ हट्ठतुट्ठो सो, अंडगपासमागओ ॥१२॥
तओ य चंचुघाएहिं, हणेइ अंडयाइं सो ।
पुणो पुणो य पासेइ, दिसि पक्खा ससंभमो ॥१३॥
अंडयाण तओ मायापियरो य समागया ।
नीडं पासंति विक्खित्तं, दुट्ठेण तेण सत्तुणा ॥१४॥
पाडियाइं अहोभूमिं, फुट्टाणि अंडयाणि तो ।
पासंति मायापियरो, तं दुट्ठं चडयं पि हु ॥१५॥
अवच्चमच्चुदुक्खेण, अच्चंतं कोवभावओ ।
अंडयमायापियरो, तं सत्तुचडयं पइ ॥१६॥
आगम्म झुज्झिउं लग्गा, कोहेण बलवंतया ।
अन्नोन्नचंचुघाएण, आहणंति गयकिवा ॥१७॥
अन्नोन्नं चंचुपुडयं, गिण्हित्ता उच्छलंति य ।
पडित्ता य पुणो लिंति, चरणेहिं गहं दढं ॥१८॥
जो हिट्ठे उवरिल्लेण, सो चंचूहिं हणिज्जए ।
गहिऊण महापाणं, हेट्ठिल्लोपरि यत्तए ॥१९॥
अजाणंतो व्व पहारे, हिट्ठिल्लो उवरि ठिओ ।
दुगुणेहिं पहारेहिं, हणेइ चडयं परं ॥२०॥
जयवंतो जया भत्ता, तया सा चिडिया वि हु ।
ताडेइ वेरिचडयं, सव्वंगेसु खणे खणे ॥२१॥
एवं ते दो वि चडया, झुज्झंता अवरोप्परं ।
चंचुघाएहिं मम्मंमि, हया पंचत्तमागया ॥२२॥

चिडिया वि खणं तत्थ, विलवित्तु तओ गया ।
अन्नेण चडएणेसा, पारद्धा रमिउं खणा ॥२३॥
तओ य पउमो राया, तं पिच्छिऊण चितए ।
धिद्धी संसारजीवाणं, केरिसं कम्मजंभियं ? ॥२४॥
कसायवसमावन्नो, मारेइ चडओ कहं ? ।
चिडिया डिंभरूवाणि, अंडमज्झगयाणि य ॥२५॥
दट्ठूण डिंभमरणं, ममत्तोब्भूयकोवओ ।
अंडयजणओ बीयं, मारित्तु चडयं मुओ ॥२६॥
एसा इत्थी सहावेण, चवलत्तणमागया ।
डिंभरूवाणि कंतं च, विसुमरित्तु सव्वहा ॥२७॥
भज्जा अन्नस्स संजाया, चडयस्स पमोयओ ।
ईय कोहममत्तेसुं, दिट्ठं कामस्स जंभियं ॥२८॥
धिद्धी संसारवासंमि, जीवा अन्नोन्नवेरिणो ।
रज्जविज्जाधणाईयं, न सहंति परोप्परं ॥२९॥
तहेव चवला लच्छी, सरीरं चवलं जहा ।
तहा इत्थी गिहत्थाणं, अन्नमन्नं रमेइ सा ॥३०॥
ता परिहरिउं जुत्तो, संसारो कूडसायरो ।
कलत्ताइ परं सव्वं, धम्मो जीवस्स अप्पणो ॥३१॥
ईय एवं निवे जच्चवेरग्गखणमागए ।
आगओ तुरियं तत्थ, सीहो उज्जाणपालगो ॥३२॥
अह सो पउमं रायं, विन्नवेइ कयंजली ।
उज्जाणे देव ! संपत्तो, एगो सूरी जुगंधरो ॥३३॥
तओ राया सयं चेव, वेरग्गदिसिमागओ ।
सुच्चा पुणो य सूरीणमागयं हरिसं गओ ॥३४॥
सहाजणेण तेणेव, सद्धिं उट्ठित्तु भूवई ।
सहिओ रायवग्गेण, सामग्गीमंडिएण य ॥३५॥

अंतेउरजणेणावि, कुमाराण गणेण य ।
पुरिलोगाण कोडीहिं, सव्वओ परिवारिओ ॥३६॥
हत्थिघंटाटणक्कारसद्दनिवेइआगमो ।
तुरंगमखुरक्खुण्णधूलीसंछन्नआयवो ॥३७॥
सव्वसामग्गिवित्थडजियसुरिंदडंबरो ।
पत्तो उज्जाणभूमीए, गइंदा उत्तेरइ सो ॥३८॥
मज्झंमि पविसंतो य, इय साहू स पासई ।
के वि सुत्तं पढंता य, के वि अत्थवियारिणो ॥३९॥
कुणंता के वि कीकम्मं, वेयावच्चं तहा परे ।
दुक्कडासणबंधेण, चरंता अवरे तवं ॥४०॥
के वि दुब्बोज्झअत्थंमि विवयंता परोप्परं ।
के वि सिद्धंतसाराइं, वियारंता रहंमि य ॥४१॥
एवं बहुप्पयारेहिं, कुणंतं कम्मनिग्गहं ।
पासंतो साहुवग्गं सो, गुरूण पुरओ गओ ॥४२॥
जहाविहीइ भत्तीए, गुरुपाए नमंसए ।
तओ य सुद्धभूमीए, उवविट्ठो नराहिवो ॥४३॥
तो गुरूहिं समाढत्ता, देसणा कम्मनासणा ।
सव्वो वि भविओ लोओ, सोउं एगमणो ठिओ ॥४४॥
प्रिय इव दयितायां यच्छतीच्छाऽनुरूपं,
सुसुत इव गुरूणामाधिपत्यं तनोति ।
तुरग इव रणाऽन्तं प्रापयत्येष मोक्षं,
किमिव हि नहि धर्मात्प्राक्कृतात्तत्स कार्यः ॥४५॥
जओ धम्मा भवे पुण्णं, पुण्णाओ जत्थ तत्थ व ।
लहेइ इच्छियं जीवो, जहा मयणसुंदरो ॥४६॥

# पुण्ये मदनसुन्दरकथा

धाईसंडंमि दीवंमि, पुरी अत्थि मणोरमा ।
जत्थ लोया पकुव्वंति, धम्मं सव्वत्थकारणं ॥१॥

तत्थत्थि पत्थिवगुरू, राया मयणसुंदरो ।
अणमंता निवा जेण, चित्तं सग्गंमि पेसिया ॥२॥

अन्नया सो सहासीणो, समं मंतीहिं पत्थिवो ।
कुणंतो पुण्णपावाणं, वियारं पभणेइ तो ॥३॥

भो भो !! मंतिवरा तुब्भे, छिंदेह संसयं मह ।
पुण्णेहिं लब्भए रज्जं, किं वा तेहिं विणा वि य ? ॥४॥

भासंति मंतिणो नाह !, सामी किं न वियाणए ? ।
विणा पुण्णेहिं नो किं पि, थोवं पि लब्भए सुहं ॥५॥

सपुण्णेहिं तुमं राया, जाओ अम्हाण सामिओ ।
सपुण्णतारतम्मेण, जाया अम्हे वि मंतिणो ॥६॥

अन्नो वि जो जणो इत्थ, सुहं जीवेइ नीरुओ ।
धणड्ढो ससम्माणो, सो वि पुण्णप्पभावओ ॥७॥

मंतीहिं भणीए एवं, राया वि चिंतियं तओ ।
नियपुण्णपरीणामं, दट्ठुकामो भणेइ तो ॥८॥

पुण्णवंतकुले जाया, पुरिसा तप्पभावओ ।
पुव्वोवज्जियरज्जाइं, भुंजंता पुण्णिणो कहं ? ॥९॥

जइ नियववसायप्पभावओ लहंति ते ।
अप्पाणुसारओ दव्वरज्जाई पुण्णिणो तओ ॥१०॥

तओ अहं पि पुव्वेहिं, पिऊहिं रज्जमज्जियं ।
भुंजमाणो कहं पुण्णवंतं मन्नेमि सं [?] नणु ? ॥११॥

तओ पुण्णपरिक्खाए, जामि देसंतरं पुणो ।
जइ पुण्णं पि मे होही, ता रज्जं भविही तहिं ॥१२॥

भणंति मंतिणो सामि !, मा संदेहं करेसु जं ।
संतेसु अन्नपुत्तेसु, दिन्नं रज्जं पिऊहिं ते ॥१३॥

ता एस पुण्णप्पभावो, दिट्ठो इत्थेव ते धुवं ।
देसंतरेण किं कज्जं, सव्वहा दुक्खदाइणा ? ॥१४॥

राया भणेइ किं दुक्खं, देसंतरगयस्स वि ? ।
नियं पुण्णमपुण्णं वा, करिस्सइ जहोचियं ॥१५॥

ईय भणित्तु सो राया, रज्जमप्पित्तु मंतिणो ।
पुण्णसहाओ एगागी, निग्गओ नगराउ तो ॥१६॥

पढमुच्छाहसच्छाओ, पच्छिमाइ दिसाइ सो ।
गच्छंतो सिग्घमेगागी, परिस्समेण पाविओ ॥१७॥

परिस्समवसं जाया, पाया चलंति नो पुरो ।
मणोच्छाहेण दिज्जंतहत्थाऽऽलंबा चलंति य ॥१८॥

अणेण न करा मज्झ, कयावि हु पडिच्छिया ।
तेण रोसेण आइच्चो, आहणेइ करेहिं तं ॥१९॥

अणेण भक्खभोज्जेहिं, तित्तेणुच्छेइया अहं ।
ईय पुव्वाइ ईसाए, छुहाइ गहिओ दढं ॥२०॥

रहाऽहिरूढो आइच्चो, सिग्घं सिग्घं पयाइ सो ।
उच्चभूमीए पाएहिं, मंदं मंदं निवो उण ॥२१॥

चलिऊण खणं सिग्घं, भवित्तु संमुहो रवी ।
केरिसी से मुहच्छाया, ईईव्व तं विलोअए ॥२२॥

तओ राया विचिंतेइ, हा ! मया केरिसं कयं ? ।
अन्नरज्जस्स संदेहे, चत्तं रज्जं नियं पि हु ॥२३॥

पुण्णं मे सकयं अत्थि, न वेत्ति को वियाणई ।
एयं मूढत्तणं जायं, जं चत्तं रज्जमप्पणं ॥२४॥

अह संदेहदोसेण, वलित्ता गम्मए पुरं ।
तओ बालो व्व लोयाणं, हासट्ठाणं हविज्जए ॥२५॥

तओ जं होइ तं होउ, गंतव्वं परदेसए ।
भंजेयव्वो य पुण्णंमि, अत्थि नत्थि त्ति संसओ ॥२६॥

इय निच्छिऊण राया, गामस्सेगस्स अंतिए ।
महासरस्स पालीए, परिस्संतो पसुत्तओ ॥२७॥

सव्वदुक्खाण वीसामो, निद्दा तस्स समागया ।
मुच्चा रायं खणं दूरे, ठिया भुक्खा समो वि य ॥२८॥

आलिंगिऊण निद्दाए, पुणो छुहाइ अप्पिओ ।
उट्ठिओ तो निवो हत्थपाए पक्खालए सरे ॥२९॥

कहं मे भोयणं होही, इय चिंताऽऽउरो निवो ।
गओ गामसमीवट्ठे, चउरए जणाऽऽउले ॥३०॥

तस्स बहिट्ठिओ गामलोयाणिच्छापयंपियं ।
सुणंतो कोउहल्लेण, पमोयभरमागओ ॥३१॥

तो गामेयगलोगा ते, तियलोगस्स कच्चडं ।
काऊण उट्ठिया एकसरयं परिसाइया ॥३२॥

पुव्वं निस्सरिउकामा, सव्वे वि समगं तओ ।
पिलिज्जमाणा अन्नोन्नं, आखुडंति पडंति य ॥३३॥

अहो ! गामजणाऽयारो, केरिसो हासदायगो ? ।
न क्कमो जत्थ अन्नोन्नं, वुड्ढाण लहुयाण य ॥३४॥

भूवाले इय चिंतंते, गए य परिसाजणे ।
उत्तरं तेण केणावि, दिट्ठो वुड्ढेण भूवई ॥३५॥

सारीरलक्खणेहिंतो, नाऊण उत्तिमो त्ति सो ।
राया नीओ गिहे तेण, बहुमाणेण भोईओ ॥३६॥

सुहसिज्जाइ तो सुत्तो, राया बुद्धो खणेण सो ।
जग्गिए तम्मि रायंमि, विण्णवेइ कयंजली ॥३७॥

आयारेण कुलं नायं, आगिईए गुणा वि हु ।
सव्वहा उत्तमो तं सि, तो मे मण्णेहि पत्थणं ॥३८॥

अत्थि मे रूवलावण्णविज्जागुणकलागिहं ।
सोहग्गमंजरी नाम, पुत्ती विणयपेसला ॥३९॥

गंधव्वेण विवाहेण, तं परिणेहि सुंदर ! ।
सुसीलपुण्णवंतस्स, देया वरस्स पुत्तिया ॥४०॥

किमेयं ति विचिंतिंतो, भूवालो जाव चिट्ठई ।
आणीया तेण वुड्ढेण, निवस्स पुरओ सुया ॥४१॥

वण्णिय व्व सुरत्थीणं, मुत्तिणी व सिरी सयं ।
नागित्थीणं पहाणेव्व, सा निवेण पलोइया ॥४२॥

मणं मणंमि संलीणं, ताण दुण्हं पि पुव्वयं ।
जणाचाराउ पच्छा हु, हत्थो हत्थेण संगओ ॥४३॥

किं नु मे इत्तियं पुण्णं, इत्थीसंपत्तिमित्तयं ? ।
इत्तिएण न मे तित्ती, तो गमिस्सामि अग्गओ ॥४४॥

इय चिंतित्तु तत्थेव, वसिओ रयणिं इमं ।
सोहग्गमंजरीचित्ते, करित्ता किं पि पच्चयं ॥४५॥

गामाओ चलिओ तम्हा, गच्छंतो य सणियं तओ ।
पत्तो कमेण एगंमि, दिवारम्मंमि पट्टणे ॥४६॥

अत्थमिओ दिवानाहो, तम्मि पुरबहिट्ठिए ।
कमलाणं दलाणि व्व, बद्धाणि गोपुराणि तो ॥४७॥

राया ठिओ बहिं चेव, मसाणट्ठंमि देउले ।
सुत्तो य तत्थ निद्दाए, मत्तवारणभूयले ॥४८॥

तओ एगा वरा इत्थी, निहित्तभक्खभोयणं ।
आणेऊण महाथालं, मिल्लेइ मंडवंतरे ॥४९॥

समुट्ठेह पसायं च, कुणेह भोयणेण य ।
ईय भणंती अंगुट्ठं, सा मोडेइ निवस्स तो ॥५०॥

उज्झिऊण खणा निद्दं, राया उट्ठेइ संभमा ।
पासेइ तत्थ तं इत्थिमुब्भडवेससोहिणिं ॥५१॥

का एस त्ति ? कहं मं च, ओलक्खेइ ? कहं च मं ।
उट्ठाडेइ परिभोत्तुं ?, चिंतिऊण त्ति उट्ठए ॥५२॥

मोणेण चेय भुंजेउं, लग्गो छरसभोयणं ।
सा वि इत्थी न बोल्लेइ, राया भुंजित्तु उट्ठिओ ॥५३॥

इत्थीए अप्पियं बीडं, कप्पूरवासवासियं ।
परमत्थमविण्णाय, अंधयारे तओ गया ॥५४॥

पुणो वि भूवई सुत्तो, निद्दाए समलंकिओ ।
तओ एगो नरो तत्थ, आगमित्तु पयंपए ॥५५॥

को एस करए निद्दं ?, उट्ठेहि ठाणओ अओ ।
मसाणमेयं विग्घाणं, ठाणं पसिद्धमुब्भडं ॥५६॥

तस्स सद्देण तो राया, उट्ठेत्तु निद्दघोलिरो ।
अफुडं भासए को मं ?, परिस्संतं समुट्ठवे ? ॥५७॥

अहं देसंतरा इत्थ, आगओ त्ति पुरीबहिं ।
ठिओ जेण पुरीदारं, संझाए वि हु बज्झए ॥५८॥

तओ सो पुरिसो तस्स, दयाए व्व पयंपए ।
तुमं मरेसि सीएण, वग्घाईहिं य खज्जसि ॥५९॥

तओ कहेमि ते ठाणं, निव्वाए जत्थ सुप्पए ।
जाहि तो दक्खिणं पोलिं, चामुंडरायपोलिओ ॥६०॥

सिग्घं च मे अहिन्नाणे कहिए निच्छएण सो ।
उग्घाडित्तु कवाडिं च, मज्झे मेल्लिसए तुमं ॥६१॥

तओ मग्गस्स वामंमि, भागे अत्थित्थ मदिरं ।
निज्जूहयत्थकुंचीए, उग्घाडित्तु कवाडयं ॥६२॥

पुणो वि तं तहा बारं, बंधिऊण तुमं तओ ।
पल्लंके तत्थ सूयज्ज, निच्चंतो सीयवज्जिओ ॥६३॥

तओ राया विचिंतेइ, किमित्थ मे पओयणं ? ।
मण्णे एयं हि संकेयठाणमेयाण निच्छयं ॥६४॥

एयस्सेव वरंसाए, तीए इत्थीए भोयणं ।
दिण्णं मे सा य दासि व्व, संभाविज्जइ कस्स वि ॥६५॥

तओ अणुजाणावित्तु, तेणुत्तेण पहेण सो ।
पविसिऊण पोलीए, गच्चा सुत्तो गिहे निवो ॥६६॥

इओ य कित्तिवम्मस्स, तन्नयरस्स सामिणो ।
सोहग्गसुंदरी पुत्ती, अत्थि रूवविराईया ॥६७॥

बहिट्ठियनरेणेसा, संकेए पढमे कये ।
दिणे तंमि निवस्सग्गे, आसीणा पेक्खणीयए ॥६८॥

लग्गा तत्थ महावेला, रयणी गरुई गया ।
उट्ठिया य तओ रण्णा, पिक्खणंमि विसज्जिए ॥६९॥

जामइल्लाण दिट्ठीओ, रक्खित्ता सा सहीजुया ।
अंधयारपडच्छन्ना, निग्गया गेहओ दुयं ॥७०॥

गच्छंती तेण मग्गेण आगया पोलिदेसए ।
विमरसिऊण चित्ते, तीए वुत्ता सही तओ ॥७१॥

चंदलेहे ! निसा जाया, गरुई सो वि वल्लहो ।
संकेयट्ठाणओ इत्थ, आगओ भविही गिहे ॥७२॥

एस मम विलंबेण, रुट्ठो भविस्सए धुवं ।
तो पिच्छ गेहमज्झंमि, अत्थि वा नत्थि वा इमो ॥७३॥

सही वि तं तहा सव्वं, काऊणं आगया पुणो ।
कहेइ देवि ! पल्लंके, अत्थि सुत्तो तव प्पिओ ॥७४॥

तओ य रायपुत्तीए, गोसे आविज्ज सिग्घयं ।
भणित्ता सा सही एवं, विसज्जिया तओ सयं ॥७५॥

पविसित्ता गिहद्दारं, पिहिऊण खणं पुण ।
निद्दा एयस्स रोसेण, सच्चेण वित्ति पासए ॥७६॥

तओ य तस्स पायंते, उवविट्ठा वराणणा ।
सयं पुडपुडिं देइ, नियाऽवराहसंकिया ॥७७॥

निवो जाओ विणिद्दो य, ससंभंतो विचिंतई ।
का एसा दिव्वसौरब्भपरिरंभविभूसिया ? ॥७८॥

गयनिद्दो त्ति नाऊण, रायपुत्ती पयंपए ।
तमेगमवराहं मे, खमसु प्पाणवल्लह ! ॥७९॥

किं करेमि ? निवस्सग्गे, उवविट्ठा ठिया अहं ।
जया विसज्जियं गीयं, तया एसम्हि आगया ॥८०॥

किं न जाणामि ? जं तुब्भे, मसाणे तत्थ देउले ।
सीयकंपंतसव्वंगा, एगागिणो चिरं ठिया ॥८१॥

ता सम्ममवराहो मे, सोढव्वो एस दूसहो ।
एसम्हि किंकरी तुब्भ, जं रुच्चइ करेसु तं ॥८२॥

भणिऊण इमं वायं, तप्पाएसु पडेइ सा ।
राया विचिंतए एवं, अहो ! नेहवियंभियं ॥८३॥

नूणमेसा बहिट्ठस्स, नरस्स तस्स भासए ।
पिया परं वरंसाए, मं पइ जंपए पियं ॥८४॥

हवउ ताव जंपेमि, किं पि जं जाणए ममं ।
पच्छा जाइ नियट्ठाणे, चिट्ठए वा इहेव य ॥८५॥

तओ अमियसित्ताए, गिराए समओचियं ।
राया भासेइ गोरंगि !, किमेवं भण्णए तया ॥८६॥

रायपुत्ती तओ चित्ते, चिंतेइ मम पुण्णओ ।
एस मिल्लित्तु दुव्वक्कं, भासए अमियं मिऊ ॥८७॥

स एवेस त्ति नाऊण, ठिया तत्थेव सा तओ ।
मिउभासाए भूवेण, रंजिया रमिया वि य ॥८८॥

निसाए पच्छिमे जामे, सो बाहिरनरो तओ ।
निव्विन्नो पिक्खिउं मग्गं, खिण्णो सीएण सव्वओ ॥८९॥

केणावि कारणेणेसा, नागया पाणवल्लहा ।
ता गंतूण गिहे निद्दं, करेमि जरियं रसे ॥९०॥

चिंतिऊण त्ति सो पत्तो, गिहदारंमि जोअए ।
तो पल्लंकपसुत्ता सा, दिट्ठा तेण समं पिया ॥९१॥

कोवहुयवहो तस्स, जलिओ अइमित्तयं ।
ताण मारणबुद्धीए, विगप्पे करिऊण सो ॥९२॥

गओ रायस्स पासम्मि, विण्णवेइ कयंजली ।
निग्गहेहि ममं नाह !, पच्छा वि भविही जओ ॥९३॥

राया भणेइ को इत्थ, अवराहो कओ तए ? ।
अवराहं विणा जेण, न को वि निग्गहिज्जए ॥९४॥

कित्तिमेण स कंपेण, धुज्जंतो भासए यतो ।
सामि ! ते पुत्तिया सुत्ता, मम गेहंमि चिट्ठए ॥९५॥

एगो य पुरिसो अत्थि, तीए पासे पसुत्तओ ।
खित्ताओ आगएणेव, मया दिट्ठा निए गिहे ॥९६॥

अन्नो वि सामिपायाणं, निच्छएण कहिस्सइ ।
तो मया कहियं पुव्वं, अओ सामी वियारउ ॥९७॥

सुणिऊण त्ति राया वि, कोहेण जलिओ खणा ।
आणवेइ तओ भिच्चे, जाह मारेह ते दुवे ॥९८॥

तो ते तेण पुरिसेण, सह तत्थ गया दुयं ।
वेढियं तं गिहं तेहिं, तओ भूवेण जग्गियं ॥९९॥

किमेयमिय उट्ठित्ता, राया मयणसुंदरो ।
पासए दारछिद्देहिं, बहिट्ठिए भडे घणे ॥१००॥

उइओ य सहस्संसू, सव्वं दिट्ठीइ दिस्सए ।
तओ य रायपुत्तीए, दिट्ठो मीणज्झय व्व सो ॥१०१॥

मणेण पढमं नाओ, जह एस न सो हवे ।
दिट्ठीए अहुणा नाओ, ता को एस भवे धुवं ? ॥१०२॥

एयाए रूवलच्छीए, सामन्नो को वि एस न ।
सुलक्खणेहिं एएहिं, राया वा अहवा सुरो ॥१०३॥

दिट्ठा दिट्ठीए सा रण्णा, संपुण्णरूवसंपया ।
मणे जाओ य संतोसो, जं मे जाया इमा पिया ॥१०४॥

कज्जे इमीए जं मच्चू, मम होइ हवेइ तो ।
मणेण मन्नियं जं खु, जीवियं तस्स संतियं ॥१०५॥

तओ य रायपुत्तीए, दिट्ठा बाहिम्मि ते भडा ।
अमुगो अमुगित्तेवं, सव्वे ते उवलक्खिया ॥१०६॥

पेसिया पिउणा मज्झ, एए तुम्हाण मारणे ।
ता जा तुम्ह गई सा मे, ता कुणेह जहोचियं ॥१०७॥

राया चिंतेइ अट्ठाणे, मरणं मे समागयं ।
एगागी सत्थरहिओ, सूरो वि हु कुणेमि किं ? ॥१०८॥

अत्थ उ ता परियणो, नत्थि मे आउहं पि हु ।
धिद्धी एयाइ रीईए, दिट्ठं पुण्णफलं मया ॥१०९॥

चिंतंतो अत्थि जा एवं, भडेहिं हक्किओ तओ ।
ससंभंता तओ दिट्ठी, रण्णो मज्झगिहे गया ॥११०॥

तओ य पुण्णजोगेण, कत्थ वि विणिवेसियं ।
एगं च धणुहं दिट्ठं, सरपुण्णो य भत्थओ ॥१११॥

हुं कओ वि भयं नत्थि, लद्धे एयंमि आउहे ।
इय भणंतो धणुहं, चडावेइ खणा निवो ॥११२॥

चप्पडिऊण तो भत्थं, उग्घाडित्तु कवाडयं ।
वालेऊण तओ गुड्डुं, ठियं दारंमि संमुहो ॥११३॥

तंमि संपुण्णपुण्णंमि, संमुहंमि ठिए तओ ।
विणा वि घायपहारं, गया दूरे भडा परे ॥११४॥

जस्सत्थि मत्थए छत्तं, दूरा मारेइ तं निवो ।
दासा इव कुणंतेव, रायादेसं सरा वि ते ॥११५॥

कहिए कित्तिवम्मस्स, वुत्तंते सो तओ पुरो ।
पेसेइ रायपुत्ते य, ते वि तेण तहा हया ॥११६॥

जायं अच्छेरयं तत्थ, अहो ! एगेण मारिया ।
सव्वे वि रायपुत्ता तो, कित्तिवम्मेण तं सुयं ॥११७॥

कित्तिवम्मो वि तस्सित्ति, सूरत्तं सुणिऊण तो ।
चित्ते काऊण अच्छेरं, चलिओ सयमेव हि ॥११८॥

हत्थिखंधे समारूढो, सव्वसामंतसंजूओ ।
पाइक्कचक्कसंनद्धो, कंडंते आगओ निवो ॥११९॥

मयणसुंदरो एसो, सरेण जाव ताडिही ।
मा मा ईय संभंताए, रायपुत्तीइ वारिओ ॥१२०॥

पिया मे आवए एस, कित्तिवम्मो त्ति नामओ ।
जमेसो करए पुव्वं, तं तुब्भे वि करेह तो ॥१२१॥

कित्तिवम्मो वि तं दट्ठुं, पसंतरोसदोसओ ।
जामाउयममत्तं च, हत्था अस्सिं कुणेइ सो ॥१२२॥

सव्वहा विवसीभूओ, पुव्वं दूयं स पेसए ।
निवारेइ सरासारं, मा बीहेहि त्ति भासए ॥१२३॥

कित्तिवम्मो सयं चेव, आगओ तत्थ जत्थ सो ।
पुत्तीए सहिओ अत्थि, तस्स पुण्णेण कड्ढिओ ॥१२४॥

दट्ठूण तस्स तं रूवं, तं सोडीरं गुणे य ते ।
एयाए उचिओ एस, ईय ते दो वि पासए ॥१२५॥

समरूवं समगुणं, उभयपक्खनेहलं ।
कित्तिरूवो मुणेऊण, तं वहूवरमुब्भडं ॥१२६॥

सुलग्गं मे मणोच्छाहो, अहमेव हि बंभणो ।
एयं वेईहरं चेय, एवं चिंतित्तु सो तओ ॥१२७॥

काऊण अंजलिं पुत्तिं, देइ तस्स सयं चिय ।
गंधव्वेण विवाहेण, सो वि तो परिणेइ तं ॥१२८॥ तीहिं विसेसगं ॥

कित्तिवम्मो वि चिंतेई, नहि मे अत्थि संतई ।
वुड्ढत्तणं च मे पत्तं, ता रज्जं देमि अप्पणं ॥१२९॥

जामाउयस्स एयस्स, सयं जामि तवोवणं ।
रायाणं किल वुड्ढाणं, एस मग्गो पसंसिओ ॥१३०॥

सूरो पयावसंजुत्तो, अत्थि एसो खमो वि य ।
पाणप्पियाए पुत्तीए, संमओ वि जओ इमो ॥१३१॥

तओ य कित्तिवम्मेण, सयं चेव पमोयओ ।
समक्खं सव्वलोयाणं, रज्जं तस्स समप्पियं ॥१३२॥

सिक्खं दाऊण मंतीणं, एस मयणसुंदरो ।
अओ वरं पहू तुम्ह, सेवियव्वो सया वि हु ॥१३३॥

एवं भणित्तु ठाणाओ, तओ चेव गओ वणं ।
मयणसुंदरो रज्जे, मंतीहिं अहिसिंचिओ ॥१३४॥

रज्जं करेइ आणाइ, अन्ने वि नामिया निवा ।
नीईए पालए लोयं, सोहग्गसुंदरीपई ॥१३५॥

जाणिऊण निए चित्ते, पुण्णप्पभावमेरिसं ।
पुण्णं पवट्टिउं तत्तो, पइत्तो जायपच्चओ ॥१३६॥

तं रज्जं मंतिमुक्खाणमप्पिऊण सयं पुण ।
सोहग्गसुंदरीजुत्तो, रायवग्गेण संजुओ ॥१३७॥

सणाहो साहणेणेसो, दिव्वारम्माउ पट्टणा ।
चलिओ सिग्घभावेण, मणोरमपुरिं पइ ॥१३८॥ जुग्गं ॥

गच्छंतेण तओ तेण, कया वि उप्पियाणए ।
विहिए भिक्खुवेलाए, रन्नाओ को वि तो मुणी ॥१३९॥

जोवणे वट्टमाणो वि, जिइंदियकसायओ ।
निरीहो निम्ममत्तो य, मासखवणपारणे ॥१४०॥

आगओ रायसिन्नंमि, भमंतो रायगुद्दुरे ।
संपत्तो य तओ दिट्ठो, सोहग्गसुंदरीइ सो ॥१४१॥

अच्चंतरूवं तं साहुं, दट्ठुं सोहग्गसुंदरी ।
चिंतेइ विम्हिया रूवे, केरिसे कीरिसी खमा ? ॥१४२॥

तओ उचियमाहारं, दिंती सद्धाइ मुद्धिया ।
साहुं भणइ हासेण, किं सवेले उस्सूरयं ? ॥१४३॥

अत्थं नाऊण साहू वि, भासए विजिइंदिओ ।
महाभागे ! वियाणामि, न याणामि पुणो वि य ॥१४४॥

गहिऊण कप्पणिज्जं, भत्तं धोयणमेव य ।
जहाट्ठाणं गओ साहू, पच्छा सोहग्गसुंदरी ॥१४५॥

मुणिवायाइ भावत्थं, अजाणंती पुणो पुणो ।
पयाइं ताइं बुद्धीए, परावत्तेइ सा मणे ॥१४६॥

न य अप्पंति भावत्थं, पयाणि ताणि सा पुणो ।
मयणसुंदरं भूवं, पुच्छेइ सो वि मंतिणो ॥१४७॥

पडिपुच्छेइ जाणंति, न ते वि हु वियारिउं ।
तओ राया समं तेहिं, सोहग्गसुंदरीजुओ ॥१४८॥

गओ तत्थेव जत्थत्थि, काउसग्गेण सो मुणी ।
तं नमंसेइ भत्तीए, दाऊण तिपयाहिणं ॥१४९॥

काउसग्गं स पारित्ता, धम्मलाभं भणेइ य ।
ताण अणुग्गहट्ठाए, करेइ धम्मदेसणं ॥१५०॥

जीवाण दुट्ठकम्मम्मि, घुम्मियाणं इओ तओ ताण ।
बहुपोग्गलपरियट्टावट्टविवट्टीण अणवरयं ॥१५१॥

घणजोणिलक्खकच्छवगलत्थणातिक्खदुक्खदुहियाण ।
किण्हप्पमुहकुलेसाअवालसेवालकलियाण ॥१५२॥

कोहमहावडवानलतत्ताणं रायपंकखुत्ताणं ।
मिच्छत्तमच्छभीयाण, कलिलसलिलंमि बुड्ढाण ॥१५३॥

संसारंमि समुद्दे अणोरपारंमि दुल्लहं एयं ।
मणुयत्तजाणवत्तं, विसालकुलजाइदलकलियं ॥१५४॥

तं पुण पत्तं पि हु कहकहं पि रहियं सुकन्नधारेण ।
तत्थेव निमज्जंतं, पुणो वि को धारिउं तरइ ? ॥१५५॥

ते य पुण कन्नधारा दुविहा चिट्ठंति भवसमुद्दंमि ।
एगे कुतित्थपंथाण पत्थिया मग्गमूढा य ॥१५६॥

अन्ने उण सयलअवायरक्खणखमा भवसमुद्दंमि ।
दीवंतरेसु संबलसंपाडणपयडमाहप्पा ॥१५७॥

ता जइ सम्मं अपरिक्खिऊण पुव्वुत्तकन्नधाराण ।
वयणेणं परिपिल्लइ जीवो मणुयत्तबोहित्थं ॥१५८॥

ता माणमीणखलियं, मच्छरमयराणणंमि पडिफलियं ।
मायावित्तलयावणगहणे गाढं निगूढं च ॥१५९॥

लोहमहागिरिगुरुकडयघट्टणा जज्जरिज्जमाणं च ।
अइपबलकामकल्लोलमालआवत्तपडियं च ॥१६०॥

मोहमहागिरिकुहरंतरालवासीहिं लद्धलक्खेहिं ।
लूडिज्जंतं इंदियचोरेहिं सुदुन्निवारेहिं ॥१६१॥

रोद्दज्झाणाभिहाणेण, सबरराएण झत्ति हीरंतं ।
विसयमहाविसविसहरसएहिं वेढिज्जमाणं च ॥१६२॥

ईय एवमाइबहुविहअवायपडियं तडित्ति फुट्टंतं ।
किं कायव्वविमूढा न हु ते पारंति तं धरिउं ॥१६३॥

तंमि य फुट्टे जीवो पुणो वि संसारजलहिमज्झंमि ।
निवडइ अणंतकायाइएसु दुक्खाई य सहेइ ॥१६४॥

ता इह कुतित्थपत्थियकुकन्नधारे लहुं पि मोत्तूण ।
सम्मं परिक्खिऊणं सुकन्नधारे य अणुसरह ॥१६५॥

ते पुण संसारमहासमुद्दतरणम्मि कन्नधारसमा ।
पंचपरमेट्ठिणो च्चिय, जयत्तए पयडमाहप्पा ॥१६६॥

ते च्चिय पुव्वपसाहियअवायनियराओ रक्खिऊण इमं ।
अव्वाबाहपहेणं निंति सुचारित्तदीवंमि ॥१६७॥

तत्थ वि य सव्वसावज्जविरइनामंमि तुंगसेलंमि ।
नेऊण वरमहव्वयरयणाइं खिवंति एयंमि ॥१६८॥

जेहिं करयलकलिएहिं, न होइ भुवणे वि किं पि हु असज्झं ।
निव्वुइपुरी वि परमानियडि च्चिय हवइ लहुमेव ॥१६९॥

तस्स य गिरिणो उवरिं दसविहमुणिधम्मनामरुक्खाओ ।
असमट्ठारससीलंगसहसफलनियरमुवणिंति ॥१७०॥

तस्स वि य अग्गभागे, केवलनाणाभिहाणसिहरंमि ।
विस्सामिऊण कइवइदिणाइं तो तस्स अग्गंमि ॥१७१॥

निव्वाणपुरी चिट्ठइ भवपारावारपरमतीरसमा ।
तंमि य ठवंति जीवं, मोत्तुं मणुयत्तबोहित्थं ॥१७२॥

जीइ न जम्मो न जरा, न य मरणं नेय छुहपिवासा य ।
न य रायरोसरोया, न भयं न य सोयलेसो वि ॥१७३॥

न व्वामोहो न मओ न य चिंता न विय खेयभेया वि ।
न विसाओ न वि निंदा कया वि अरई न य खणं पि ॥१७४॥

केवलममंदआणंदअमयसेएण अक्खयसरूवो ।
नीरंजणो थिरप्पा जीवो रयणप्पईवो व्व ॥१७५॥

लोयालोयब्भंतरसमत्थसुपसत्थवत्थुवित्थारं ।
उज्जोयंतो चिट्ठइ, सया वि अक्खंडियप्पसरो ॥१७६॥

ता तुब्भेहिं तत्थ य जईयव्वं सव्वहा वि नाऊण ।
संसारमसारं चिय सव्वं धणरज्जभज्जाइ ॥१७७॥

तो पुट्ठो भत्तीए सो साहू मयणसुंदरनिवेण ।
जाणामि न याणामि, ईय पयअत्थं मुणी कहइ ॥१७८॥

मं जोवणपडिरूवं, दट्ठूणं तुह प्पियाइ तो भणियं ।
किं खु सवेलाइ हुयं उस्सूरं मुणिवरिंद ! तुह ॥१७९॥

नाओ मए वि अत्थो जं वड्डत्तणउचियमिह तमिण्हि ।
किं गहियं वयमेयं ईय परमत्थो य पसिणस्स ॥१८०॥

जायस्स धुवं मरणं, ईय जाणामि य परं न याणामि ।
होही कया य मज्झं ईय संदेहे वयं गहियं ॥१८१॥

जइ जीवियं भविस्सइ चिरं तओ कम्मनिज्जरा होही ।
अह मरणं तो वि सुहं जिणवरदिक्खं पवन्नस्स ॥१८२॥

आयन्निऊणमुत्तरमेयं साहुस्स सो निवो तत्तो ।
सोहग्गसुंदरीए सह गिण्हइ गिहिवयाइं च ॥१८३॥

तो पणमिऊण साहुं आयासे मयणसुंदरो पत्तो ।
अक्खंडपयाणेहिं पत्तो य मनोरमं पुरियं ॥१८४॥

विछड्डेण पविट्ठो राया सोहग्गसुंदरीनाहो ।
गमिऊण धवलहरयं संभासइ मंतिपमुहजणं ॥१८५॥

नियरज्जं छड्डेउं गओ य देसंतरंमि एगागी ।
पत्तं तत्थ वि रज्जं पुण्णपहावेण तेण फुडं ॥१८६॥

ता पुण्णे जइयव्वं संसारनिवासिएहिं जीवेहिं ।
पुण्णं विणा न जीवो इह परलोए सुही होइ ॥१८७॥

**इति पुण्ये मदनसुन्दरकथा ॥ ग्रन्थाग्रम् ॥ २०० ॥**

# अपुण्ये मङ्गलकथा

दाणाईहिं न पुण्णं समज्जियं जेहिं भवनिवासंमि ।
ते मंगल व्व कयबहूववसाया वि हु विसीदंति ॥१॥

अत्थित्थ भरहखित्ते सुमंगला नाम रम्मया नयरी ।
जत्थ जणविवहारो, विवेगतरलेण परिकलिओ ॥२॥

तत्थत्थि सुकयनिरओ धणसारो सिट्ठिपुंगवो तस्स ।
नामेणावि सुसीला हरिणो लच्छी व भज्जा य ॥३॥

नयरम्मि तत्थ जक्खो, परीक्खओ लद्धनाममाहप्पो ।
इत्थी वा पुरिसो वा जो जम्मइ तंमि नयरंमि ॥४॥

जम्मणखणंमि बालं, तस्स य जक्खस्स मुत्तिपुरओ तं ।
पक्खिवंति जणणिजणया पुण्णमपुण्णं ति जाणेउं ॥५॥

जइ होइ पुण्णवंतो ता जक्खकरट्ठिओ सलिलकलसो ।
सिसुपुण्णतारतम्मा उभुआइ तक्खणा चेव ॥६॥

जइ पुण अपुण्णवंतो ता जक्खपुरट्ठियस्स दीवस्स ।
गलिउं तत्तो बिंदू पडेइ बालस्स भालम्मि ॥७॥

अप्पुण्णउ त्ति लंछणतिलएण तेण सहिनाणं ।
ववहारनेहवीवाहकज्जवग्गंमि वज्जंति ॥८॥

धणसारगेहिणीए जाओ पुत्तो तओ अ जक्खस्स ।
पुरओ खित्तो दीवाउ तेलबिंदू सिरे पडिओ ॥९॥

जायं तिलयं सीसे नीओ गेहम्मि ताव धणसारो ।
चिंतेइ केरिसमिणं संजायं मज्झ पुत्तस्स ? ॥१०॥

जाओ पुण्णाओ सुओ संजाओ सो वि विगयपुण्णो हा ! ।
ता जीवंतेणिमिणा अम्हाण पराहवो लोए ॥११॥

जम्हा अपुण्णवंतो देसाऽऽचारेण ठाइ न गेहंमि ।
खिप्पइ अपुण्णगामे रायाऽऽदेसो जओ इत्थ ॥१२॥

खिविओ तत्थ वि पालिज्जंतो स पिऊहिं वड्ढिओ कमसो ।
दुक्खेण जियइ निच्चं अपुण्णवयणिज्जए पडिओ ॥१३॥

ता तह करेमि संपइ जह एसो पावए न इह दुक्खं ।
ईय पावेणं पिउणा खित्तो सो बालओ कूवे ॥१४॥

तो वंतरीइ कूवे निवसंतीए स बालओ कलिओ ।
नाऊण जक्खललियं पडिवण्णं अप्पणा एवं ॥१५॥

जं एसो जक्खेणं कओ अपुण्णो त्ति तो मए नूणं ।
जह पावइ रज्जमयं तह कायव्वं तओ अवहिं ॥१६॥

सा वंतरी पउंजइ पिक्खइ रयणपुरंमि विजयस्स ।
रण्णो कंचणमालं पसविंतिं तक्खणा चेव ॥१७॥

ता सा निमेसमज्झे मिल्लइ नेऊण तत्थ तं बालं ।
जत्थत्थि पसवमाणा रायवहू पुत्तियं एगं ॥१८॥

दिट्ठो सुआइणीयाए सो बालो सा य पुत्तिया जाया ।
मोहाउ भणइ एसाओ जायं जुयलयं पिच्छ ॥१९॥

एगो पुत्तो एगा य पुत्तिया पुहविणाह ! तुह जाया ।
इय वयणा दासीओ मग्गंति वद्धावणिं रण्णो ॥२०॥

राया वि तक्खणे च्चिय वामक्खिफ्फंदणेण सासंको ।
गहिओ जरेण बाढं जाओ दाहो सरीरंमि ॥२१॥

नाऊण वइयरमिणं कंचणमाला तओ विसण्णमणा ।
तं बालपुत्तमइरा निसंमि [निसाए] छंडावए पढमं ॥२२॥

तो छंडियंमि तंमि हु राया जाओ खणेण पडुदेहो ।
आगमिऊणं भासइ पिच्छामि मुहं सपुत्तस्स ॥२३॥

तो भणियं देवीए सामिय ! एसो मुय च्चिय पजाओ ।
तो परिचत्तो बाहिं ता किं ते तेण दिट्ठेण ? ॥२४॥

इय उत्तरेण कंचणमालाए सो निवत्तिओ राया ।
चत्तंमि तंमि बाले न कुणइ नेहं खणं पि सा ॥२५॥

बालो सो वि निसाए दिट्ठो गहिओ य हलियभज्जाए ।
सययं जाय व्व तओ मंगल नामो कओ तीए ॥२६॥

जाओ बलद्द[बईल्ल]चारणजोग्गो तत्तो स चारए ढोरे ।
तो हालिणीइ भत्ता मओ अकम्हा विणा रोगं ॥२७॥

तो तीए भणिओ सो वच्छ ! तुमं जोईओ मए दुक्खा ।
ता इण्हिं मं पालसु विणा तुमं मे परो नत्थि ॥२८॥

तो सो करेइ खेत्तं खेडइ सययं हलं तओ रत्तिं ।
चारइ गोणे भुंजइ कुक्कुसरब्बं सया दुहिओ ॥२९॥

जाओ कणो वि खेत्ते अपुण्णभावाउ तस्स न वि कत्थ ।
ववसायं अन्नं पि हु जं आरंभइ न सो फलइ ॥३०॥

तओ अफलियावरववसाओ जाओ नयरमज्झंमि भारवाहओ। भारपमाणेण लहइ भाडिं। अन्नया कया वि एगेण सेट्ठिणा समाहूओ मंगलो। अप्पिओ घियकुंभो, बोल्लिया भाडी। तओ उप्पाडिउप्पाडिऊण कओ नियमत्थए मंगलेण। चलिओ पिट्ठिलग्गो जहाठाणं गंतुं। गच्छंतो चिंतइ मंगलो। अणेण भाडिलद्धेण दव्वेण नूणं मए गहियव्वाणि बोराणि। तओ निप्पन्नकणासु खलवाडीसु विक्किऊण करिस्सामि बिउणं दव्वं। तओ फुट्टचणयगज्जरबोराइयं लेऊण विक्कणंतस्स निच्चं मे भविस्सइ महालाहो। जओ अन्नाणं वाणिज्जियाणं न को वि किं पि बोराई गिण्हिस्सइ। तओ लज्जायरं उब्भवाणिज्जं मोत्तूण चणयाइपसारयहट्टं मंडिस्सं रायमग्गे। तओ ऊसवनिरक्खणत्थं आगमिस्सइ इत्थ नयरे बहूओ गामलोओ। सो वि अन्नहट्टाणि मोत्तूण समग्घदायगस्स आवज्जण-विसज्जणमहुरवाणिस्स मज्झ हट्टे चणगाई किणस्सइ। किराणयं च मह हट्टे बहुयं अत्थि। इत्थं विढविस्सामि घणं दव्वं। तओ चणयपसारयमंडणेण लज्जंतो मंडिस्सामि कणहट्टं। तत्थ रायलोगस्स वरया मह हट्टे भविस्संति। तओऽहं कयविक्कयकारयं अहिगारिपुरिसं तंबोलाईहिं आवज्जिऊण सेच्छाए जहा समीहियं लाहं गिण्हिस्सं। कणहट्टे वि दालिपीसणकणाणयणघियतोलणाईहिं कट्ठं मोत्तूण मंडिस्सं गंधियहट्टं। तत्थ अप्पेण दव्वेण किराणयं गिण्हेऊण महग्घं दिंतस्स मम दव्वं न माइस्सइ। परं तत्थ हिंगुल्हसणाइगंधेण उब्भज्जिऊण सुहसज्झं मंडिस्सं दोसियहट्टं। जाणि दिव्वाणि बहुमोल्लाणि वत्थाणि ताणि मह हट्टे च्चेय भवस्संति न अन्नस्स। तओ मे हट्टं वत्थसंपत्तिआहए चडिस्सइ। तओ रिद्धो नागरियलोओ अमच्च-मंडलेसरप्पमुहप्पहाणरायवग्गो मम हट्टे दुगूलाइं किणंतो कया वि रायपुरओ मं पसंसिस्सइ। तओ राया हक्कारिऊण ढोईयउचियपाहुडं मं भणिस्सइ। जहा तए च्चिय मम मुल्लेण दिव्ववत्थाणि देयाणि। तओऽहं

राउलवाईओ होऊण पुरे गामे देसंतरे वाणिपुत्तेहि सव्वत्थ ववहारं करिस्सं। कोडिसंखं दव्वं अज्जिऊण नयरमज्झपएसेसु ठाणे कारयिस्सामि धवलहरं। परिणयस्सामि इब्भपुत्तीओ। तओ पइवरिसं अउव्वबंधभत्तिरम्माइं दिव्ववत्थाइं अप्पितस्स मज्झ संतुट्ठो राया मूलसिट्ठिपदं अप्पिसइ। तओ ऊसवे जया राया रायवाडियं करिस्सइ, तया सिट्ठिपयसमुचिओ मम जुग्गो हत्थी समागमिस्सइ। तओऽहं हत्थिवग्गस्स कप्पडाइदाणसंमाणं काऊण दिव्वाभरण-वत्थसमुदायं परिहेऊण हत्थिखंधे चडिस्सं। तओ मत्तो हत्थी मए अंकुसे दिन्ने एयाए रीईए कुंभत्थलं धूणइस्सइ। एवं चिंतंतो सो मंगलो सच्चं पिव मन्निऊण अणुहवेण नियं सीसं अंदोलेइ। तओ पडिओ सीसाओ घयकुंभो। तडित्ति फुट्टो य। छंडियं घियं। तिसियाए इव मेयणीए पीयं। तओ सिट्ठिणा संभमेण रे दुट्ठ! पाविट्ठ! कहं तए एस कुंभो भंजिओ त्ति कोवेण पुट्ठो। धुज्जंतो सो मंगलो पडिभणइ। न मए एस कुंभो भग्गो किं तु हत्थिणा। तओ विसेसओ कुविओ सिट्ठी भणइ-रे असच्च! इह कत्थत्थि हत्थी ?। तओ मंगलेण सव्वो चिंतियवुत्तंतो कहिओ। अवधारिऊण सिट्ठिणा चिंतियं नियमणे। जं एयस्स भारवाहयस्स बहला मणोरहा। मणोरहप्पमाणेणेयस्स पुण्णमवि संभाविज्जइ। तओहं करेमि एयं अप्पणं वाणिउत्तयं ति काऊण नीओ स मंगलो सेट्ठिणा सगेहे। कराविओ ण्हाणभोयणाइपडिवत्तिं। तओ अप्पिऊण दविणजायं पेसिओ वाणउत्तियाए सुमंगलं नयरिं। तओ तेण गच्छंतेण अद्धमग्गे एगस्स निग्गोहस्स तले खिल्लंता जूयाए चउरो पुरिसा दिट्ठा। पुरओ होऊण गओ मंगलो। तत्थ दिट्ठा य सुवण्ण-मोत्तिय-रयणपुंजा। तओ तेहिं पुरिसेहिं भणिओ नियलोहेण य उवविट्ठो मंगलो तत्थ रमिउं। ता पढमदाए वि जित्तो तेण एगो महामुल्लो हारो। पमोयभरभरियहियओ उट्ठिऊण ठिओ नियमग्गे। पत्तो य सुमंगलाणयरीए बाहिं। वावीइ हत्थपक्खालणपुव्वं सिट्ठिदिण्णाणि वत्थाणि अलंकरिऊण तं हारं कंठे खिविऊण पुरिं पविसिउं लग्गो। दिट्ठो य संमुहागच्छंतेण तन्नयरकुमारेण। ओलक्खिओ मम एस हारो त्ति। पुट्ठो य कुमारेण सो मंगलो हारवुत्तंतं। खुहिओ जा उत्तरं न देइ, ता कुमारेण सव्वं तस्स दव्वजायं ल्हसियं। एस चोरो त्ति काऊण तस्स अपुण्णभावाओ वियारं विणा वि परीखयजक्खदेउलस्स नाइदूरट्ठियाए सूलीए रडंतो छूढो। अट्टज्झाणेण मरिऊण जाओ भूयत्तणेणं ति। संपत्तिसयणमाणा दूरट्ठा हुंति जेण तमपुण्णं। जीवाणं मणवंच्छाविच्छेयच्छेयमुज्झेह। विगहाक-सायरागद्दोसाइ विवज्जिएण पुण्णेण। सम्मत्तं धारिंता पिल्लंति अपुण्णयं दूरा।

**इति अपुण्ये मङ्गलकथा ॥**

# विनये विनीतकथा ।

गुणेषु विनयः श्लाघ्यः, तेजस्विषु यथा रविः ।
येन कर्मग्रहाः सर्वे, प्रच्छाद्यन्ते निजोदयात् ॥१॥

विनयात्सम्पदः सर्वा, मेघादिव जलर्द्धयः ।
केवलज्ञानलाभश्च, विनीतस्यैव जायते ॥२॥

व्योम्नीवार्कः क्षमापुर्यां, श्रीहर्षो नाम भूपतिः ।
वैरिस्त्रीनेत्रकुमुदसङ्कोचव्रतनिर्वृतः ॥३॥

स्ववाग्दोषपरिभ्रष्टश्रेष्ठिभावोऽस्ति तत्र तु ।
विषवाक्याऽभिधः श्रेष्ठी, प्रारब्धकृषिजीवनः ॥४॥

अन्यदा कर्मकृद्योग्यं, भक्तं मूर्ध्नि निधाय सः ।
गच्छन् क्षेत्रे ददर्शैकं, रुदन्तं बालकं पथि ॥५॥

कृपया कटिमारोप्याऽभोजयत्तं स्वपाणिना ।
कोऽसि ? क्वत्योऽसि ? कस्याऽसीत्यादि पृच्छन् गृहं ययौ ॥६॥

अपत्याऽभावदीनायै, पत्न्यै तं बालमार्पयत् ।
लाल्यामानस्तयाऽऽत्मेव, कलाभृत्प्राप यौवनम् ॥७॥

विषवाक्यगिरा दग्धं, स्ववाक्यैरमृतैरिव ।
निर्वापयन् पुरीलोकं, ख्यातोऽभूदाऽऽनृपं स हि ॥८॥

राजा तुष्टोऽथ भूपोऽपि, तस्मै विनयसद्मने ।
सनाथं विनीत इति, नाम्ना श्रेष्ठिपदं ददौ ॥९॥

पदे च पैतृके लब्धे, भूपात्प्रसन्नचेतसः ।
श्रीपात्रं स विनीतोऽभूत्, पद्मवत् प्रोदिते रवौ ॥१०॥

अथाऽन्यदा कुतोऽप्येत्य, दुर्भिक्षक्षीणसम्पदः ।
वृद्धो वृद्धा युवा चैकस्तस्य कर्मकृतोऽभवन् ॥११॥

अथाऽन्यदा बलाच्चम्पामहीपालं जिघृक्षुणा ।
श्रीहर्षेण सहाऽचालि, विनीतः कर्मकृद्युतः ॥१२॥

ज्ञात्वा श्रीहर्षमायान्तं, चम्पेशः सम्मुखोऽचलत् ।
ततो नाऽसीरयोरासीदिति युद्धं परस्परम् ॥१३॥

दन्तादन्ति गजैर्युद्धं, रथिकैश्च शराशरि ।
खड्गाखड्गि च पादातैः, कुन्ताकुन्त्यश्ववारकैः ॥१४॥

दैवाच्चम्पेशसैन्येन, भग्ने श्रीहर्षभूपतौ ।
तस्य सैन्यं पलायिष्टाऽऽदाय जीवान् दिशो दिशि ॥१५॥

विनीतोऽपि परित्यक्तो, नश्यद्भिः स्वपदातिभिः ।
आत्मेव सुकृतैर्नैव, मुक्तः कर्मकरैः स तैः ॥१६॥

स एकां दिशमुद्दिश्य, नश्यन्नैक्षिष्ट निम्नगाम् ।
तत्र स्नात्वाऽम्बु पीत्वा च, तीरवृक्षमशिश्रियत् ॥१७॥

अथैकं कान्दिशीकं स, मृगं तदनुसादिनम् ।
उद्गीर्णास्त्रं समीक्ष्यैणस्याऽन्तरा दययाऽभवत् ॥१८॥

मृगे दूरं गते प्रेक्ष्य, सादिनं क्रोधवादिनम् ।
विनीतः प्राह युज्येत, त्वादृशां दीनमारणम् ? ॥१९॥

त्वल्लक्षणैरहं वेद्मि, राजाऽसि क्षत्रियोत्तमः ।
क्षत्रियाणां गृहीताऽस्त्रे, शस्त्रघातः प्रशस्यते ॥२०॥

इत्यादिवचनैस्तस्य, शास्त्रतत्त्वार्थवादिभिः ।
स राजा पृथिवीचन्द्रः, प्रबुद्धः शस्त्रमत्यजत् ॥२१॥

धर्मोपदेष्टाऽसौ मेऽभूदिति प्रत्युपकृन्नृपः ।
क्ष्मातिलकपुरे सौवे, विनीतं सचिवं व्यधात् ॥२२॥

तेन न्यायात् पुरीलोकं, रक्षता कीर्त्तिमीयुषा ।
किमपि याचतेत्युक्ता, नेति कर्मकृतोऽवदन् ॥२३॥

इतश्च चम्पानाथेन, भग्नायां क्ष्मापुरि क्षणात् ।
विषवाक्योऽग्रहीद्दीक्षां, वैराग्याद्गुरुसन्निधौ ॥२४॥

तप्यमानस्तपस्तीव्रमधीयन्नागमानसौ ।
क्ष्मातिलकपुरेऽप्यागाद्विषवाक्यो व्रती क्रमात् ॥२५॥

गुरूनापृच्छ्य पुण्यात्मा, मासक्षपणपारणे ।
अविशत्पर्यटन्नेष, विनीताऽमात्यवेश्मनि ॥२६॥

अस्मत्स्वामिपितैवैष, कथमेवंविधोऽभवत् ? ।
उपलक्ष्येति तं कर्मकृतः सर्वे ववन्दिरे ॥२७॥

ढौकितं वस्तुजातं तैः, सोऽनादायैव जग्मिवान् ।
आगतस्य विनीतस्य, तैराचख्ये प्रमोदतः ॥२८॥

विनीतोऽपि जगामाऽथ, तदैव तदुपाश्रयम् ।
विषवाक्यमुनिं दृष्ट्वा, शुशोच मुमुदे च सः ॥२९॥

नमस्कृत्य गुरून् साधून् ववन्दे पितरं निजम् ।
क्षणं स्थित्वा ययौ गेहे, एवमभ्येति नित्यशः ॥३०॥

सोऽन्यतश्चलितान् ज्ञात्वा, गुरून् विनयतोऽब्रवीत् ।
पिता मेऽत्राऽस्तु येन स्यां, प्रीतो जनकदर्शनात् ॥३१॥

ज्ञात्वाऽऽहुर्गुरवो मन्त्रिन् !, नाऽयं ते जनकः पिता ।
किंतु ते पोषको मन्त्री, प्राह कस्तर्हि ? तेऽब्रुवन् ॥३२॥

पिता कर्मकरो वृद्धो, माता कर्मकरी च ते ।
युवा च कर्मकृद्भ्रातेत्यवगच्छ कुटुम्बकम् ।।३३।।

नाऽन्यथाभाषिणोऽमीति, निश्चित्य तान् प्रणम्य च ।
सार्द्रनेत्राऽन्तःकरणो, निजं वेश्म जगाम सः ।।३४।।

मषीमलिनवस्त्राया, धूमध्यामलचक्षुषः ।
विस्मयात्पश्यति जने, कर्मकर्याः पदेऽपतत् ।।३५।।

त्वमत्रस्थाऽपि न ज्ञाता, मयका हतकेन हा ! ।
मातर्मुक्तिरिवेदानीं, गुरुभिः कथिताऽसि मे ।।३६।।

अजानत्याऽपि मार्गेऽहं, पुत्रवल्लालितस्त्वया ।
मयाऽतीव कृतघ्नेन, कर्मकृत्त्वे कृताऽसि हा ! ।।३७।।

इति साऽस्रं वदत्यस्मिन्, क्षरत्स्तन्यस्तनी तु सा ।
चिराज्ज्ञातोऽसि वत्स ! त्वमित्युक्त्वाऽदात्स्ववक्षसा ।।३८।।

हा ! धिक् पिक्येव दुर्भिक्षे, पोषितुं त्वामशक्तया ।
त्यक्तोऽसि पापया मार्गे, मया धिग्मां कुमातरम् ।।३९।।

लब्धपक्षः स्वपुण्येन, वचोभिरमृतद्रवैः ।
पिकवत्प्रीणयन् लोकं, परां श्रियमशिश्रियः ।।४०।।

तथैव विनयस्नेहात्, पितर्भ्रातुः पदोर्नमन् ।
आश्लिष्टो वक्षसा ताभ्यां, विनीतः प्राप सम्मदम् ।।४१।।

स चक्रे स्वगृहे तांश्च, यत्कृताऽधिकृतौ सदा ।
भवन्ति वृद्धा गेहेषु, पुण्याढ्यि गृहमेधिनाम् ।।४२।।

यथा पित्रोस्तथाऽन्येषामपि सैष यथोचितम् ।
कुर्वन् वाग्भिः क्रियाभिश्च, विनीतः ख्यातिमासदत् ।।४३।।

स देवे गुरुषु प्राप, मुख्यतां विनयस्पृशाम् ।
अग्नाविव रसश्चित्ते, क्रौर्यं नाऽस्य पदं दधौ ।।४४।।

ससर्पे वेश्मनीवाऽस्य, शमशालिनि चेतसि ।
कषाया न वसन्त्येव, स्वविनाशनभीरवः ॥४५॥

राजव्यापारसुव्यग्रे, ऋद्धिबन्धनिरन्तरे ।
गार्हस्थ्ये वर्तमानोऽपि, स तु धर्ममपालयत् ॥४६॥

उपाश्रये स साधूनां, वन्दनाय कदाऽप्यगात् ।
दृष्ट्वा चैकं मुनिं ग्लानं, श्रद्धाबन्धोद्धुरोऽवदत् ॥४७॥

मद्गृहेऽस्त्यौषधं सम्यग्, रोगस्याऽस्य निवर्त्तकम् ।
प्रासुकं चेति साधुभ्यामानाययत सत्वरम् ॥४८॥

इत्युदित्वा ययौ गेहे, साधुभ्यां सह मन्त्रिराट् ।
प्रविष्टोऽन्तर्गृहं सोऽथ, बहिः साधू तु तस्थतुः ॥४९॥

उपयन्तुं श्रेष्ठिकन्यां, तदा चाऽग्रेऽपि सूत्रितम् ।
आसीत्तदेव वीवाहदिनं तस्य गुणावहम् ॥५०॥

विनीतो व्याकुलस्तत्र, विसस्मार तदौषधम् ।
साधू विलम्ब्य किञ्चिच्चाऽऽजग्मतुः समुपाश्रयम् ॥५१॥

वीवाहोचितनेपथ्यमण्डनानि स कारयन् ।
लग्नक्षणस्य सम्प्राप्तौ, सस्मार च तदौषधम् ॥५२॥

कृत्वा तत्रोत्तरं किञ्चिदेकेन सुहृदा सह ।
स पश्चात्तापमादायौषधमुपाश्रयं ययौ ॥५३॥

मुनिर्ग्लानश्च रोगार्त्तोऽप्यौषधं नाऽन्यदादधौ ।
ततः कष्टमुपारूढो, निस्सहोऽभूदतीव हि ॥५४॥

तं तथा बाधितं साधुं, विनीतः प्रेक्ष्य सास्रदृक् ।
पपात पादयोस्तस्य, निन्दन्नात्मानमात्मना ॥५५॥

त्रिधा क्षमयतः साधुं, विनीतस्य महात्मनः ।
समलङ्कृतवीवाहोचितमण्डनशालिनः ॥५६॥

आत्मनः प्रणिधानेन, भावनातत्त्वमीयुषः ।
घातिकर्मक्षयाज्जातं, केवलज्ञानमुज्ज्वलम् ॥५७॥ [युग्मम्]

अप्रतिपातिना तेन, लोकं ज्ञानेन पश्यतः ।
चारित्रचिह्नमह्नायाऽऽर्पयदेतस्य देवता ॥५८॥

भवाऽम्भोधिशिलां नारीमपास्य संयमश्रियम् ।
उपयेमे विनीतोऽयं, तस्मिन् लग्नशुभक्षणे ॥५९॥

ततो या विनये बुद्धिर्मनुष्याणां समुज्ज्वला ।
इहाऽमुत्र च यत्प्रीतं, यावन्मोक्षं ददाति सा ॥६०॥

**इति विनये विनीतकथा ॥**

# दुर्विनये भोगराजकथा ।

प्रागात्मा विनये योज्यः, प्राप्यन्ते विनयाद्गुणाः ।
गुणेभ्यः सम्भवन्त्यर्थास्तेभ्यः पुण्यं ततः शिवम् ॥१॥

नाऽस्त्येव विनयो यस्य, स पुमान् कथमश्नुते ? ।
प्रभुत्वमानसम्पत्तिसुखानि भोगराजवत् ॥२॥

अस्ति स्वस्तिनिधानाऽऽख्यं, पुरं ख्यातं गुणर्द्धिभिः ।
जैनाऽऽयतनमालाभिः, पुरश्रीर्यत्र शोभते ॥३॥

यस्याऽतितीक्ष्णे निस्त्रिंशे, सपानीये लसन्त्यपि ।
छिन्ना मग्ना जयश्रीर्न, स तत्राऽस्ति नृपो जयः ॥४॥

तस्याऽस्ति सचिवो वाग्मी, नागादित्याऽभिधोऽस्य च ।
तत्पत्न्या नागदेव्याश्च, भोगराजः सुतोऽभवत् ॥५॥

घातदुर्वाक्यवस्त्वोघभञ्जनोच्छृङ्खलः स तु ।
न केवलं कुटुम्बं स्वं, परानप्युदवेजयत् ॥६॥

ततो विनयशिक्षायै, कलाऽऽचार्यस्य सोऽर्पितः ।
सचिवेन यतः पित्रा, शिक्षणीयाः सुता हठात् ॥७॥

पुरः समुपवेश्यैनमाचार्येऽर्थविचारिणि ।
भोगराजोऽन्यतः पश्यन्नहि शृणोत्यवज्ञया ॥८॥

मन्त्रिपुत्रत्वादाचार्यः, शक्तो वक्तुं न तं प्रति ।
शृणु चिन्तय वत्स ! त्वं, प्रोवाचेति मृदुं गिरम् ॥९॥

तथाऽपि बधिर इवाऽशृण्वन् पश्यति सोऽन्यतः ।
पुनः प्रोक्तः स गुरुणा, किमन्यतस्त्वमीक्षसे ? ॥१०॥

धृष्टो निर्भीरुवाचैष, गुरो ! पश्यामि कौतुकम् ।
पश्य छिद्रादतोऽखण्डश्रेणिभाजो हि कीटिकाः ॥११॥

किलैकतन्तुना बद्धा, इव यान्त्यन्यतो नहि ।
न विश्लिष्यन्ति किन्त्वेताः, कुर्वते स्वस्तिकाऽऽकृतिम् ॥१२॥

ततोऽल्पां क्रुधमाधाय, प्राहाऽमात्यसुतं गुरुः ।
कथयतोऽर्थसारं मे, वीक्ष्यस्व मुखसन्मुखम् ॥१३॥

ततः स एकया दृष्ट्या, वीक्ष्यमाणोऽपि तन्मुखम् ।
विज्ञातो गुरुणा ह्यन्यत्किमपि चिन्तयन्निति ॥१४॥

अरे ! किं चिन्तयस्यन्यत्, कथितं न शृणोषि किम् ? ।
इत्युक्तो गुरुणा प्राह, स्मित्वोच्चैः स स्फुटाऽक्षरम् ॥१५॥

युष्माकं वदतामासंस्ताडिता गलनाडिकाः ।
प्रत्येकं गणयन्नस्मि, कियत्यः सन्ति ता इति ॥१६॥

उपाध्यायस्ततः कोपादूचे वीक्षस्व मन्मुखम् ।
अवधारय चित्तेऽर्थं, मूर्ख ! मा दाद्दृशौ परे ॥१७॥

पश्यत्यभिमुखं शून्ये, तस्मिन् गुरुरुवाच तम् ।
किमरे ! वीक्षसे ? धत्से ?, किं चेतस्यथ सोऽवदत् ॥१८॥

प्रभो ! यदा भवन्तोऽर्थं, व्याचक्षते तदा मुखे ।
अतिव्यात्ते मया दृष्टा, दशना विषमोन्नताः ॥१९॥

ततो जानामि यद्येतान्, दशनानुन्नतान्नतान् ।
अनेनोपलखण्डेन, पातयामि निहत्य तान् ॥२०॥

ततश्च कुपितः प्राहोपाध्यायो याहि रे शठ ! ।
दुर्विनीत ! न मे कार्यं, त्वत्पाठाऽधिगतैर्धनैः ॥२१॥

कलापीवाऽब्दगर्ज्याऽथ, तद्वाचा प्रीणितो द्रुतम् ।
उत्थाय स गतो रन्तुं, परिपूर्णमनोरथः ॥२२॥

एवमुच्छृङ्खलः कांश्चिदाघ्नन् कैश्चिदथाऽऽहतः ।
दिनानि गमयन्नेष, दुष्टधीः प्राप यौवनम् ॥२३॥

दुर्विनीतत्वविख्यात, उद्वोढुं लभते नहि ।
स कन्यकां महेभ्यानां, सत्कीर्तिं महतीं न च ॥२४॥

न मातुर्न पितुर्नैव, देवस्य न गुरोर्न च ।
स्वजनस्य न मित्रस्य, वाचाऽपि विनयं व्यधात् ॥२५॥

ततो निर्वासितः पित्रा, काञ्चित् स्वीकृत्य योषितम् ।
अभिरम्यपुरे गत्वा, सिषेवे सैकतं नृपम् ॥२६॥

दुर्विनीताः सहासाश्च, वाच उच्चारयन्नसौ ।
नर्मपात्रं बभूवाऽस्य, सैकतस्य महीपतेः ॥२७॥

अन्यदा सैकतो राजा, विद्वद्गोष्ठीमुपागतः ।
श्रुत्वा प्रभावं मन्त्राणां, मन्त्रमेकमसाधयत् ॥२८॥

ततश्च चेटकः सिद्धो, यद्राजाऽऽह करोति तत् ।
सत्त्ववतां मनुष्याणां, किङ्करा देवयोनयः ॥२९॥

अवश्यमृद्धिमारूढः, पुमान् स्यादवलेपभाक् ।
इति वादिनि भूपाले, भोगराजोऽन्यदाऽब्रवीत् ॥३०॥

नित्यं त्वां सेवमानोऽहं, म्रिये स्वामिन् ! बुभुक्षया ।
तत्प्रसीद दृशं देहि, प्रसन्नां मयि भूपते ! ॥३१॥

ततश्च सैकतो राजा, मन्त्रप्रभावमीक्षितुम् ।
सत्यामृद्धौ मदोऽस्य स्यान्न वेत्यवेक्षितुं च सः ॥३२॥

लिखित्वा लेखं स्वेनैव, भोगराजाय सोऽक्षिपत् ।
ऊचे च यदयं लेखो, विन्ध्यस्योपत्यकातले ॥३३॥

पिण्डालनाम्नो न्यग्रोधवृक्षस्याऽधो भुवि स्थितः ।
वदेरुच्चैरयं लेखो, गृह्यतां नृपशासनात् ॥३४॥

यो ग्रहीष्यति लेखं स, दास्यते ते यथेप्सितम् ।
इत्युक्त्वा भूभृता स्वेन, भोगराजो व्यसृज्यत ॥३५॥

सोऽथ सह कलत्रेण, विन्ध्याऽद्रौ प्रययौ क्रमात् ।
यथाऽऽदिष्टं तथाऽपश्यत्प्रोच्चैर्न्यग्रोधपादपम् ॥३६॥

तस्याऽधस्तात् स्थितः प्रोचे, लेखोऽयं गृह्यतामिति ।
निःसृतौ च वटस्कन्धादग्रहस्तौ कृताऽञ्जली ॥३७॥

भोगराजेन लेखोऽथ, क्षिप्तस्तत्र कृताऽञ्जलौ ।
विभाव्य चेटको लेखस्याऽर्थं तिरोहितोऽवदत् ॥३८॥

स्वाऽभिप्रेतं वद क्षिप्रं, यथा सम्पादयाम्यहम् ।
एषोऽस्मि सैकतनृपाऽऽदेशस्य करणोद्यतः ॥३९॥

भोगराजस्ततो दध्यौ, राजादेशादयं मयि ।
प्रसन्नो दास्यते सर्वं, याचे राज्यं ततोऽत्र हि ॥४०॥

जगाद च विधेहि त्वं, मद्योग्यं पुरमुत्तमम् ।
साम्राज्यप्रक्रियां सर्वां, मां कारय प्रतापतः ॥४१॥

इत्युक्ते भोगराजेन, व्यधात् सोऽप्यखिलं क्षणात् ।
भोगराजस्ततः प्रेक्षाञ्चक्रे शक्रेण गर्वभाक् ॥४२॥

राजप्रासाददेवौकःसौधहट्टप्रतिष्ठिताम् ।
वापीकूपसरोवप्राऽऽरामरम्यश्रियं पुरीम् ॥४३॥

इतस्ततश्च लोकं च, स्वस्वव्यापारकारिणम् ।
उत्सवाऽऽनन्दसम्मोदिकामिनीजनजृम्भितम् ॥४४॥

हस्त्यश्वशालारम्ये च, निविष्टद्वारवेत्रिणि ।
सौधे स्वर्णमये पश्यत्यात्मानं प्रियया युतम् ॥४५॥

जय नन्द चिरं जीवेत्यादिवाक्यैः प्रसादयन् ।
राजलोको मन्त्रिमुख्यो, ददृशे स्वपुरोऽमुना ॥४६॥

चिररूढामिवाऽऽसाद्य, भोगराजो नृपश्रियम् ।
स्वाऽऽज्ञां विस्तारयामास, चक्रे राज्यं च विक्रमी ॥४७॥

प्रत्यहं येन कार्यं स्यात्तत्सर्वं चेटको व्यधात् ।
भोगराजस्य नैवाऽभूत्, केनाऽपि न्यूनता खलु ॥४८॥

कुर्वन् राज्यं स मत्तोऽभून्न शक्रमपि मन्यते ।
दुर्विनीतश्च राज्यं तत्, प्राप्तश्च को न माद्यति ? ॥४९॥

दुर्विनीताविनीताश्च, कष्टचेष्टाः स कारयन् ।
भोगराजो नृपो दुष्टश्चेटकं निरवेदयत् ॥५०॥

अथाऽन्यदा सैकतेनौष्ट्रिकैरेष तुरङ्गमान् ।
याचितः परीक्षाहेतोः, कथं स्मरति मां न वा ? ॥५१॥

कष्टात् कथञ्चनाऽऽसन्नोपकारं नृपतेः स्मरन् ।
तुरङ्गान् प्रेषयामास, सैकताय नृपाय सः ॥५२॥

दिनानां कियतामन्ते, पुनः स सैकतो नृपः ।
भोगराजादयाचिष्ट, भूयोऽश्वान् दूतपूरुषैः ॥५३॥

मत्तः कथमयं भूयो, भूयः प्रार्थयते हयान् ? ।
आधिक्यं मनुते स्वस्य, बलेन केन गर्वितः ? ॥५४॥

नैवाऽहमर्पयिष्यामि, तस्मै तुरङ्गमान्निजान् ।
कुर्याद्यद्रोचते तस्य, यदेषोऽस्मि स्थितोऽत्र भोः ! ॥५५॥

इति ब्रुवाणो मन्त्र्याद्यैर्भोगराजो व्यबोध्यत ।
सैकतक्ष्माभुजे चाऽश्वाः, कतिचित् प्रेषिताश्चिरात् ॥५६॥

तुरङ्गप्रेषणाऽऽमर्षं, दधानो मनसि स्वयम् ।
हतप्रतापमात्मानं, मन्यमानोऽवति प्रजाः ॥५७॥

ततो भूयोऽपि साराणि, वस्तूनि सैकतो नृपः ।
अयाचयद्भोगराजात्, स प्रहित्य बृहन्नरान् ॥५८॥

ततश्च कुपितो भोगराजोऽपि सैकतं प्रति ।
अभिषिषेणयिषुर्द्राग्, जयढक्कामवादयत् ॥५९॥

सर्वाभिसारसम्पूरप्रच्छादितमहीतलः ।
समुद्धूतरजःपुञ्जलुप्तादित्यकरोऽपि च ॥६०॥

अवनामितशेषाऽहिवपुर्नालफणादलः ।
दिग्गजानामपि क्षोभं, कुर्वाणो निरगात्पुरात् ॥६१॥ [युग्मम्]

प्राप्तश्च दलयन्नुर्वीमभिरम्य पुरीमसौ ।
ज्ञातं च सैकतेनैतद्भोगराजो यदेति हि ॥६२॥

उवाच मन्त्रिणं यद्भो !, मया प्रोक्तं तदा किल ।
नरः समृद्धिमारूढोऽप्याराध्यमवमन्यते ॥६३॥

भोगराजेन तत्सर्वं, पुरं यावदवेष्ट्यत ।
ततः सैकतराजेन, तमभिप्रेषितं दलम् ॥६४॥

रचयित्वा रणक्षेत्रं, मिथो योद्धुं कृताऽऽदरम् ।
तद्दलं द्वयमाटोपाद्यावत् सज्जमभूत्ततः ॥६५॥

स्वयं सैकतराजेन, समादिष्टः स चेटकः ।
यदेतद्भोगराजस्य, राज्यं द्रागुपसंहर ॥६६॥

ततश्च तत्तथा युद्धसंरब्धमुद्यताऽऽयुधम् ।
भोगराजस्य सैन्यं द्राग्, क्वाऽप्यगादिन्द्रजालवत् ॥६७॥

भोगराजस्ततः पूर्वसंवीतमलिनाऽम्बरः ।
विना स्वां दयितामन्यत्र पश्यत्येष किञ्चन ॥६८॥

किमेतदिति सम्भ्रान्तो, यावच्चिन्तामवाप सः ।
तावत्सैकतराजेनाऽऽहूतोऽगान्नृपसंसदम् ॥६९॥

प्रदत्ततालिकं राज्ञा, स प्रोच्चैर्जहसे यथा ।
तत्ते कुत्र गतं राज्यं, भोगराज ! क्षणादपि ? ॥७०॥

प्रहासाय जगादैष, राजन् ! सैन्यं मयाऽधुना ।
शक्रस्य दैत्यरुद्धस्य, साहाय्ये प्रेषितं द्रुतम् ॥७१॥

इत्यादिविटवाणीभिः, प्रमोदयन् स सैकतम् ।
दिनानि गमयामास, पुरुषार्थविरक्तधीः ॥७२॥

इति दुर्विनयात्प्राप, न चाऽयं पैतृकीं श्रियम् ।
न च राजप्रसादोत्थां, कार्यो दुर्विनयो न तत् ॥७३॥

**इति दुर्विनये भोगराजकथा ॥**

# दाने कामकेतुकथा ।

अस्मिन् संसारसङ्ग्रामे, चतुर्गतिचतुर्दले ।
मुख्यो मर्त्यत्वहस्त्येव, तस्मादुच्चः परो न यत् ॥१॥

एनमारुह्य जीवोऽयं, राजा कर्मरिपून् जयेत् ।
आरूढोऽन्यत्र सुप्रापः, स एतैः परिभूयते ॥२॥

सोऽपि शक्तः प्रजायेत, दानेनैव प्रतापवान् ।
दानप्रभावादाश्वेव, प्रोन्मूलयेद्द्रवाऽङ्घ्रिपान् ॥३॥

दुग्धेनेवाऽञ्जनं पात्रदानेन क्षालयेत्पुमान् ।
गृहव्यापारसम्पुष्यत्कल्मषं सुखलालसः ॥४॥

दानादासादयेद्वित्तं, दानादासादयेद्दिवम् ।
दानादासादयेन्मोक्षं, कामकेतुर्नरो यथा ॥५॥

अस्ति भारतक्षेत्रेऽस्मिन्नगरी कमलावती ।
सुपात्रदानव्यसनी, यत्र लोकः सदाऽपि हि ॥६॥

तत्राऽऽस्ते क्षत्रियाऽधीशः, कामकेतुर्गुणोन्नतः ।
सा कला नाऽस्ति नाऽऽश्लिक्षद्या गुणैः सुभगं हि तम् ॥७॥

तस्याऽऽसीच्चन्द्रकान्ताऽऽख्या, भार्याऽपत्यविवर्जिता ।
ततश्च स्वजनैर्भूयः, स परिणायितस्ततः ॥८॥

वीवाहवासरे साऽथ, नवोढा चारुलोचना ।
दारुघाटं गरुत्मन्तं, कौतुकादारुरोह च ॥९॥

चापलात्कीलिकायन्त्र, व्यश्लेषयन्मृगेक्षणा ।
स वायुसङ्ग्रहात्काष्ठताक्ष्यो व्योम्नोदडीयत ॥१०॥

तत्राऽऽरूढा नवोढा सा, बाढं गाढकृतग्रहा ।
मनोवेगेन ताक्ष्र्येणोत्पपाताऽऽकाशमण्डले ॥११॥

ततश्च पूच्चक्रे कैश्चिद्धुञ्ज्ञानैरस्फुटस्वरैः ।
ताम्बूलपूर्णवक्त्रत्वाज्जघ्ने कैश्चिदुरोऽस्वरम् ॥१२॥

उपविश्य समुत्तस्थे, कैश्चित्त्वकृतभोजनैः ।
उच्छिष्टवदनैः कैश्चिदलब्धाभ्युक्षणैर्गतम् ॥१३॥

गृहीत्वा पूर्णपात्राणि, कैश्चिद्यातं पुनर्गृहे ।
त्यक्त्वा मङ्गलगीतानि, चक्रुर्नार्योऽनुदेवितम् ॥१४॥

असम्पूर्णनृत्तसुखाः, काश्चित्पेतुर्भुवि भ्रमात् ।
दुःखेन क्षुधया चाऽपि, मुमूर्च्छुः काश्चिदाकुलाः ॥१५॥

लोके शोकाऽऽकुले काश्चित्, स्वेच्छया बुभुजुः स्वयम् ।
नवोढापितृवर्गश्च, शुशोच च रुरोद च ॥१६॥

कामकेतुकलत्रं चाऽग्रेतनं मुमुदे हृदि ।
कामकेतुरथैकाकी, शोकवान् स्वगृहं ययौ ॥१७॥

अशक्तः प्रत्याहरणे, नवोढाया बभूव सः ।
वीवाहवासरः शोकसाम्राज्येनाऽपहस्तितः ॥१८॥

यतः— संसारेऽस्मिन्नसारे हि, पदार्थाः क्षणलम्भिनः ।
लोहकृद्भस्त्रिकेव स्युः, पूर्णा रिक्ताश्च तत्क्षणात् ॥१९॥

प्रददात्युत्सवे शोकं, शोके सम्मदसम्पदम् ।
अन्यथा विदधत्सर्वं, बलीयः कर्म केवलम् ॥२०॥

ततः पितृभ्यां सर्वत्र, नवोढा काञ्चनप्रभा ।
गवेषिताऽपि न क्वाऽपि, प्रादृश्यत गवेषकैः ॥२१॥

तां गवेषयितुं कामकेतुः स्वयं चचाल सः ।
अकारयच्च पाथेयं, चन्द्रकान्तां प्रभण्य तु ॥२२॥

चन्द्रकान्ताऽथ दध्यौ चाऽऽनेष्यते काञ्चनप्रभाम् ।
ततः करोमि तद्येन, तां नाऽऽनयति नैत्ययम् ॥२३॥

कृत्वा पाथेयमेषाऽथ, बद्ध्वा ग्रन्थिषु सप्तसु ।
अर्पयामास कान्ताय, तदादाय चचाल सः ॥२४॥

यस्यां दिशि स तार्क्ष्योऽगात्, प्रतस्थे सोऽपि तां प्रति ।
अर्द्धमार्गे च मिलितः, सार्थस्तस्य महानथ ॥२५॥

गच्छंस्तेन सहैषोऽपि, प्राप किञ्चित्सरोवरम् ।
सार्थः प्रववृते भोक्तुं, स्वस्वपाथेयमादरात् ॥२६॥

कामकेतुस्ततो वस्त्रप्रथमग्रन्थिशम्बलम् ।
उद्ग्रथ्य बुभुजे सर्वं, तत्प्रभावादसौ ततः ॥२७॥

बभूव त्रिफणः सर्पः, करालो यमखड्गवत् ।
दृष्ट्वा फूत्कारिणं तं हि, नेशुः सर्वे जना भयात् ॥२८॥

दूरीभूय ततस्तैश्च, हन्यते लेष्टुभिर्दृढम् ।
स सर्पश्च प्रहाराऽऽर्त्तो, न शक्तो नष्टुमन्यतः ॥२९॥

पाथेयवस्त्रग्रन्थीनामधस्तात्तस्थिवानहिः ।
एकेन केनचित् पुंसा, मुक्तो लेष्टुः परिस्फुरन् ॥३०॥

द्वितीयग्रन्थेरुपरि, सङ्घातेन पपात च ।
ग्रन्थिः पुस्फोट तन्मध्यत्, पाथेयं विशरार्वभूत् ॥३१॥

दैवाच्च तस्य सर्पस्य, पाथेयं प्राविशन्मुखे ।
बभूव तत्प्रभावेण, कामकेतुः स्वरूपभृत् ॥३२॥

अहो ! मे चन्द्रकान्तायाः, कियच्छक्तिविजृम्भितम् ? ।
तया मे मारणोपायश्चक्रेऽयं विहितेर्ष्यया ॥३३॥

पक्षविपक्षभावेन, ग्रन्थौ ग्रन्थौ पृथक् पृथक् ।
समस्त्यत्रौषधं रूपपरावर्त्तस्वरूपकृत् ॥३४॥

इति चित्रीयमाणोऽन्तः, कामकेतुः स्वरूपभृत् ।
किमेतदिति पृष्टस्तैर्बिभ्यद्भिः सार्थपुरुषैः ॥३५॥

उवाच कामकेतुश्च, तेषां चित्राय सादरम् ।
अहं बहुप्रभावोऽस्मि, योगी सर्वत्र गामुकः ॥३६॥

दत्तघाताऽपराधित्वाद्बिभ्यद्भिस्तैर्मनस्यथ ।
त्यक्तो रात्रौ स सुप्तोऽपि, तत्प्रभावं विचिन्त्य हि ॥३७॥

गते सार्थे प्रभातेऽसौ, समुत्थाय व्यचिन्तयत् ।
मद्वाचा शङ्कितः सार्थस्त्यक्त्वा मां क्वचिदप्यगात् ॥३८॥

तत्सर्वग्रन्थिपाथेयमास्वाद्याल्पाल्पमात्मना ।
वीक्ष्ये प्रभावं किं किं स्यादमीभिश्चित्रमद्भुतम् ? ॥३९॥

इति ध्यात्वा पृथग् ग्रन्थिपाथेयं विततान सः ।
जघास तृतीयग्रन्थेः, शम्बलं कवलैस्ततः ॥४०॥

कामकेतुरभूदोतुरूपस्तच्छब्दकृद्भृशम् ।
ततश्चैतन्यवानादत्तुर्यग्रन्थिस्थशम्बलम् ॥४१॥

भूयः स्वरूपभृज्जज्ञे, पुनः पञ्चमशम्बले ।
भक्षिते सोऽभवत्सिंहस्ततः षष्ठौषधेऽथ सः ॥४२॥

जातः स्वरूपतः शीघ्रमेवं च रसवानसौ ।
अनवेक्ष्याऽऽयतिं मूढो, लिलेह सप्तमौषधम् ॥४३॥

बभूव च मृगो रम्यस्ततोऽसौ पूर्ववद्व्यधात् ।
सर्वौषधानामास्वादं, स्वरूपप्रतिपित्सया ॥४४॥

नाऽभूत् स्वरूपभृत्तस्य, निवर्त्तनौषधं विना ।
दु:खेनोत्फालवान् व्योमोत्पपाताऽध: पपात च ॥४५॥

चिन्तयामास चित्ते स्वे, मृगो दैवहत: स तु ।
धिग् धिग् कर्मपरीणाम:, संवृत्त: कीदृगत्र मे ? ॥४६॥

मद्दुष्कर्मप्रभावेण, नवोढा सा गरुत्मता ।
कुत्राऽपि हृत्वा नीतैव, किं जीवति ? मृताऽथ वा ? ॥४७॥

तस्या: प्रवृत्तिमानेतुं, चलिते मयि मत्सरात् ।
चन्द्रकान्ता कुलीनाऽपि, कूटमौषधजं व्यधात् ॥४८॥

मानुषत्वादहं भ्रष्टो, दुष्टकर्मा करोमि किम् ? ।
पशुत्वात् पशुमृत्युर्मे, दत्तो दैवेन कुप्यता ॥४९॥

यत:– अस्ति बुद्धि: परेषां हि, कोपव्यावर्त्तने क्वचित् ।
शक्रोऽपि कुपितं कर्म, नैव सान्त्वयितुं पटु: ॥५०॥

इति चिन्ताऽऽतुरो यावदास्ते स स्तम्भितो नु किम् ? ।
तावद्व्याध: कृताऽबाधो, विव्याधागत्य तं शरै: ॥५१॥

लग्नात् प्रहाराद्व्यथितोऽप्यातङ्कजनितत्वर: ।
स काञ्चिद्दिशमुद्दिश्य, ननाश फालवान् मृग: ॥५२॥

ययौ च पर्वते क्वाऽपि, भ्रान्तदृक् खिन्नमानस: ।
पपौ च स पयो नाऽऽदत्, क्षुधितोऽपि तृणानि तु ॥५३॥

इतश्च काष्ठताक्ष्योऽसौ, निम्नेन नभसा व्रजन् ।
अभ्रंलिहमहाकूटे, तस्मिन्नेव नगे क्वचित् ॥५४॥

आस्फ[स्फा]ल्य भग्न: परितो, नवोढा पतिताऽथ सा ।
सर्वाङ्गीणव्यथाजातमूर्च्छाऽस्थादवनौ क्षणम् ॥५५॥

मूर्च्छाऽन्ते सा समुत्थाय, विललाप भयाऽकुला ।
हा ! मातर्हा ! पित: ! क्वाऽहं, दैवेन निहिता क्षणात् ? ॥५६॥

पूर्वे जन्मनि किं कोऽपि, मयाऽप्यपहृतो भवेत् ? ।
यद्वद्धकङ्कणा जातवीवाहाऽपहृताऽस्मि हा ! ॥५७॥

भूयश्च कुत्र मे भावी, संयोगः पितृभिर्निजैः ? ।
हा ! मन्दभागिनी क्वाऽहं, तिष्ठामि च व्रजामि च ? ॥५८॥

तारस्वरं विलप्येति, स्वयं सम्बोधभागसौ ।
बभ्राम परितः कन्दफलमूलकृताऽशना ॥५९॥

ददर्श साऽन्यदा क्वाऽपि, कुञ्जे नाभेयमन्दिरम् ।
भक्त्या ननाम तद्बिम्बमानर्च च सुचेतसा ॥६०॥

अवचित्याऽवचित्याऽथ, पुष्पाणि सुरभीणि सा ।
चकाराऽऽदिजिनेन्द्रस्य, पूजां वैचित्र्यशालिनीम् ॥६१॥

प्रभोः पूजादिशुश्रूषाव्याकुला काञ्चनप्रभा ।
विसस्मार पितुर्मातुः, कुटुम्बस्य च सौहृदम् ॥६२॥

एवं पुण्याऽर्जनात् क्षीणाऽन्तरायकर्मबन्धना ।
कदाऽपि सा ययौ बाला, ह्रदमेकं हि पाथसे ॥६३॥

मृगः सोऽपि ह्रदे तत्र, दक्षिणेर्मा पुरागतः ।
ददर्श तां मृगदृशं, समुपालक्षयत्ततः ॥६४॥

सम्यग् साऽभिनवोढेयं, प्रिया मे काञ्चनप्रभा ।
वीवाहोचितवेषोऽस्या, यत्सा एव हि दृश्यते ॥६५॥

प्रहारवेदनाक्रान्तः, स शनैस्तामुपाययौ ।
भूयो भूयोऽप्यपश्यच्च, प्रेम्णा तां परितो भ्रमन् ॥६६॥

साऽपि तस्य प्रहाराऽर्तिं, दृष्ट्वाऽनुकम्पया जलैः ।
प्रक्षाल्य व्रणरोहिण्या, दिव्यौषध्या लिलेप तम् ॥६७॥

गृहीत्वाऽम्बु चचालैषा, श्रीजैनायतनं प्रति ।
मूलादपि मृगस्याऽस्य, तत्स्वरूपमजानती ॥६८॥

जानात्येव मृगः सर्वं, किन्त्वसौ वक्तुमक्षमः ।
शनैः खञ्जगतिः श्वासभृतस्तामन्वगान्मुदा ॥६९॥

गत्वा चैत्ये प्रभोश्चक्रे, सा स्नात्रं विमलाऽम्भसा ।
राजचम्पकपुष्पाऽऽद्यैः, पूजां वस्त्राऽऽवृताऽऽनना ॥७०॥

मृगोऽपि प्रभुमालोक्य, हर्षाऽश्रुपूर्णलोचनः ।
मूर्ध्ना ननाम भूपीठाऽऽसङ्गलग्नरजोजुषा ॥७१॥

स्वामिप्रणामजातेन, पक्षपातेन सा हृदि ।
मृगं व्यावर्णयामास, शुभात्मा तिर्यगप्यसौ ॥७२॥

प्राप्ते काले फलाहारं, कर्त्तुं साऽगाल्लतागृहम् ।
शनैर्मृगोऽपि तत्राऽगात्परित्यक्ततृणाऽशनः ॥७३॥

वराकोऽयं व्यथाक्रान्तो, गृह्णात्याहारमद्य न ।
इति सा तद्व्रणे दिव्यौषधीप्रलेपमादधौ ॥७४॥

तत्प्रभावाद्व्रणं रूढं, न्यवर्तिष्ट तथा व्यथा ।
मृगः सज्जोऽपि नैवाऽत्ति, कत्तृणान्यभिमानतः ॥७५॥

ततः सा चिन्तयामास, किमेष न चरत्यहो !? ।
किमत्र कारणं ज्ञेयं ?, वराको म्रियते क्षुधा ॥७६॥

शाड्वलानि समानीय, सा तृणानि ददौ स्वयम् ।
दृष्ट्याऽपि न मृगोऽपश्यत्पशुभक्ष्याणि तान्यथ ॥७७॥

पूजयित्वा प्रभुं भोक्ष्येऽत्रस्थेत्यभिग्रहग्रहा ।
पुष्पाण्याहर्तुमारोहत्, साऽन्यदा दूरपर्वतम् ॥७८॥

व्याघुट्य सा समायान्ती, मार्गाद्भीनाऽभ्रमच्चिरम् ।
मौलं न प्राप सा मार्गं, जिनवाक्यमभव्यवत् ॥७९॥

सा फलेग्रहिवृक्षेषु, फलानि प्राप्नुवत्यपि ।
अभिग्रहं स्मरन्ती च, क्षुधिताऽपि जघास न ॥८०॥

सुष्वाप क्वाऽपि सा रात्रौ, ध्यायन्ती प्रभुमेव हि ।
स्वप्नेऽपि स्वामिनः पूजां, कुर्वाणां स्वां ददर्श सा ॥८१॥

विभातायां विभावर्यां, पश्यन्ती चेतसा प्रभुम् ।
स्वामिचैत्यदिशे [शं] चक्रे, नमस्कारमुदारधीः ॥८२॥

निरीक्ष्यमाणा भूयोऽपि, बभ्राम परितो नगम् ।
तच्चैत्यमार्गं नाऽपश्यद्वासरैः पञ्चषैरपि ॥८३॥

सा न भुङ्क्ते न वा शेते, स्वामिपूजावियोगभाक् ।
किन्त्वात्मानं निनिन्दोच्चैरुदिताऽशुभकर्मकम् ॥८४॥

आत्मा मे हतकः प्राप, वियोगं पितृमातृभिः ।
तद्दुःखं विस्मृतमभूदादिनाथस्य दर्शनात् ॥८५॥

अपुण्यात्तदपीदानीं, दूरेऽभूत्स्वामिदर्शनम् ।
दुष्प्रापं न मया प्राप्यं, सत्पुण्यं स्वामिपूजनात् ॥८६॥

इत्यात्मगर्हाग्रहिला, महिला सा ददर्श च ।
विद्याधरविमानानि, पृथ्वीमवतरन्त्यथ ॥८७॥

ततस्तां दिशमुद्दिश्य, सा ययौ त्वरितक्रमा ।
ददर्श ज्ञानिनं तत्र, विद्याधरनमस्कृतम् ॥८८॥

तं मुनिं वीक्ष्य सा हृष्टा, प्रणनाम शुभाशया ।
पीयूषवर्षिणीं तस्य, देशनामशृणोदिति ॥८९॥

गन्धचूर्णं प्रभोर्मूर्ध्नि, क्षिपतां श्रीर्वशीभवेत् ।
धूपधूमं प्रभोः कर्त्तुर्दुष्कर्मदृग् गलत्यहो ! ॥९०॥

ढौक्यन्ते स्वामिनोऽखण्डाऽक्षताः स्वात्माऽक्षतो भवेत् ।
पूज्यते कुसुमैः स्वामी, कर्त्रा च ख्यातिराप्यते ॥९१॥

जिनाऽग्रे क्रियते दीपो, मूलात्कर्त्तुस्तमो व्रजेत् ।
कृते जिनस्य नैवेद्ये, कर्त्ताऽऽहारसुखं भजेत् ॥९२॥

पुरोऽर्हतः फले दत्ते, कर्त्ता स्याद्बोधिबीजभाक् ।
जिनस्य ढौकिते नीरे, कर्त्तुस्तृष्णा प्रयात्यहो ! ॥९३॥
एवमष्टविधां पूजां, यः कुर्यादर्हतां सदा ।
कर्माण्यष्टाऽपि तस्याऽऽशु, विलीयन्ते न संशयः ॥९४॥
इतश्च स मृगोऽप्येनां, वीक्ष्यमाणोऽभितो नगम् ।
दैवादागाद्गिरौ तत्र, यत्राऽस्ति तत्प्रियाऽथ सा ॥९५॥
आयान्तं वीक्ष्य सा मुग्धा, किञ्चिन्ममत्वभावतः ।
कथमत्राऽऽगतोऽसि त्वमिति वागालिलिङ्ग तम् ॥९६॥
अथ ज्ञानी स्मितं चक्रे, कोऽपि विद्याधरस्ततः ।
पप्रच्छ तं मुनिं हासकारणं प्राह तन्मुनिः ॥९७॥
इयमस्य मृगस्याऽहो !, कलत्रं काञ्चनप्रभा ।
वीवाहदिवसेऽप्येषा, वियुक्ताऽनेन बालिका ॥९८॥
मानुषीयं मृगस्त्वेष, वीवाहः कथमेतयोः ? ।
इति विद्याधरेणोक्ते, तद्वृत्तान्तं जगौ मुनिः ॥९९॥
विद्याधरोऽथ कृत्वाऽन्तःकृपां तं हरिणं ततः ।
यथास्थिताऽऽकृतिं चक्रे, कामकेतुं स्वशक्तितः ॥१००॥
साऽथ वीक्ष्य निजं कान्तमाश्लिष्टं स्वेन वक्षसा ।
किमेतदिति सम्भ्रान्ता, लज्जासङ्कुचिताऽभवत् ॥१०१॥
कामकेतुः समीक्ष्य स्वं, यथारूपं प्रियां च ताम् ।
हृष्टो ननाम तं साधुं, शुश्रावेति मुनेर्गिरः ॥१०२॥
दानशीलतपोभावभेदाद्धर्मश्चतुर्विधः ।
इहाऽमुत्र सुखाऽऽकाङ्क्षाकारिभिः कार्य एव सः ॥१०३॥
गृहव्यापारभारेण, मज्जत्येव भवाऽम्बुधौ ।
तपःसंयमपात्रेषु, दद्याद्दानं गृही न चेत् ॥१०४॥
तत्र दानं भयादत्रोपरोधाद्भावतोऽथवा ।
पात्रे पुण्याय दत्तं स्यात्, सोमादीनामिव ध्रुवम् ॥१०५॥

# भयदाने सोमकथा ।

अस्ति चम्पापुरी कर्मकरीवाऽस्याः किलाऽलका ।
धर्मकर्मप्रभावाऽऽप्तसमृद्ध्याऽत्यमरावती ॥१॥

अयं कामो न्वयं कामः, सन्देहादिति ते पृथक् ।
यं स्मरं च रतिप्रीति, श्रित्वा सापत्न्यमौज्झताम् ॥२॥

स तत्राऽस्ति नृपो वैरिसमुद्राऽगस्तिराख्यया ।
मीनकेतुरिति स्फीतो, नीत्यैव पाति च प्रजाः ॥३॥

तत्राऽस्ति वणिजां मुख्यो, रविर्ज्योतिष्मतामिव ।
नाम्ना धन इति श्रेष्ठी, पत्नी तस्याऽस्ति सुन्दरी ॥४॥

अभूत्पुत्रस्तयोः सोमः, कामवत् केशवश्रियोः ।
रेखां स प्राप वाणिज्ये, धनुर्वेद इवाऽर्जुनः ॥५॥

अन्येद्युः स ययौ कस्मिन्नापणे क्रयहेतवे ।
विक्रेयं वस्तु नाऽद्राक्षीत्तत्राऽसौ किन्तु किञ्चन ॥६॥

सेव्यमानं वणिकपुत्रैर्बुद्धये विनयाऽन्वितैः ।
हेमसिंहासनासीनमपश्यच्छ्रेष्ठिनं तु सः ॥७॥

ततश्च कौतुकाद्गत्वा, श्रेष्ठिनस्तस्य सन्निधौ ।
अपृच्छत्तमिति श्रेष्ठिन्नत्राऽट्टे लभ्यते किमु ? ॥८॥

तेनोक्तः श्रेष्ठ्यपि प्राह, वत्स ! स्वच्छमते ! शृणु ।
तदत्र लभ्यते यद्भो !, अन्यत्र श्रूयतेऽपि न ॥९॥

कृतादरः पुनः सोमो, विनयादन्वयुङ्क्त तम् ।
तात ! तद्वस्तु किं यत्तु, नाऽन्यत्र श्रूयतेऽपि हि ? ॥१०॥

ग्रहीताऽयमिति ज्ञात्वाऽचकथत् वणिजांवरः ।
अमूल्या लभ्यते बुद्धिः, कीर्त्तिवद्गत्वरैर्धनैः ॥११॥

ततश्चोवाच सोमोऽपि, तात ! गृह्णीत मे धनम् ।
मह्यं दत्तां च तां बुद्धिं, याऽपायोच्छेदशक्तिका ॥१२॥

शतान्यादाय पञ्चाऽथ, द्रम्माणां स ददौ धियम् ।
द्वयोस्तृतीयो मा भूस्त्वं, कलिं कुर्वाणयोरिति ॥१३॥

बुद्धिं श्रियमिवाऽऽदाय, निजं धाम जगाम सः ।
गत्वा चाऽकथयत् पित्रे, बुद्धिग्रहणकारणम् ॥१४॥

तच्छ्रुत्वाऽथ धनः कोपकम्पमानाऽधरोऽब्रवीत् ।
अरे ! मूर्खाऽग्रहीर्वित्तैर्बालवित्तामिमां मतिम् ॥१५॥

चल चलाऽग्रतो मङ्क्षु, तं मे दर्शय नैगमम् ।
क्वाऽऽस्ते स वञ्चितो नष्ट, येन त्वं पश्यतोहृता ॥१६॥

इत्युक्त्वाऽऽशु धनः सार्द्धं, सोमेन श्रेष्ठिसन्निधौ ।
गत्वा कृत्वा च भ्रूभङ्गमुच्चावचमुवाच तम् ॥१७॥

हुं हुं बुद्ध्याऽनया पूर्णं, सर्वलोकप्रसिद्धया ।
गृहाणैनां यथावस्थां, द्रम्मानस्माकमर्पय ॥१८॥

अथोचे श्रेष्ठ्यपि प्रेक्षा, दत्ता दत्ताऽपि नो मया ।
किन्तु नैषा प्रयोक्तव्येत्याऽऽज्ञाप्य धनमार्पयत् ॥१९॥

गृहीत्वा श्रेष्ठिनो द्रव्यं, मांसं व्याघ्रमुखादिव ।
मा भूयोऽपीति पुत्रं स्वं, शिक्षयन् स धनो ययौ ॥२०॥

अन्यदाऽट्टं व्रजन् सोमो, युध्यमानौ पदातिकौ ।
दृष्ट्वा तत्रैव सोऽतिष्ठद्राजाज्ञाभङ्गभीतितः ॥२१॥

विना सोमं जनो नाऽन्यः, समीपमगमत्तयोः ।
ग्रीष्मोष्मदुस्सहं वह्निं, को वाऽऽलिङ्गितुमिच्छति ? ॥२२॥

ततस्तण्डाधिपो वीक्ष्य, तौ निघ्नन्तौ परस्परम् ।
निनाय मन्त्रिणः पार्श्वे, सूनायामिव बोत्कटौ ॥२३॥

अथ तौ मन्त्र्यपि प्रेक्ष्य, भ्रकुटीभङ्गभीषणः ।
किमर्थं युवयोः पत्ती !, कलहोऽत्राऽब्रवीदिति ? ॥२४॥

इत्युक्ते मन्त्रिणा तेन, प्राहैको विहिताऽञ्जलिः ।
विना कार्यमिषादेषोऽहन्मां गच्छन्तमध्वनि ॥२५॥

अथोचेऽन्योऽपि नो मन्त्रिन् !, प्रागेनमहमाहनम् ।
किन्तु मामयमित्यर्थे, साक्षी सोमो वणिक्सुतः ॥२६॥

एताभ्यामिति विज्ञप्ते, मन्त्री न्यायपरीक्षकः ।
सोमस्याऽऽकारणायाऽथ, प्राहिणोत् स्वपदातिकान् ॥२७॥

यमदूतानिव प्रेक्ष्याऽऽगच्छतस्तान् गृहानभि ।
सोमोऽप्यकथयत् पित्रे, वृत्तान्तं कलहस्य तम् ॥२८॥

तच्छ्रुत्वाऽथ धनस्तस्मिन्, गताऽन्योपायविह्वलः ।
तमेव श्रेष्ठिनं गत्वाऽपृच्छद्वित्तैः स तद्धियम् ॥२९॥

द्रव्यमादाय स श्रेष्ठी, प्राह गत्वा सुतं कुरु ।
ग्रहिलमिति स श्रुत्वा, गृहं गत्वाऽवदत् सुतम् ॥३०॥

द्राग् मुञ्चाऽधस्तनं वासः, स्वकेशान् मुत्कलीकुरु ।
ऊर्ध्वबाहुस्तथा नृत्यन्, भङ्क्ष्वैतान् कलशानपि ॥३१॥

इत्थं कृत्रिमग्राहिल्यं, स्वस्य स्वीकृत्य सत्वरम् ।
उद्दण्डं दण्डमुद्यम्य, धाव धाव च मामनु ॥३२॥ [युग्मम्]

ततः पितृवचः सोमः, प्रतिपद्य यथोदितम् ।
भूतग्रस्त इवोत्थायाऽधावीदाशु धनं प्रति ॥३३॥

अग्रतो नश्यता पित्रा, प्रोचिरे ते पदातयः ।
भो ! भोस्त्रायध्वमस्मान्मां, भूतग्रस्तात्प्रणिघ्नतः ॥३४॥

दृष्ट्वा सोमं तथाभूतं, स्मित्वोचुस्ते परस्परम् ।
एनं ग्रहिलमानेतुमस्मान्मन्त्री समादिशत् ॥३५॥

स्याद्याद्दक्ताद्दग्वाऽस्माभिर्नेयोऽयं मन्त्रिसन्निधौ ।
इति विचिन्त्य पादातैर्धृत्वाऽसावग्रतः कृतः ॥३६॥

परिष्वज्य जनान् नृत्यन्, क्षिपन् धूलीरितस्ततः ।
बलादानीय सोमस्तैः, सचिवाय समर्पितः ॥३७॥

मन्त्र्यपि प्रेक्ष्य तच्चेष्टां, ग्राहिल्यात् हास्यदायिनीम् ।
व्यसृजत्तं तथायोग्यं, न्यायं कृत्वेतरावपि ॥३८॥

अथ प्राप्य छलं सोमो, दोषेणाऽग्राहि सत्यतः ।
तत्प्रभावादसौ चेष्टां, विचित्रामकरोदिति ॥३९॥

कदाचिद्व्रजते नाग्न्यं, नेपथ्यं च कदाचन ।
कदाचिद्भाषते शून्यं, प्रशस्तं च कदाचन ॥४०॥

तं तथा च धनो दृष्ट्वा, शोकशङ्कुसमाकुलः ।
दध्यावित्यभवत् सत्यं, लभ्ययोग्याद्दणेऽपतत् ॥४१॥

उपयाचितं देवानां, मानयामास सुन्दरी ।
विना पुत्रं स्त्रियः प्रायः, प्राप्नुवन्ति पराभवम् ॥४२॥

यक्षाद्यैरप्यनिवर्त्त्ये, दोषे पुत्रस्य पुष्यति ।
पीडं पीडमुरः प्रोच्चैः, सुन्दरी विललाप सा ॥४३॥

अथाऽनुगेहं पर्यटन्, मूर्त्तो धर्म इव व्रती ।
तस्य पुण्यैरिवाऽऽकृष्टो, भिक्षार्थं तद्गृहं ययौ ॥४४॥

तन्मुनेर्दर्शनाद्दोषो, न्यवर्तिष्ट च किञ्चन ।
यथाऽरुणोदये ध्वान्तं, पाप्मेवाऽज्ञानकष्टतः ॥४५॥

प्रभावं तं मुनेर्दृष्ट्वाऽऽसनादुत्थाय सम्भ्रमात् ।
ववन्दे सुन्दरी साधुं, हृष्टा सोमं जगाद च ॥४६॥

वत्स ! गच्छान्तिकं साधोर्दानं यच्छ यदृच्छया ।
मूलाद्गच्छेद्यथा दोषो, दानान्मन्त्राद्विषं यथा ॥४७॥

अवज्ञाते वचस्यस्मिंस्तेनाऽथ कुपिताऽऽह सा ।
नाऽस्मै दास्यसि चेद्दानं, दोषस्त्वां तद् ग्रहीष्यति ॥४८॥

इत्थं स भीषितो मात्रा, ददौ दानं च साधवे ।
अगाच्च मूलतो दोषोऽहो ! प्रभावस्तपस्विनाम् ॥४९॥

सच्छायो दोषमुक्तोऽभूदभ्रमुक्तो यथा रविः ।
दानप्रभावतः सोमः, पूर्ववत्सुखमेधते ॥५०॥

इत्थं भियाऽपि दत्तं दानं सोमस्य सौख्यदं श्रुत्वा ।
दद्यात् सदैव दानं नाशो नैवाऽस्ति दत्तस्य ॥५१॥

**इति भयदाने सोमकथा ।**

# उपरोधदाने सुन्दरकथा

अस्त्युज्जयिनी जयिनी, नानाऋद्ध्याऽलकापुरः ।
धर्मकामाऽर्थमोक्षाणां, भूर्वेदानां विधिर्यथा ॥१॥

भानुर्व्योम्नीव सत्तेजा, राजा तत्राऽस्ति विक्रमः ।
यस्योदये द्विषद्धूका, जग्मुर्भूधरकन्दराः ॥२॥

तत्र चाऽऽढ्यवरो मिथ्यादृष्टिः श्रेष्ठ्यस्ति सुन्दरः ।
यशोमतीति तद्भार्या, तत्पुत्रः प्रियवर्द्धनः ॥३॥

वर्षाऽऽरम्भे तरङ्गिण्याः, पूरे इव गते धने ।
अन्येद्युश्चिन्तयामास, खिन्नश्चेतसि सुन्दरः ॥४॥

प्राप्तगतेभ्यो द्रव्येभ्यस्तेषामप्रापणिर्वरम् ।
तद्गर्वाद्याचनं यत्तत्, कर्माऽपि कुरुते न यत् ॥५॥

न च मे वेश्मनि द्रव्यं, येन स्याद्भोजनाऽऽदिकम् ।
कुटुम्बे च लघुः सार्थः, का गतिर्धिग् दरिद्रताम् ॥६॥

किञ्चाऽत्र भूरि स्वजने, विनाऽर्थैः स्युः पराभवाः ।
यामो देशान्तरं किञ्चिद्ध्यात्वैवं प्रचचाल सः ॥७॥

मार्गोचितपाथेयस्य, सकुटुम्बस्य गच्छतः ।
अध्वन्यल्पजनस्तस्य, सार्थः कश्चिदथाऽमिलत् ॥८॥

अथाऽन्यदा द्विप्रहरे, दिने सार्थेन तेन च ।
सरस्यां भोजनायोपक्रान्ते कोऽप्यब्रवीदिदम् ॥९॥

भो ! भोश्चाषः शुभः सोऽयमिदं च दृश्यते शुभम् ।
उद्यानादेति यत्साधुर्भिक्षार्थं कुत्रचिद् व्रजन् ॥१०॥

अथाऽऽयाते मुनौ धन्यम्मन्यास्ते सार्थिनो जनाः ।
उत्थायोत्थाय नत्वाऽस्मै, भिक्षां स्वस्वेच्छया ददुः ॥११॥

सुन्दरः सोऽपि मिथ्यादृगप्येषामुपरोधतः ।
विनाऽपि भावनां किञ्चिद्ददौ भिक्षां तपस्विने ॥१२॥

साधौ गतेऽथ ते सर्वे, भुक्त्वा स्वस्थानमभ्यगुः ।
सकुटुम्बः सुन्दरस्तु, नगरान्तरमागमत् ॥१३॥

अथ तत्र गतस्याऽस्याऽपरिचितोऽप्यभूज्जनः ।
सौदर्य इव किं वा नो, भवेद्दानप्रभावतः ॥१४॥

तेनाऽथ मण्डिते हट्टे, वणिजामापणाः परे ।
व्यवहारैः सञ्चुकुचुः, पद्मानीव विधूदये ॥१५॥

अन्येद्युरापणाद्गेहं, सुन्दरस्याऽऽगतस्य तु ।
हिमैर्वल्लीव विच्छाया, यशोमती ह्यचीकथत् ॥१६॥

श्रेष्ठिन् ! येन क्रमाऽऽयातभक्तेनेव पदातिना ।
नाऽध्वन्यमोचि त्वत्पार्श्वं, यश्च प्राणसमो मम ॥१७॥

कृतज्ञो मौक्तिको नाम, श्वानः पञ्चत्वमाप सः ।
तदद्य युज्यते नाऽत्तुं, पुत्रत्वेन मतो हि सः ॥१८॥

तच्छ्रुत्वा सुन्दरोऽवादीदित्यध्वन्योपरोधतः ।
यतः प्रभृत्यऽदां दानं, तद्दिनान्मेऽभवच्छुभम् ॥१९॥

यत् श्वाऽकाण्डे मृतस्तच्चैतदपि दृश्यते शुभम् ।
इत्युक्त्वाऽथ बलात्काराद्यशोमतीमभोजयत् ॥२०॥

अथ नव्यं सुधालिप्तमकस्मादपि मूलतः ।
अभाग्यमिव तद्वेश्माऽग्रद्वारं खण्डशोऽपतत् ॥२१॥

गत्वाऽट्टे श्रेष्ठिनस्तस्य, गृहिणी तन्न्यवेदयत् ।
सोऽप्युत्तरमदादेतददोऽपि दृश्यते शुभम् ॥२२॥

सुवर्णकवलैः पोष्यमाणाऽप्यरोषिताऽपि च ।
पितृभ्यामप्यनाहूता, वधूः पितृगृहं ययौ ॥२३॥

यशोमत्येति कथिते, पुरतः सुन्दरस्य तु ।
विमृश्याऽन्तस्तदेवैष, तस्यै प्रत्युत्तरं ददौ ॥२४॥

अथ सङ्कीर्णरथ्यायां, पृष्टप्रेरणकर्मणा ।
पिण्डीभूतेभ्योऽप्यमाद्भ्यो, वृषभेभ्यः पृथग्भवन् ॥२५॥

जात्यरत्नभृद्गोणीको, देश्यवाणिज्यकारिणाम् ।
उक्षैकः प्रदोषे पुण्यमिव तद्गेहमाविशत् ॥२६॥ [युग्मम्]

प्रविष्टं वृषभं वीक्ष्य, प्रेक्षावान् सुन्दरस्ततः ।
दिशो निरूप्य गोणीं चाऽऽदाय तं निरवासयत् ॥२७॥

गोणीमानामथो गर्त्तां, खनित्वाऽत्र निवेश्य ताम् ।
लिप्त्वोपरि ततः स्वस्तिदान् स्वस्तिकानदापयत् ॥२८॥

भूयिष्ठेष्वथ यातेषु, दिनेषूद्धृत्य तां ततः ।
विभाव्य जात्यरत्नानि, हृष्टोऽवादीद्यशोमतीम् ॥२९॥

श्वा न म्रियेत यद्येष, ततो धावेत् खरं रटन् ।
बलीवर्दश्च न त्रासात्, प्रविशेत्त्वद्गृहं ततः ॥३०॥

मृतेऽप्यस्मिन् यदि द्वारं, त्वद्गृहस्य पतेन्नहि ।
अमानुक्षा सगोणिश्च, नैव वेश्म समाविशेत् ॥३१॥

अथ प्रविष्टोऽपि नो चेद्गच्छेत् पितृगृहं वधूः ।
ततः कुत्राऽपि सा ब्रूयाज्जनेऽप्याविर्भवेदिदम् ॥३२॥

अथेयान् लाभवृत्तान्तोऽषडक्षीणो बभूव यत् ।
तन्निश्चितमुपरोधदानस्यैतद्विजृम्भितम् ॥३३॥

इति प्रत्ययितो दानप्रभावे स तपस्विनाम् ।
मुञ्चन् मिथ्यात्वभावं च, सदा दानपरोऽभवत् ॥३४॥

अथाऽन्येद्युस्तन्नगरस्वामिनः पृथिवीपतेः ।
अकस्मादतिपीडाकृत्, कुक्षौ शूलमजायत ॥३५॥

तेनाऽथ पीडिते राज्ञि, विफलेषु भिषक्षु च ।
तत्पीडापीडितो मन्त्रीतिडिण्डिममवादयत् ॥३६॥

औषधान्मन्त्रतो वा यो, राज्ञः शूलं न्यवर्त्तयेत् ।
तदस्य दास्यते नूनं, यदसौ याचयिष्यति ॥३७॥

अथाऽसौ सुन्दरस्तत्तद्रत्नमाहात्म्यवेदकः ।
अस्पृक्षड्डिण्डिमं सर्वलोकप्रत्यक्षमात्मना ॥३८॥

परिधायाऽथ शूलस्य छेदिरत्नाङ्कमुद्रिकाम् ।
गत्वा भूपं मुद्राङ्गुल्यालोड्य पाथस्त्वपाययत् ॥३९॥

मूलादुन्मूलिते शूले, पीतेन तेन पाथसा ।
याचस्व स्वेप्सितं श्रेष्ठिन्नित्युवाच महीपतिः ॥४०॥

अथाऽयं सुन्दरोऽवादीत्, किं न लब्धं मया विभो !? ।
यन्नाथस्य न्यवर्त्तिष्ट, शूलं मूलाद्व्यथाकरम् ॥४१॥

तस्योक्त्या नृपतिस्तुष्टः, कर्पटौचित्यपूर्वकम् ।
हस्तस्पृष्टिकया तस्मै, मूलश्रेष्ठिपदं ददौ ॥४२॥

उडूनामिव शीतांशुः, स मुख्यो वणिजां भवन् ।
पालयामास श्रेष्ठित्वं, संवत्सरान् बहूनपि ॥४३॥

अथ सञ्जातवैराग्यः, पुत्रं न्यस्य निजेपदे ।
मुक्तिसखीमिव श्रेष्ठी, प्रव्रज्यामग्रहीत्ततः ॥४४॥

तप्यमानस्तपस्तीव्रं, सहमानः परीषहान् ।
श्रद्दधानो जिनोक्तीश्चाऽनुग्रामं विचरत्यसौ ॥४५॥

अन्येद्युरायुषः पूर्त्तेः, प्रस्मरन् परमेष्ठिनाम् ।
शुभभावनया मृत्वा, सुन्दरः स ययौ दिवम् ॥४६॥

इत्युपरोधदानस्याऽप्यैहिकाऽऽमुष्मिकं फलम् ।
श्रुत्वा महामतिर्नित्यं, दद्याद्दानं महात्मनाम् ॥४७॥

**इत्युपरोधदाने सुन्दरकथा ॥**

# भावनादाने वणिक्सुतकथा ।

नयरी अत्थि अवज्झा, वंझा भयअसुहकोहदोहेहिं ।
अत्थीण व पच्चत्थीण वि, दाया तत्थत्थि भीमनिवो ॥१॥

रण्णो तस्स य मंती भत्तो सत्तो त्थि लक्खणो नाम ।
पंचसयअमच्चाणं मुक्खो जक्खाण धणदो व्व ॥२॥

तस्स य दो घरिणीओ रत्तिपीईउ व्व कामएवस्स ।
अइमाणिणीओ अइकोहिणीओ अइकलहवंतीओ ॥३॥

तो सइवेण घरस्स य एगा अहभूमिसामिणी विहिआ ।
अवरा उण उवरिंमि सुआणणव कित्तिकित्तीओ ॥४॥

अह मंतिस्स कयाई रायउले ठियवयस्स रत्तिम्मि ।
जाए कालविलंबे ईय चिंतइ उवरिमा घरिणी ॥५॥

निच्चं मम वारम्मि कत्थ वि अन्नत्थ एस विलसेइ ।
हिट्ठट्ठियरंडाए उण छूज्झइ तेडिओ झत्ति ॥६॥

ताहं अप्पदुवारं उग्घाडिस्सामि नाऽऽगयस्साऽवि ।
इय कोहेण धमंती पिहिअदुवारं पसुत्ता सा ॥७॥

अह आगओ अमच्चो निसीहसमयंमि खिण्णसव्वंगो ।
गमिय उवरिंमि सणियं बारंबारं ति सो भणइ ॥८॥

सा वि अलीअपसुत्ता सद्दं नो देहि वाहरंतस्स ।
अह चाडूणि करंतस्स वि हुं इत्ति वि न सा कुणइ ॥९॥

निव्विण्णस्स य सइवस्सुत्तरमाणस्स हिट्ठिमपियाए ।
दत्तो हत्थालंबो अह सो उत्तरिउमाढत्तो ॥१०॥

उवरिट्ठिआ य पिच्छिय बारछिद्देहिं चिंतइ गओ त्ति ।
उग्घाडिऊण बारं अक्कोसंती तओ धाया ॥११॥

धरिअ भुयं एगं सा मंतिं ताणेइ उड्ढयं जाव ।
ता पायंमि वि एगे धरिउं तमहो पिया अहरा ॥१२॥

ताहिं भुयपाएहिं ताणिज्जंतो अहो य उड्ढं च ।
मंती गच्छइ परिपुण्णपुण्णरहिओ व्व जीवगणो ॥१३॥

ताणिज्जंतो वलहीखरफरिसविहियखसरोहो ।
सो उवरिमाइ नीओ उड्ढं खंतीइ जीवो व्व ॥१४॥

नेहुच्चावचवयणं रयणिं बोलाविऊण सो तत्थ ।
पहिरिअ कंचुयमंगे गओ य गोसंमि रायउले ॥१५॥

सीअं विणा वि लक्खण ! सेअकरो कीस कंचुओ अंगे ? ।
ईय पुट्ठे रण्णा सो एमेइत्तूत्तरं देइ ॥१६॥

परिभाविऊण रण्णा हासकए मंतिकंचुओ खित्तो ।
हसिओ सहाइ वयणेण सो चमक्काविओ मंती ॥१७॥

इतश्च– अत्थि णयरम्मि तंमि वणिअसूओ जूयचोरिअपसत्तो ।
निक्कालिओ पिऊहिं रोगिअकरहो व्व उंटवालेहिं ॥१८॥

सो वि रसो व्व रसाणं मिलिओ चोराण तारिसो जाओ ।
तेहिं समं लुंटंतो हिंडइ गामाणुगामेण ॥१९॥

सो एगो वणियसुओ जोग्गं चौराण बाहिरठिआण ।
गहिअ धणेहिं भोयणमह णयरा सो उ बाहुडिओ ॥२०॥

तेण य साहू दिट्ठो भिक्खट्ठं पुरवरंमि वच्चंतो ।
तो वंदिओ अ दूरा हिअए एअं धरिंतेण ॥२१॥
चत्ता मया इ पियरो दुप्पुत्तेणं तहेव जिणधम्मो ।
धम्मोवएसकहगा गुरू वि हा ! केरिसो होमि ? ॥२२॥
सयलाकिच्चगणाणं पायच्छित्तं व देमि ता दाणं ।
ईय भावणाइ दिण्णं दाणं साहुस्स एएण ॥२३॥
अह वंदिऊण साहुं वणिअसुओ सो गओ जहिं चोरा ।
भोत्तुं ते सव्वे वि हु संपत्ता तो पुरिमजोहं ॥२४॥
तत्थाऽऽगमिअ निसिम्मि निवआसा चोरिऊण ते वलिआ ।
तंडाहिवेण दिट्ठा ते सव्वे मारिआ तत्थ ॥२५॥
वणिअसुओ नस्संतो धच्चा अह बंधिऊण गोसंमि ।
नीओ रायउलिंमि कहिअं पि य दंडिणो तेण ॥२६॥
अह तह चेअ उविट्ठो राया दोवारिएण विण्णत्तो ।
तंडाहिवेण चोरो आणीओ बारि चिट्ठेइ ॥२७॥
तं सोऊण निवेणं हंहोऽमच्चा ! अपुव्वरीईए ।
चोरो कदत्थणिज्जो ईय भणिय विसज्जिओ मंती ॥२८॥
सइवेण वि सट्ठाणं गच्चा सो पुच्छिओ जणद्धिक्खो ।
किं चोरियमेएणं ? सो जंपइ राउला आसा ॥२९॥
ईय कहिए सो मंती नियभज्जाजुअलदुक्खिओऽभिक्खं ।
दोहिं चिय कण्णाहिं चोरं परिणावियं भणइ ॥३०॥
रे ! रे ! अज्जप्पभिइं अकुणंतो चोरिअं सभज्जाहिं ।
घरवासं पालिस्ससि जइ न तुमं तो विमारिस्सं ॥३१॥
बीहाविऊण एवं सइवेणं सो वि विसज्जिओ चोरो ।
गमिऊण रायपासे विण्णत्तो चोरवित्तंतो ॥३२॥
तं सुणिय निवो कुविओ जंपइ सइवा ! विआरवंझो सि ।
चोरं विणासजोग्गं जं एवं तं सुहीकरसि ॥३३॥

अह विण्णवेइ मंती न तहा दुक्खी विणासिओ सामि ! ।
जह भज्जाजुयदमिओ अहं व सो दुक्खिओ निच्चं ॥३४॥

नरयदुहा अवि अहियं दुक्खं मण्णेमि दुण्ह भज्जाण ।
ईय जुत्तउ त्ति पुव्वं राया संबोहिओ तेण ॥३५॥

अह सो चिंतइ चोरो एअं कटरि मुणिदाणमाहप्पं ।
मारिज्जंताणं ताणेक्को छुट्टोम्हि जं पुव्वं ॥३६॥

पच्छा निवेण माराविओ वि अइकोवपज्जलंतेण ।
जं मुंचि अमच्चेणं हत्था परिणाविओ अहयं ॥३७॥ [जुयलं]

किञ्च– अहं जइ चोरिं रायण्णं भंजिऊण य करिस्सं ।
ता मं मंती कुविओ मारिस्सइ नत्थि संदेहो ॥३८॥

तम्हा गच्छं मायापियरसगासंमि भत्तिसंजुत्तो ।
इअ चिंतिय भज्जाहिं ताहिं समं सो गओ सगिहं ॥३९॥

तेण य कहियं सव्वं वुत्तंतं नियमयमाइपियराण ।
ताहिं पि य तं मंतिं पुच्छिय सो आणिओ गेहं ॥४०॥

अह संसारसुहाइं भुंजंतो सह णेहलाहिं भज्जाहिं ।
बहुपुत्तपपुत्तेहिं वडु व्व सो पसरिओ झत्ति ॥४१॥

दाणपहावं तं तं सुमरंतो स हिअयट्ठियं निच्चं ।
आसूरोदयअत्था वियरइ दाणं सुपत्ताणं ॥४२॥

अह अन्नया कयाई आयरिया के वि आगया तत्थ ।
ताण सगासे तेणं भज्जाहिं समं वयं गहियं ॥४३॥

दुस्सहतवं चरंतो आलोयंतो अ पुव्वपावाइं ।
परमेट्ठी सुमरंतो मरिय गओ देवलोगंमि ॥४४॥

इय वणियसुयस्स भावणदाणं सुहकारयं सुणेऊण ।
दिज्जा दाणं इहपरलोअहियं भावओ मइमं ॥४५॥

**इति भावनादाने वणिक्सुतकथा ।**

इत्याकर्ण्य मुनेर्वाचं, दानधर्मोपदेशिनीम् ।
जग्मुर्विद्याधराः सर्वे, स्वं स्वं स्थानं विहायसा ॥२४९॥
कामकेतुरपि श्रद्धाबन्धुरः प्रियया सह ।
प्रपद्य देशविरतिं, पुरे गन्तुं मनोऽकरोत् ॥२५०॥
विद्याधरेण केनाऽपि, दत्त्वा पाथेयमात्मना ।
तत्पुराऽध्वनि चाऽऽनीय, मुक्तौ तौ चलितौ क्रमात् ॥२५१॥
गच्छन्तौ मार्गकान्तारे, शुश्रुवाते गिरं त्विमाम् ।
व्यन्तरोक्तां यदत्राऽस्ति, साधुरेको महातपाः ॥२५२॥
एवमभिग्रहं चक्रे, सोऽथ साधुः सुदुष्करम् ।
द्विचत्वारिंशता दोषैर्हीनमाहारमत्र तु ॥२५३॥
कान्तारमध्ये चेल्लप्स्ये, तदा भोक्ष्यामि नाऽन्यथा ।
तत्पर्यन्तं करिष्यामि, कायोत्सर्गं सुनिश्चलः ॥२५४॥ युग्मम् ॥
इत्यभिग्रहयुक्तस्य, मासक्षपणपञ्चकम् ।
बभूव तन्नमस्कर्त्तुं, युक्तोऽयं युवयोर्मुनिः ॥२५५॥
कामकेतुरिति श्रुत्वा, किमेतदिति सम्भ्रमी ।
काञ्चनप्रभया प्रोचे, नाथ ! जानाम्यहं ह्यदः ॥२५६॥
महात्माऽत्र मुनिः कोऽपि, विहिताऽभिग्रहोऽस्ति तत् ।
कथितो व्यन्तरेणाऽतः, पाथेयैः प्रतिलभ्यते ॥२५७॥
कामकेतुस्तयेत्युक्तः, स्थाने तत्र विमुच्य ताम् ।
वने भ्राम्यन्मुनिं कायोत्सर्गस्थितं ददर्श सः ॥२५८॥

त्रिश्च प्रदक्षिणीकृत्य, प्रणनाम शुभाऽऽशयः ।
ऊचे च प्रासुकाऽन्नं मे, गृहाणाऽनुगृहाण माम् ॥२५९॥

शरीरधारणाहेतुप्रासुकाऽन्नजिघृक्षया ।
मुनिर्जगाम यत्राऽऽस्ते, तत्प्रिया काञ्चनप्रभा ॥२६०॥

तया तेन च भावेन, ढौकिते शम्बले निजे ।
कल्पनीयमिति ज्ञात्वा, जगृहे मुनिपुङ्गवः ॥२६१॥

अहो ! दानमहो ! दानमहो ! पुण्योदयोऽनयोः ।
इत्युक्त्वा व्यन्तरोऽभाणीद्वृणीष्वैकं वरं नर ! ॥२६२॥

कामकेतुः स्वभावेन, महावाञ्छो ययाच तम् ।
स्थानेऽत्रैव नवं कृत्वा, प्राज्यं राज्यं हि देहि मे ॥२६३॥

तुष्टेन व्यन्तरेणाऽथ, चक्रे तत्र नवा पुरी ।
हस्त्यश्वलोकरम्यायां, तस्यां सैष कृतो नृपः ॥२६४॥

काञ्चनप्रभया युक्तः, कामकेतुः प्रभाववान् ।
राज्यं व्यन्तरसाहाय्यात्, देशे तत्र चकार सः ॥२६५॥

विक्रमात्तेन सर्वेऽपि, राजानोऽन्ये वशीकृताः ।
स्फीतं समृद्धं स्वं लोकं, रक्षता ववृधे स्वयम् ॥२६६॥

आनाय्य स्वजनाः स्वाऽग्रे, सन्मानात्तेन चक्रिरे ।
स्वराज्यसौख्यदायादाः, सतामाचरणं ह्यदः ॥२६७॥

दानेनाऽवाप्तसाम्राज्यभोगः प्रत्ययितो हृदि ।
तपश्चारित्रपात्रेषु, दानं श्रद्धापरो ददौ ॥२६८॥

क्रमेण गुरुसामग्रीमासाद्याऽऽसादितव्रतः ।
पञ्चषैश्च भवैर्मोक्षं, तज्जीवो लप्स्यते ध्रुवम् ॥२६९॥

ऐहिकाऽऽमुष्मिकसुखलालसैस्तत् सदाऽपि हि ।
देयं दानं सुपात्रेषु, तद्धि सर्वेष्टसिद्धिकृत् ॥२७०॥

**इति दाने कामकेतुकथा ॥**

# अदाने कुरङ्गकथा ।

यस्तु दद्यान्न पात्रेऽपि, दानं सत्यपि वस्तुनि ।
स किं समीहते भोगान्, दानप्राप्यान् भवोचितान् ? ॥१॥

यत्र सम्पद्यते सम्पत्, सांसारिकसुखं न यत् ।
पूर्वे जन्मनि तद्दानं, दत्तं पात्रेऽपि नाऽङ्गिभिः ॥२॥

पूर्वे जन्मन्यदातारो, याचितारः स्युरत्र ते ।
दीना हीनाश्च ते मर्त्याः, सहन्ते हि पराभवम् ॥३॥

कृतं हि दुष्कृतं दानाच्छाम्यतीव जलाद्रजः ।
पापी दानं न दत्ते चेत्तद्यात्यधः कुरङ्गवत् ॥४॥

अस्त्यास्तिकजनस्वाऽन्ताऽऽसीनश्रद्धारिरंसया ।
गुप्ता गतसदाऽधर्मा, सुशर्मा नाम पूर्वरा ॥५॥

गीर्वक्तृत्वकवित्वाभ्यां, श्रीर्दानभोगभागतः ।
सफला यस्य सोऽस्तीह, राजा मृगाङ्कमण्डनः ॥६॥

तत्र चाऽऽढ्यकुलोत्पन्नः, कुरङ्गाऽऽख्यो वणिक्सुतः ।
अस्ति कर्मविपाकेन, दारिद्र्योपद्रुतः सदा ॥७॥

पितृव्या भ्रातरस्तस्य, ज्ञातयोऽपि महर्द्धिकाः ।
पुण्योपात्तां श्रियं दानभोगाभ्यामुपभुञ्जते ॥८॥

प्रमाणं पौरलौकेषु, प्रधानं राज्यसंसदि ।
तद्वर्ग्यास्ते किलाऽतीव, ख्यातिपात्रं जनेऽभवन् ॥९॥

कुरङ्गस्तु पुरोपात्तदुष्कर्मस्फुटदुर्दशः ।
व्यवसायाच्छ्रियं नैव, प्राप्नोति नाऽन्यतोऽपि हि ॥१०॥

स्वभ्रातृभ्यः पितृव्येभ्यो, ज्ञातिभ्यश्च सुदीनवाक् ।
याचित्वा भोजनाऽऽदीनि, प्राणवृत्तिं करोत्यसौ ॥११॥

भूयो याचन् निषिद्धस्तैर्मा गास्त्वमस्मदोकसि ।
यो हि यस्मात् पृथक् सत्यं, सैष तस्य मृतः खलु ॥१२॥

तिरस्कृतः स तैरेवं, निन्दन्नात्मानमुच्चकैः ।
स्वदुष्कर्मपरिपाकाद्विषण्णोऽचिन्तयद्धृदि ॥१३॥

ममैते स्वजनाः सर्वे, निजपुण्यसमर्द्धयः ।
अन्येषामुपकुर्वन्ति, न मे दीनगिरोऽपि हि ॥१४॥

यद्यत्कर्म प्रपद्येऽहं, तत्तत् स्याद्धानये खलु ।
तद्यामि क्वाऽपि देशेऽथ, नाऽत्राऽलं स्थातुमस्मि यत् ॥१५॥

इत्यालोच्य व्रजन् क्वाऽपि, साधुमेकं ददर्श सः ।
तं पप्रच्छ प्रणम्यैष, पूर्वजन्मस्थितिं निजाम् ॥१६॥

अथाऽऽख्यज्ज्ञानवान् साधुस्तस्य वैराग्यहेतवे ।
अस्ति ग्रामः सुसीमाऽऽख्यः, समृद्धजनवासितः ॥१७॥

तत्राऽभूतां मिथः स्निग्धौ, सुहृदौ प्रतिवेशिनौ ।
धनदधनपुञ्जाऽऽख्यौ, व्यवसायाऽर्जितश्रियौ ॥१८॥

अन्यदा द्रव्यमादाय, दूरदेशं प्रतीयतुः ।
द्विप्रहर्यां कदाऽप्येतौ, ग्रामे क्वाऽपि गतौ ततः ॥१९॥

अर्पितो वरकस्ताभ्यां, रन्धन्या वृद्धयोषितः ।
प्रगुणीकृत्य साऽप्येतावाह्वदुल्लापनैर्मृदु ॥२०॥

उपविश्याऽऽसने पादौ, क्षालयन्तौ तु रन्धनी ।
पप्रच्छ कुत्र गन्तव्यं, व्यवसायेन केन च ? ॥२१॥

एकेनोक्तं प्रयास्यामि, घृताय श्रीकुले पुरे ।
परेणोक्तं तदेवाऽहं, चर्मक्रीते गमी खलु ॥२२॥

रन्धन्या च ततो यो हि, घृतक्रीतः स वेश्मनः ।
मध्येऽथ भोजितो भक्त्याऽपरस्त्वनादराद्बहिः ॥२३॥

बहिरन्तः किमावां हि, प्रतिपत्तिविभेदतः ।
भोजितावनयेत्यादि चिन्तयन्तौ गतौ पुरे ॥२४॥

एकेन च घृतं क्रीतं, चर्माऽन्येन यदृच्छया ।
पश्चाद्व्यावव‍ृताते तौ, पृथक् चिन्ताऽऽकुलौ ततः ॥२५॥

तस्मिन्नाजग्मतुर्ग्रामे, भूयोऽपि वरकोऽर्पितः ।
तस्याऽस्तु वृद्धरन्धन्या, तया निष्पाद्य तौ ततः ॥२६॥

यः पुराऽन्तर्गृहं भक्त्या, भोजितस्तं बहीकृतम् ।
मध्येकृत्य द्वितीयं तु, भोजयामास रन्धनी ॥२७॥

ततस्तौ विस्मयाऽऽपन्नौ, पप्रच्छतुर्मिथोऽपि ताम् ।
मातर्विभेदः कोऽयं नौ, गत्यागत्योः कृतस्त्वया ? ॥२८॥

अथ सा प्राह वृद्धस्त्री, वत्सौ ! शृणुतमादरात् ।
यः पूर्वं हि घृतक्रीती, तस्य चेतस्यभूदिति ॥२९॥

घृताय यत्र यास्यामि, स्युर्गावस्तत्र चेद्दृढाः ।
तदा सम्पद्यते शीघ्रं, समर्थं च घृतं भवेत् ॥३०॥

इत्यभिप्रायशुद्धस्त्वं, गच्छन्नासीः पुरा ततः ।
शुभां चिन्तां मया ज्ञात्वा, प्रतिपत्तिः कृता तव ॥३१॥

यश्चर्मग्राहकस्तस्य, चित्तेऽभूत् कल्मषं त्विदम् ।
गच्छन् यत्राऽस्मि चेत्तत्र, विपद्यन्ते चतुष्पदाः ॥३२॥

ततः सम्पद्यते चर्म, समर्थं प्रचुरं च तत् ।
इति चिन्ताऽभवज्जीवहिंसापापो मया ततः ॥३३॥
चण्डालवद्बहिर्गेहाद्धोजितः क्रूरमानसः ।
न पाप्मभिर्गृहं स्पर्शयितव्यं निजमुत्तमैः ॥३४॥
इदानीं युवयोर्जातश्चित्तचिन्ताविपर्ययः ।
ततो मयाऽपि चक्रे वां, प्रतिपत्तिविपर्ययः ॥३५॥
इति तस्या वचः श्रुत्वा, दृष्ट्वा स्वस्मिंश्च तत्क्रियाम् ।
पण्येन सह मार्गे तौ, चेलतुः शीघ्रगामिनौ ॥३६॥
कियत्यपि गते मार्गे, ताभ्यामैक्षत केवली ।
सुराऽसुरसभायां स, विदधद्धर्मदेशनाम् ॥३७॥
कौतुकात्तावपि गतौ, तं नमश्चक्रतुर्मुदा ।
आसीनौ शुश्रुवाते च, दाने केवलिदेशनाम् ॥३८॥
पप्रच्छ धनदो ज्ञानिन् !, लाभो मे भविता न वा ? ।
ज्ञानी प्राह न धर्मस्य, भावी लाभोऽर्थलाभवत् ॥३९॥
श्रुत्वेति तौ समुत्थाय, स्वग्रामं प्रति चेलतुः ।
प्राप्तौ च क्रमशः क्षेमात्, स्वं ग्रामं तौ मुदावृतौ ॥४०॥
इतश्च केचिदाचार्याः, साधुसिन्धुरबन्धुराः ।
तद्ग्रमासन्नमुद्यानमलञ्चक्रुः सुशुद्धितः ॥४१॥
दैवादेकस्य तत्साधोः, कायोत्सर्गात्तपस्यतः ।
क्रूरेण केनचिद्दत्तः, प्रहारोऽङ्गे महात्मनः ॥४२॥
शरीरे निःस्पृहः साधुर्विषेहे तद्व्यथामथ ।
क्रमेण प्रसृतो घातः, पाकेन कुथितोऽभवत् ॥४३॥
अन्यदा श्रावकः कोऽपि, वैद्यः साधुं ददर्श तम् ।
अहो ! साधोर्महत्कष्टमित्यसौ खेदमासदत् ॥४४॥
सूरीनुपेत्य स प्राह, प्रभो ! वैद्योऽस्म्युपासकः ।
परं दरिद्रस्तत्राऽस्ति, मद्वेश्मनि घृतौषधम् ॥४५॥

घृतमत्र दुरापं च, तदस्ति धनदौकसि ।
याचयित्वा भवन्तश्चेदानाययन्त्यहं ततः ॥४६॥
घृतमिश्रौषधैः सम्यक्, चिकित्सामि तपस्विनम् ।
रक्षणीयं शरीरं यत्, सत्यस्मिन् वर्द्धते तपः ॥४७॥
साधोश्चिकित्सया पुण्यं, ममाऽपि स्यादभीष्टकृत् ।
इत्युक्ताः सूरयस्तेन, प्रेषयन्ति मुनिद्वयम् ॥४८॥
आदेशेन गुरोर्गत्वा, तौ मुनी धनदं प्रति ।
ग्लानवृत्तान्तमाख्यायौषधायाऽयाचतां घृतम् ॥४९॥
कार्पण्याद्गतदाक्षिण्यभावनादाननिष्ठुरः ।
स मुनी प्रत्यभाषिष्ट, घृतं नैवाऽस्ति यात तत् ॥५०॥
ग्लाने जनेऽपि सर्वस्यौषधदानादिधीर्भवेत् ।
ग्लाने साधौ तु किं वाच्यं ?, किन्त्वस्याऽभून्न दानधीः ॥५१॥
गतौ व्याघुट्य तौ साधू, धनदस्तु सदाऽपि हि ।
कीर्त्तौ दाने च धर्मे च, दत्ते नैव धनं क्वचित् ॥५२॥
उपार्ज्योपार्ज्य पापेन, सह वित्तस्य सञ्चयम् ।
कुर्वाणो धनदो मृत्वा, जातस्त्वमसि भो ! इति ॥५३॥
कुरङ्गस्तु निशम्यैवं, चिन्तयामास दुर्गतः ।
अहो ! पूर्वभवे धिग्मे, स्वात्माऽभूद्दानवर्जितः ॥५४॥
तद्भावादात्मनो मेऽभून्न कदाचित्सुखस्थितिः ।
दीनो हीनश्च सर्वत्र, भ्रमाम्यप्राप्तजीविकः ॥५५॥
पूर्वोपार्जितमेवाऽत्र, भुज्यते तन्न मेऽभवत् ।
द्रव्याऽभावान्न दानेन, कर्त्ताऽस्मीह शुभाऽर्जनम् ॥५६॥
तद्गृह्णामि व्रतं येन, स्याद्दुष्कर्मक्षितिर्मम ।
ध्यात्वेति व्रतमादाय, तपस्तेपे स सर्वदम् ॥५७॥

**इत्यदाने कुरङ्गकथा ॥**

# शीले मन्त्रिपुत्रीकथा ।

शीलं मन्त्रः स्वपरेषां, सर्वोपद्रवरक्षणे ।
आत्मनः कर्मकक्षाग्निरमात्यदुहितुर्यथा ॥१॥

पुरं राजगृहं नाम, धाम धर्मनयश्रियाम् ।
अस्ति तीर्थकृतां हर्म्यैर्धर्म्यैः साधुभिरावृतम् ॥२॥

वैरिस्त्रीपत्रवल्लीभिः परिपुष्टासिधेनुकः ।
राजा तत्राऽस्ति भूपालशेखरश्चन्द्रशेखरः ॥३॥

तस्याऽऽसीन्नीतिरीतिज्ञो, मन्त्री धात्रीप्रपोषकः ।
स्वामिभक्तश्च शक्तश्च, धार्मिको वसुसञ्ज्ञकः ॥४॥

राजाऽप्यनेकशास्त्रज्ञो, विद्वत्परिषदाश्रितः ।
नव्याऽर्थकाव्यकर्तॄनत्यर्थं सन्मानयत्यसौ ॥५॥

अथाऽस्य कीर्त्तिमाकर्ण्याऽप्रतिमप्रतिभाऽन्वितः ।
अन्तर्वाणिस्ततस्तत्र, विद्वानेकः समाययौ ॥६॥

तेन प्रोद्गान्यवाद्यन्त, न्यक्कारीणि विपश्चिताम् ।
न कोऽप्यधारयत्तानि, फूत्कुर्वद्भुजगानिव ॥७॥

ज्ञात्वाऽथ भूभुजा तेन, विद्वान् देशान्तराऽऽगतः ।
आकार्यत ततः कोऽर्थी, विद्यारत्नजुषां न वा ॥८॥

सोऽप्यागाद्विबुधस्तत्र, ज्ञम्मन्यो नृपसंसदि ।
उपाश्लोकिष्ट श्लोकानामष्टोत्तरशतेन तम् ॥९॥

छन्दोऽलङ्कारदोषज्ञैर्मनीषिभिरदूषितान् ।
श्रुत्वा श्लोकान् नृपः स्वाऽर्द्धासनेऽथ तं न्यवीविशत् ॥१०॥

उवाच च महीनाथः, कुतः कूर्चालभारती ।
स प्राह मध्यदेशात्ते, विदुषो द्रष्टुमागमम् ॥११॥

तस्य तर्काऽञ्चिता वाचः, श्रुत्वा तेऽन्ये मनीषिणः ।
भयात् सञ्चुकुचुर्युद्धतूर्याणीव हि कातराः ॥१२॥

ततो हर्षान्नृपः श्लोका, यावन्तस्तावतः खलु ।
स्वर्णाच्छान् दापयामास, प्रथमेऽहन्यस्य गौरवात् ॥१३॥

यावतः पठति श्लोकान्, बुधोऽयं तावतो भवान् ।
दद्यात् स्वर्णाच्छानस्येति, मन्त्रिणं प्रादिशच्च सः ॥१४॥

पठित्वा तावतः श्लोकान्नित्यं गृह्णाति काञ्चनम् ।
भुङ्क्ते स यत्र तत्राऽपि, शेते देवकुलेषु तु ॥१५॥

अथ वदान्यो राजाऽयं, नव्यकाव्यविधिबुधः ।
सर्वदा दीयमानस्तु, स्वर्णशैलोऽप्यणूयते ॥१६॥

अहं निवारयाम्येनं, यदि स्याद्दुर्मना नृपः ।
तत्कस्मादमू रक्ष्येतां, स गृह्णन् दापयन्नृपः ॥१७॥

इति चिन्ताकुलो मन्त्री, तयेव हृदि शल्यितः ।
शेते नैव न वा भुङ्क्तेऽनयेवातिभृतोदरः ॥१८॥

अथाऽन्यदा गृहं गत्वा, सिंहासनमुपाविशत् ।
नाऽकार्षीद्भोजनाद्यं स, केवलं भुवमैक्षत ॥१९॥

अथैका तत्सुता लघ्वी, तदङ्कमुपविश्य सा ।
धृत्वा कूर्चं च हस्ताभ्याममात्यमित्यभाषत ॥२०॥

तात ! जल्पत किं चिन्ता, युष्माकं दुःखदायिनी ? ।
किं चुकोप नृपः ? किं वा, दुःसाधः कश्चिदस्ति वः ? ॥२१॥

स्मित्वाऽथ सचिवः प्राह, दुःसाधोऽरिर्भवेद्यदि ।
किं करोषि ? ततः साऽऽह, धीदा स्यां तस्य साधने ॥२२॥

लघोरपि भवेद्बुद्धिः, सा यया जीयते जगत् ।
प्रत्युत्पन्नमतिः प्रायो, लघ्व्यपि स्त्री विशेषतः ॥२३॥

इति ध्यात्वा ततो मन्त्री, पुरः पुत्र्यास्त्वचीकथत् ।
वृथैव गृह्णतः स्वर्णं, वृत्तान्तं तस्य धीमतः ॥२४॥

अथोचे सा त्यक्त्वा चिन्तां, तात ! जेमत सम्प्रति ।
अर्थः साध्योऽसाध्यो वाऽयं, पश्चात्करिष्यते मया ॥२५॥

अमात्यः प्राह मद्वत्से ! मह्यं चेत्कथयिष्यति ।
तत्साधनधियं नूनं, ततो भोक्ष्यामि नाऽन्यथा ॥२६॥

साऽप्येवमब्रवीत्किञ्चिन्न्यञ्च्य स्वाऽऽस्यं च लज्जया ।
ताताऽलीकं सहाऽनेन मामुपायमयत्विति ॥२७॥

कुर्वे पश्चात्तु तत्किञ्चिद्येन गृह्णाति नो नवम् ।
मुञ्चत्यात्तं पुराद्याति, सोऽत्र तिष्ठाम्यहं पुनः ॥२८॥

तयेत्थमुदिते हृष्टः, प्राह मन्त्री भवत्विदम् ।
तदैव च तया सार्द्धमकार्षीद्भोजनं ततः ॥२९॥

सर्वान् सङ्केत्य दैवज्ञान्, द्वितीयेऽह्न्यथ सत्वरम् ।
ययौ राजकुलं भूपं, नत्वा मन्त्री समाविशत् ॥३०॥

अथाऽऽकृष्ट इवाऽपुण्यैः, स सुधीर्नृपमाययौ ।
पठित्वा तावतः श्लोकानासने सोऽप्युपाविशत् ॥३१॥

तुष्टेन भूभुजा हर्षान्मन्त्रिसम्मुखमीक्षिते ।
कृत्वाऽञ्जलिमुवाचाऽयं, प्रत्यक्षं सर्वसंसदः ॥३२॥

नाथेत्थं कुर्वताऽनेनाऽमूल्यकाव्यानि नित्यशः ।
रञ्जितोऽस्मि ततः स्वामी, मत्पुत्र्याऽस्य प्रसीदतु ॥३३॥

अथोचे नृपतिर्मन्त्रिन् !, युक्तमर्थं प्रभाषसे ।
विदुषी त्वत्सुता विद्वानेषोऽस्त्वर्थोऽयमीप्सितः ॥३४॥

पृष्टा ज्योतिर्विदः सर्वे, लग्नं गोधूलिकं ददुः ।
तदैव सचिवः पुत्र्या, विद्वांसं पर्यणाययत् ॥३५॥

प्राह बद्धाऽञ्जलिर्मन्त्री, विद्वन्नेषा तव प्रिया ।
गृहाणैनां गृहं गच्छ, त्वं क्षेमेण सहाऽनया ॥३६॥

गृहीत्वाऽथ स तामेकां, चिन्तामिव शरीरिणीम् ।
ययौ देवकुले क्वाऽपि, प्रणामायेव सत्वरम् ॥३७॥

अथ देवं नमस्कृत्य, सोचे चलत वेश्मनि ।
सलज्जमूचे सोऽस्माकं, वेश्मेदं नाऽन्यदस्ति हि ॥३८॥

अथ सा कुपितेवाऽऽह, कदाचित् खादको भवान् ।
यन्नित्यं लभमानोऽपि, स्वर्णं नाऽकारयद्गृहम् ॥३९॥

नाऽहं स्थास्यामि खल्वत्र, नटभण्डविटाऽऽलये ।
द्विभूमं ननु मद्योग्यं, सौधं कारय सत्वरम् ॥४०॥

अथ स प्राह नो तावत्सौधं निष्पद्यते क्षणात् ।
तिष्ठैनां रात्रिमत्रैव, तत्प्रातः कारयिष्यते ॥४१॥

इत्थं सम्बोध्य तां जाग्रन्निशि तस्थौ स चिन्तया ।
अथोत्थाय च रात्र्यन्तयामेऽगाच्छ्रेष्ठिनो गृहम् ॥४२॥

द्वारेऽतिष्ठत्तावद्यावदुत्तस्थौ श्रेष्ठिपुङ्गवः ।
क्रीतं च श्रेष्ठिनस्तस्मात्तेन वेश्मतलं धनैः ॥४३॥

तदैव स कटान् क्रीत्वाऽऽसितुं स्थानमकारयत् ।
ततो देवकुलान्मन्त्रिपुत्रीं तत्र समानयत् ॥४४॥

व्यग्रत्वात्पूर्वसङ्ख्यार्द्धश्लोकान् कृत्वा ययौ नृपम् ।
स्खलन् पपाठ तांश्छन्दोऽलङ्कारैरपि दूषितान् ॥४५॥

अर्द्धे दोषजुषः श्लोकास्त्वयाऽपठ्यन्त कोविद ! ।
ब्रुवन्नेवं ददौ पूर्वस्वर्णार्द्धं सचिवः कवेः ॥४६॥

लज्जमानः सभायाः स, सङ्कुच्य श्वेव निर्ययौ ।
गत्वा च खेदमापन्नः, सौधाऽऽरम्भमकारयत् ॥४७॥

आह्वत्सोऽथ कर्मकरान्, प्रातरुत्थाय नित्यशः ।
स्वयं तत्र स्थितः कर्म कारयन् प्रकरोति च ॥४८॥

अथ सा तत्प्रिया गेहोपयोगिवस्तुसञ्चयान् ।
अभीक्ष्णमानाययन्ती, विद्वांसं निरवेदयत् ॥४९॥

अथ क्रमाद्धीयमानान्, श्लोकान् कृत्वा स नित्यशः ।
गच्छन्नृपास्पदं क्षुद्रैर्विपक्षैरुपहस्यते ॥५०॥

अथ– यो दृष्ट्वा यत्र सन्मानं, न्यक्कारं तत्र पश्यति ।
श्वेव लेहनलुब्धो हि, स लोभी पुरुषाधमः ॥५१॥

किञ्च– गृहव्यापारमग्नस्य, शास्त्रबुद्धिः प्रणश्यति ।
नीवीव विदुषामेषा, तद्भ्रशाद्वर्तनं कुतः ? ॥५२॥

अन्येद्युश्चिन्तयित्वैवं, स विद्वान् खिन्नमानसः ।
त्यक्त्वा भार्याद्यकार्षीद्यः, पलायते स जीवति ॥५३॥

ज्ञात्वाऽथ मन्त्रिणः पुत्र्या, कविं निश्चयतो गतम् ।
ततो विज्ञापितो मन्त्री, स तां स्वगृहमानयत् ॥५४॥

आपूर्वान्त्यदिनारम्भाद्यदात्तं तेन काञ्चनम् ।
तत्सर्वमर्पयन्ती साऽमात्यं चक्रेऽतिहर्षितम् ॥५५॥

अन्येद्युर्जल्पिता पित्रा, सत्योद्वहनहेतवे ।
सा प्राह न भवेत्तात !, पुनरुद्वहनं मम ॥५६॥

मम तीर्थकरो भर्तृशब्दवाच्यस्तु नाऽपरः ।
स्वर्णादिमण्डनेभ्योऽपि, चारु शीलं च मण्डनम् ॥५७॥

इति युक्तिपरैर्वाक्यैः, सम्बोध्य पितरं निजम् ।
सुशीलं पालयत्येषा, तपःस्वाध्यायपोषितम् ॥५८॥

अन्येद्युस्तत्पुरक्ष्मापपुत्राश्चापल्यशालिनः ।
बभञ्जुर्मूलतः पद्मदेवताया वनद्रुमान् ॥५९॥

तद्दृष्ट्वा ज्वलिता कोपात्तृणानीव दवः पुरा ।
भस्मसादकरोत्तूर्णं, साऽपि तानपराधिनः ॥६०॥

राजपुत्रापराधेन, सोपदुद्राव तत्पुरम् ।
वात्याभिर्वृष्टिभिर्लेष्टुपातैः सातत्यपातिभिः ॥६१॥

राज्ञा लोकेन चाऽत्यन्तं, सान्त्वमानाऽपि नित्यशः ।
न तस्थावुपद्रवन्ती, नित्यनव्यैरुपद्रवैः ॥६२॥

अन्येद्युः सचिवं चिन्ताप्रपन्नं दृष्ट्वाऽऽह तत्सुता ।
पुनः किं तात ! चिन्तेयमित्युक्तः सोऽप्यभाषत ॥६३॥

वत्से ! न वेत्सि किं पद्मदेवतां कुपितां पुरे ।
ततस्तत्सान्त्वनोपायव्यामूढोऽस्मि विचिन्तया ॥६४॥

शीलवत्यसि वत्से ! त्वत्प्रभावात्साऽपि शाम्यति ।
ततः कुरु दयां लोके, दुष्टोपद्रवरक्षणात् ॥६५॥

इत्युपरोधिता पित्रा, सा तामुद्दिश्य देवताम् ।
कायोत्सर्गं तपःपूर्वं, चक्रे मन्त्रिसुता ततः ॥६६॥

लोहवच्चुम्बकग्राव्णा, तेनाऽऽकृष्टाऽथ देवता ।
आगमन्नभसा लोकप्रत्यक्षं साऽपि तत्पुरः ॥६७॥

कृत्वाऽञ्जलिमुवाचैवं, मन्त्रिपुत्रि ! करोमि किम् ? ।
साऽप्यूचे मा कृथा लोकस्योपसर्गान् कदाचन ॥६८॥

मन्त्रिपुत्र्या वचस्तच्चोररीकृत्य सगौरवम् ।
ददती चाऽभयं नृणां, देवता स्वाऽस्पदं ययौ ॥६९॥

शीलं प्रपाल्य सा मन्त्रिपुत्री प्रापाऽऽयुषः क्षयात् ।
शीलशीताग्निदग्धानां, कर्म्मणां पल्लवं दिवम् ॥७०॥

इति मन्त्रिसुताऽऽख्यानं, श्रुत्वाऽऽत्मपरशर्मदम् ।
यथाशक्त्याऽपि शुद्धात्मा, पालयेच्छीलमुत्तमम् ॥७१॥

**॥ इति शीले मन्त्रिपुत्रीकथा ॥**

# दौःशील्ये श्रीकान्ताकथा ।

स्त्रियः परनरत्यागोऽन्यस्त्रीत्यागो नरस्य तु ।
अगारिणामिदं शीलं, भवेद्दुःशीलताऽन्यथा ॥१॥

सर्वथा शीलविध्वंसान्मानग्लानिर्भवेदिह ।
परत्र नरकाऽवाप्तिः, श्रीकान्ताया इव ध्रुवम् ॥२॥

अस्तीह भरतक्षेत्रे, लक्ष्मीवासेति पूर्वरा ।
नित्यं वसन्त्या लक्ष्म्याऽत्र, चक्रे यन्नाम सार्थकम् ॥३॥

तत्राऽभूच्छ्रीपती राजा, यत्पादस्थाऽम्बुजस्थितेः ।
श्रियः प्रसादनायेव, यं नेमुर्भूस्पृशोऽरयः ॥४॥

तत्र धर्मधनोपायव्यवसायकृतोद्यमः ।
वणिगस्ति कुमाराख्यः, श्रीकान्ताऽस्याऽस्ति गेहिनी ॥५॥

द्रव्येण गौरवं लोके, द्रव्येण ख्याप्यते कुलम् ।
द्रव्येण मित्रसम्पत्तिर्धर्मो द्रव्येण गेहिनाम् ॥६॥

इति तदर्जनाहेतोः, कुमारः सार्थसंयुतः ।
ययौ देशान्तरं तत्र, स्थितः स द्रव्यमर्जति ॥७॥

यथेष्टद्रव्यसम्पूर्त्तौ, चचाल स्वपुरं प्रति ।
आगच्छन् स ददर्शैकं, वृद्धमायान्तमध्वनि ॥८॥

जोच्चक्रेऽथ कुमारोऽपि, ज्यायांसं वार्द्धकेन तम् ।
पृच्छद्यथाऽन्वहं तस्मादुपदेशान् स्वबुद्धये ॥९॥

एवं च तौ सहाऽऽयान्तौ, मार्गोत्थप्रतिबन्धतः ।
पितृपुत्रममत्वेन, गृहीतौ क्रमशो मिथः ॥१०॥

लक्ष्मीवासपुरासन्ने, ग्रामे वृद्धो वसत्यसौ ।
सम्भाष्य स्वं व्रजन् ग्रामं, कुमारेणाऽन्वयुज्यत ॥११॥

पितः ! कथय मे बुद्धिं, सर्वाऽपायाऽपकारिणीम् ।
ततः स प्राह वत्स ! त्वं, शृणु ते किं न कथ्यते ? ॥१२॥

पुरे प्रविशता शुद्धिः, प्रष्टव्या न स्ववेश्मनः ।
पश्चात्त्यक्त्वा त्वया पण्यं, प्रवेष्टव्यं पुरे नहि ॥१३॥

न विश्वासः कलत्रे च, कार्योऽथेति मतित्रयम् ।
कुर्यास्त्वं किञ्चिद्दुःसाध्ये, त्वमागच्छेर्मदन्तिकम् ॥१४॥

उपदिश्येति वृद्धोऽसौ, ययौ स्वं ग्राममेष तु ।
कुमारः स्वपुरोपान्तेऽद्राक्षीत् परिचितं नरम् ॥१५॥

कुटुम्बकौशलोत्कण्ठाऽवज्ञातवृद्धवाग् द्रुतम् ।
तमुपसृत्य पप्रच्छ, गृहे क्षेमोऽस्ति मामके ? ॥१६॥

मृता माता त्वदीयेति, तेनोक्ते दुःखभागसौ ।
पश्चात्त्यक्त्वा च भाण्डं स्वमत्वरिष्ट गृहं प्रति ॥१७॥

निशीथे स ययौ बद्धद्वारं सुप्तजनगृहम् ।
उच्चैः शब्दांस्ततश्चक्रे, जजागार न कोऽपि तु ॥१८॥

उपरि वाटकेनाऽप्यौत्सुक्यादेष चटन्नथ ।
स यामिकेन विज्ञातः, किं नु चौरश्चटत्यसौ ? ॥१९॥

तेनाऽऽहतः स भल्लेन, कुमारोऽधः पपात च ।
सम्भ्रमाच्च जजागार, गृहलोकोऽखिलोऽपि हि ॥२०॥

वीक्ष्योपलक्षितः सोऽथ, कुटुम्बेनाऽश्रुमोचिना ।
प्रहाराऽऽर्त्तोऽपि पप्रच्छ, रोगो मातुर्बभूव कः ? ॥२१॥

सम्भ्रमाद्गृहलोकस्तं, प्रोचे किमेतदुच्यते ? ।
सुप्ता माताऽस्ति गेहाऽन्तर्नाऽस्या रोगः कदाऽप्यभूत् ॥२२॥

केनाऽपि कथिता माता, मृता तेनेत्युदीरिते ।
लोकः प्राह मृता कर्मकरी मातेति योच्यते ॥२३॥

जागरित्वा ततो माता, ददत्याशिषमुच्चकैः ।
तमेत्यायतबाहुभ्यामाश्लिष्याऽङ्के न्यवेशयत् ॥२४॥

कुमारोऽपि समीक्ष्य स्वां, मातरं मुदमीयिवान् ।
यावदास्ते ततः कोऽपि, समेत्यैवमचीकथत् ॥२५॥

पण्यं सर्वं हि पाश्चात्त्यं, गृहीतं तस्करैर्बलात् ।
किञ्चिदेतन्मयाऽऽनीतं, गृह्णीतेत्यार्पयत् पुमान् ॥२६॥

कुमारोऽपि महाकष्टात्, प्राप्तं गतं च वीक्ष्य तत् ।
पूर्वाऽर्जितानि कर्माणि, बलवन्तीत्यमन्यत ॥२७॥

आगाद्गृहे च यद्वस्तु, श्रीकान्तायै तदापर्यत् ।
किञ्चिद्रूढप्रहारश्चाऽभूद्राजदर्शनोन्मनाः ॥२८॥

प्राभृतं किञ्चिदादाय, स ययौ नृपसंसदि ।
कृतप्रणामश्चोचितस्थाने पुर उपाविशत् ॥२९॥

राज्ञा पृष्टः कुमारः स्वं, यथावृत्तं व्यजिज्ञपत् ।
अथाऽऽह राजा किञ्चिद्भो !, दृष्टं देशेषु कौतुकम् ? ॥३०॥

कुमारः प्राह नाथैकं, दृष्टवानस्मि कौतुकम् ।
द्राक्षा यदैव चोप्यन्ते, तत्कालं च फलन्त्यमूः ॥३१॥

मन्त्री कूटप्रपञ्चाख्यः, कुमारभार्यया सह ।
क्रीडत्युपपतित्वेन, नित्यं तद्रक्तमानसः ॥३२॥

एनं विजित्य चेदेनां, गृह्णे तच्चारु मे भवेत् ।
दुष्टोऽभिलाषवान् प्राह, मिथ्याऽयं भाषते वणिक् ॥३३॥

कुत्राऽप्येतद्भवेद्राजन् !, बीजान्युप्तानि तत्क्षणात् ।
उद्‌गच्छन्ति विस्तृणन्ति, पुष्यन्ति च फलन्ति च ॥३४॥

राजा प्राह कुमार ! त्वं, ब्रूषे दृष्टं श्रुतं नु वा ? ।
स प्राह तन्मया दृष्टमनुभूतं च भूपते ! ॥३५॥

बीजानि नित्यशो मार्गेऽप्युप्त्वाऽकार्षं हि भोजनम् ।
एषु विस्तृतच्छायेषु, ततोऽस्वाप्सं फलान्यदन् ॥३६॥

सहाऽऽनीतानि बीजानि, सन्ति मुक्तानि वेश्मनि ।
दर्शयिष्यामि दृष्टान्तं, कार्यो नैवाऽत्र संशयः ॥३७॥

अथाऽऽह मन्त्री चेद्राजन् !, स्वां सन्धां पूरयेदयम् ।
यत्प्राग्गृहीतं तद्दोर्भ्यां, द्वाभ्यां ग्राह्यं हि मद्‌गृहात् ॥३८॥

अन्यथा तु मया ग्राह्यमिष्टं वस्त्वस्य मन्दिरात् ।
ततश्चोभयसाम्मत्यात्पत्रमलेखयन्नृपः ॥३९॥

मन्त्री प्रच्छन्नपुरुषाच्छ्रीकान्तापार्श्वतः क्षणात् ।
व्यत्ययात्तानि बीजानि, तदैवाऽऽनाययत्ततः ॥४०॥

मन्त्र्यभिप्रायस्याऽविज्ञः, कुमारः प्रैषयन्नरम् ।
आनेतुं तानि बीजानि, श्रीकान्तां सोऽप्ययाचत ॥४१॥

साऽन्यबीजानि निक्षिप्य, ग्रन्थिबद्धं तथैव तम् ।
नरायाऽऽर्पयदेषोऽपि, कुमारायाऽऽर्पयद्‌द्रुतम् ॥४२॥

ततश्चाऽऽस्थानशालायां, निक्षेप्य मृत्तिकां भुवि ।
क्षिप्त्वा बीजानि तत्रैष, सिषिंच स्वादुभिर्जलैः ॥४३॥

राज्ञि लोके च सौत्सुक्यं, पश्यति द्रुतमेव सः ।
उपर्यकारयद्वंशमण्डपं विस्तृतिप्रदम् ॥४४॥

आस्तामुद्गम्य विस्तारोऽभूदङ्कुरोद्गमोऽपि न ।
नोच्छ्वासोऽपि मृदः क्वाऽपि, यतो बीजविपर्ययः ॥४५॥

भूयो भूयः कुमारोऽथ, सिञ्चते वीक्षतेऽभितः ।
अङ्कुरमपि न क्वाऽपि, पश्यन्नासीद्विलक्ष्यवाक् ॥४६॥

राजन् ! पश्य कुमारस्य, सत्यतामिति मन्त्रिणा ।
प्रोक्ते जहास राजाऽथ, लोकोऽपि दत्ततालिकः ॥४७॥

कथं नु नोद्गतानीह, द्राक्षाबीजानि तान्यपि ? ।
इति विस्मयमापन्ने, कुमारे सचिवोऽब्रवीत् ॥४८॥

राजन् ! पत्रप्रमाणेन, हस्तग्राह्यं गृहेऽस्य यत् ।
तन्मे दापय यल्लोकप्रत्यक्षं स्वगृहं नये ॥४९॥

सचिवोक्त्यनुसारेण, कुमारोऽथाऽविदत्त्विदम् ।
मत्कान्तायामसौ लुब्धस्तामेवाऽभिलषत्यतः ॥५०॥

अनेन प्रार्थिता मन्ये, चक्रे बीजविपर्ययम् ।
श्रीकान्तैव सुरक्ताऽस्मिन्, बीजानि नोद्गतान्यतः ॥५१॥

धिग् धिग्मां येन तिस्रोऽपि, वृद्धशिक्षा हि विस्मृताः ।
सत्येनाऽनुभवो मेऽभूदकृते वृद्धभाषिते ॥५२॥

ततोऽधुनैव तं वृद्धमाहूय प्रश्नयाम्यहम् ।
यथा मन्त्री न मे कान्तां, गृह्णाति छललाभतः ॥५३॥

इत्यसौ मानुषं किञ्चित्, प्रहित्याऽकारयच्च तम् ।
न्यवेदयच्च तं तस्मै, मन्त्रिवृत्तान्तमात्मना ॥५४॥

मा भैषीरिति वृद्धेन, सम्यगङ्गीकृते ततः ।
कुमारः प्राप च स्वास्थ्यं, का भीर्धीमति रक्षके ? ॥५५॥

उत्सुकः प्राह मन्त्री च, राजन् ! किं नु विलम्ब्यते ।
आदिदेश ततो राजा, कुमारं त्वर्यतामिति ॥५६॥

यदादिशति मे स्वामीत्युक्त्वा वृद्धेन सोऽन्वितः ।
यद्रोचते तदभ्येत्य, गृह्णीतेत्याह मन्त्रिणम् ॥५७॥

स पौरलोकं राजानमादाय मन्त्रिराट् मुदा ।
ययौ कुमारगेहेऽथ, श्रीकान्तासक्तमानसः ॥५८॥

श्रीकान्ता मुमुदे तत्रोपागतं वीक्ष्य मन्त्रिणम् ।
ज्ञात्वा वृद्धश्च तद्भावं, श्रीकान्तामित्यभाषत ॥५९॥

वत्से ! रोदिति ते पुत्रस्तदादायैनमोकसः ।
ऊद्ध्र्वभूमौ क्षणं तिष्ठ, यावद्याति महीपतिः ॥६०॥

ततः कुमाराऽऽनुमता, श्रीकान्तोद्ध्र्वगृहे ययौ ।
मुमोचाऽन्यत्र निश्रेणिं, वृद्धो बुद्धिसमृद्धिभाक् ॥६१॥

आसीने सजने राज्ञि, कुमारो वस्तुवेश्मनि ।
सर्वं चाऽदर्शयत् किन्तु, मन्त्री किमपि नाऽग्रहीत् ॥६२॥

केवलं वीक्षते तां स, श्रीकान्तां भ्रान्तया दृशा ।
पुरो रत्नसुवर्णादि, न मन्त्री द्रष्टुमिच्छति ॥६३॥

ज्ञात्वा कुतोऽपि गेहोद्ध्र्वभूमिस्थां तां स मन्त्रिराट् ।
प्राह दृष्टमधो वस्तु, पश्याम्युपर्यपि स्वयम् ॥६४॥

श्रीकान्ताग्रहणौत्सुक्याद्दोर्भ्यां निश्रेणिमादधत् ।
अधिरोढुं प्रवृत्तश्च, प्रोक्तो वृद्धेन मन्त्रिराट् ॥६५॥

किं करिष्यसि भो ! मन्त्रिन्नारुह्योद्ध्र्वभुवं यतः ।
द्वाभ्यां दोर्भ्यां प्राग् यद्ग्राह्यं, सा निश्रेणिस्तवाऽभवत् ॥६६॥

नाऽन्यल्लभ्यं त्वया ह्यत्र, यदि पत्रप्रमाणता ।
द्वाभ्यां दोर्भ्यां यदात्तं, तद्ग्राह्यं तत्रेति निर्णयः ॥६७॥

श्रीकान्तां स जिघृक्षुश्च, वदन्नुच्चावचान्यथ ।
निषिद्धो भूभुजा पत्रप्रामाण्यात् सचिवस्ततः ॥६८॥

वृद्धः प्राह प्रभोऽनेन, प्रोक्तमासीदिदं किल ।
यद्ग्रहीष्यामि तल्लोकप्रत्यक्षं नेष्यते गृहे ॥६९॥

तदेनं नायय क्षिप्रं, निश्रेणिं दोर्धृतां गृहे ।
न्यायं पालयता राज्ञा, मन्त्री तत्कारितो बलात् ॥७०॥

कुमारेण ततो राजा, सम्मान्य प्राभृतेन सः ।
विसृष्टोऽगान्निजं सौधं, लोकोऽन्योऽपि तथैव हि ॥७१॥

कुमारेण स वृद्धोऽपि, प्रेषितोऽभ्यर्च्य वस्तुभिः ।
ज्ञाताऽस्म्यहमनेनेति, श्रीकान्ताऽमर्षमादधौ ॥७२॥

दत्त्वा विषं कुमारं सा, मारयामास निष्कृपा ।
आसक्ता सचिवेऽथाऽभूच्छ्रीकान्ता दुष्पतिव्रता ॥७३॥

दौःशील्यलौल्यविहितपतिमारणपापतः ।
प्राप्य दुःखं भवेऽत्रैव, श्रीकान्ता नरकं ययौ ॥७४॥

ततश्च येन लोकेऽस्मिन्निन्दा स्यादात्मनश्चिरम् ।
तद्दौःशील्यं त्यजेद्विद्वानिच्छन् शाश्वतिकं सुखम् ॥७५॥

**इति दौःशील्ये श्रीकान्ताकथा ॥**

# तपसि नागकेतुकथा ।

न नीचैर्जन्म स्यात् प्रभवति न रोगव्यतिकरो,
न चाऽप्यज्ञानत्वं विलसति न दारिद्र्यललितम् ।
पराभूतिर्न स्यात् किमपि न दुरापं किल
यतस्तदेवेष्टप्राप्तौ कुरुत निजशक्त्याऽपि सुतपः ॥१॥

तपःप्रभावाज्जन्तूनां, जायते किल शाश्वतम् ।
निर्वाणपदमाश्वेव, नागकेतोरिव ध्रुवम् ॥२॥

अस्ति पूश्चन्द्रकान्ताऽऽख्या, यत्र चन्द्रोदये सति ।
चन्द्रकान्तगृहप्रोद्यत्सुधास्नानसुखी जनः ॥३॥

राजा विजयसेनाऽऽख्यस्तत्राऽस्ति यस्य सेनया ।
उन्मूल्य द्विषतः क्षिप्ता, द्रुमा नद्येव पूर्णया ॥४॥

तत्र चाऽस्ति वणिग्मुख्यः, श्रीकान्ताऽऽख्यः समृद्धिभाक् ।
श्रीसखी नाम तद्भार्या, पतिव्रता व्रतप्रिया ॥५॥

उपयाचितानां लक्षैस्तस्या जातः सुतः क्रमात् ।
बभूव च तथाऽऽसन्नं, पूज्यं पर्युषणादिनम् ॥६॥

करिष्यामोऽष्टमतपोऽत्रेति कुटुम्बभाषितम् ।
श्रुत्वा स बालको जातिस्मृत्या प्रत्यशृणोदिति ॥७॥

उपवासा मया कार्यास्त्रयः पेयं पयोऽपि न ।
इति निश्चित्य स स्तन्यं, न पिबति न रोदिति ॥८॥

साऽस्त्रं मात्रा ततः पत्युः, कथिते सोऽप्यचीकरत् ।
बाले चिकित्सावेदिभ्य, उपचारान् बहूनपि ॥९॥

ततोऽपि नैष जग्राह, स्तन्यं कृततपोविधिः ।
ततश्च मूर्च्छया बालो, निश्चेष्टोऽभूत् क्रमात् क्रमात् ॥१०॥

मूर्च्छयाच्छन्नजीवं तं, मृतमिति धिया शिशुम् ।
न्यखनन् भुवि तद्वंश्या, निधानमिव दुर्लभम् ॥११॥

इतश्चाऽवधिना पश्यन्, धरणेन्द्रः शिशुं ह्यमुम् ।
अज्ञासीदस्य वृत्तान्तं, प्रारभ्य पूर्वजन्मनः ॥१२॥

तथाह्ययं भवे पूर्वे, कस्याऽपि वणिजोऽभवत् ।
सुतत्वेन ततो माता, मृता बाल्येऽस्य दैवतः ॥१३॥

अस्ति तस्य विमाता तु, विमानयति साऽपि तम् ।
भोजनादिषु स्तोके चाऽपराधे क्रुध्यति स्फुटम् ॥१४॥

क्रमेण यौवनं प्राप्य, जानन्मानाऽपमानताम् ।
विमातुर्दुर्वचांस्येष, कस्याऽपि च न्यवेदयत् ॥१५॥

तेनोचे चेत्तपः सम्यक्कृतं स्यात् पूर्वजन्मनि ।
आत्मा पराभवस्थानं, कस्याऽपि स्यान्न तत्स्फुटम् ॥१६॥

श्रुत्वेति स यथाशक्ति तपश्चक्रे विनीतवाक् ।
मानाऽपमानौ सन्त्यज्य, लीनोऽभूत्तपसि स्वयम् ॥१७॥

एकदा तृणगेहाऽन्तः, स्मरन् पञ्चनमस्कृतिम् ।
पर्युषणादिनेऽवश्यं, करिष्ये ह्यष्टमं तपः ॥१८॥

इत्येतद्ध्यानवान् यावदस्त्येष तावदन्यतः ।
अभूत् प्रदीपनं वायुसाहाय्याद्गेहदीपनम् ॥१९॥

ततो वायुवशाद्वह्निावन्यतो याति सत्वरम् ।
विमाता तस्य दध्यौ सा, यदुपायोऽस्ति सम्प्रति ॥२०॥

अस्मात् प्रदीपनव्याजान्निक्षिप्याऽग्निं कुटीरके ।
मारयामि सपत्नीजं, मनःशल्यं यदेष मे ॥२१॥

इति दूरस्थया क्षिप्तस्तया वह्निः कुटीरके ।
स तथैव तपोध्याने, लीनः प्रज्वलितः क्षणात् ॥२२॥

तपोध्यानैकचित्तत्वादविज्ञायाऽनलव्यथाम् ।
मृत्वा जज्ञे सुतत्वेन, श्रीकान्तस्य त्वपुत्रिणः ॥२३॥

तदेष पूर्वसंस्काराच्छ्रुत्वा पर्युषणादिनम् ।
चक्रेऽष्टमतपः स्वेन, पूर्वप्रतिश्रुतं शिशुः ॥२४॥

मूर्च्छितत्वान्मृतः कृत्वा, पितृभ्यां निहितो भुवि ।
यावन्नाऽद्याऽपि म्रियते, तावत् सञ्जीवयाम्यमुम् ॥२५॥

ध्यात्वेति धरणेन्द्रोऽथ, भून्यस्तमेव तं शिशुम् ।
अरक्षन्निजशक्त्या तु, यथा स म्रियते नहि ॥२६॥

ततश्च तच्छिशुपिता, श्रीकान्तः पुत्रमृत्युना ।
जाते हृदयसङ्घट्टे, मृत्युमापत् क्षणादपि ॥२७॥

ततो विजयसेनाऽऽख्यो, राजा विज्ञाय तं मृतम् ।
अपुत्रमृतसर्वस्वग्रहणायाऽऽदिशन्नरान् ॥२८॥

ते राजपुरुषाः क्रूराः, श्रीकान्तस्य गृहाद्धनम् ।
गृह्णन्तो धरणेन्द्रेण, पुरुषीभूय वारिताः ॥२९॥

तैरेत्य कथितं राज्ञो, राजाऽपि स्वयमेत्य तम् ।
धरणेन्द्रमुवाचाऽऽशु, किं व्याषेधं करोषि भोः !? ॥३०॥

अथाऽऽह धरणेन्द्रोऽपि, राजन् ! गृह्णासि किं धनम् ? ।
निर्वीरायाः स्त्रिया अस्या, दयाहीनोऽसि किं नृप !? ॥३१॥

राजा प्राह महाभाग !, देशाऽऽचारोऽयमत्र हि ।
अपुत्रो यो म्रियेताऽऽशु, राजा गृह्णाति तद्धनम् ॥३२॥

उवाच धरणेन्द्रोऽथ, जीवन्नस्त्यस्य पुत्रकः ।
राजाऽऽह क्वास्ते ? स प्राह, निखातोऽस्तीह रत्नवत् ॥३३॥

ततश्च राज्ञोत्खानिते, पुत्रे जीवति रोदिति ।
आगत्य श्रीसखी दत्ताऽऽशीर्वादा तमदीधपत् ॥३४॥

धृत्वा च धरणेन्द्रोऽपि, स्वरूपं तस्य तां कथाम् ।
राज्ञे निवेद्य बालाय, दत्त्वा हारं तिरोदधे ॥३५॥

श्रुतया कथया तस्य, राजा विस्मयमादधत् ।
यत्नेनाऽयं शिशुः पाल्यः, इत्यादिश्य ययौ गृहान् [हम्] ॥३६॥

श्रीकान्तस्य कृते शीघ्रं, स्वजनैरौद्ध्र्वदेहिके ।
नागकेतुरिति प्रीत्या, दत्तं नाम शिशोस्तदा ॥३७॥

चतुष्पर्व्यां च बालोऽपि, चतुर्थं कुरुते तपः ।
सः चतुर्मासके षष्ठं, पर्युषणादिनेऽष्टमम् ॥३८॥

कुर्वन्नेव सदाप्येष, नागकेतुर्जितेन्द्रियः ।
यौवनेऽपि ययौ नैव, विकारं मान्मथं क्वचित् ॥३९॥

जिनेन्द्रपूजानिरतः, साधूपासनतत्परः ।
सामायिकपौषधाऽऽदिव्रतान्यपालयत् सदा ॥४०॥

अन्यदा विजयसेननृपेण कोऽपि सत्पुमान् ।
चोरीकारकलङ्केन, व्यापादितश्चतुष्पथे ॥४१॥

आर्त्तध्यानात् स मृत्वाऽभूद्व्यन्तरोऽवधिना ततः ।
स विज्ञाय स्ववृत्तान्तं, चुकोप भूभुजे भृशम् ॥४२॥

राजानं च सभाऽऽसीनमागत्याऽदृश्यरूपभृत् ।
आहत्य पार्ष्णिना बाढं, व्यन्तरोऽपातयद्भुवि ॥४३॥

व्यन्तरेणाऽऽहतो राजा, चक्रन्दोच्चैर्वमन्नसृक् ।
बभूव च सभालोकः, किमेतदिति भीवृतः ॥४४॥

अथाऽसौ व्यन्तरो यावन्नगरं तावतीं शिलाम् ।
विकुर्व्य गगने लोकं, भीषयामास दुर्गिरा ॥४५॥

नागकेतुस्ततो दध्यौ, सङ्घोऽस्त्यत्र चतुर्विधः ।
जिनबिम्बाऽऽगमौकांसि, तद्भाव्येषां क्षयो ध्रुवम् ॥४६॥

उच्चैः प्रासादमारूढः, शिलां स्खलामि पाणिना ।
इति तां व्यन्तरमुक्तां, तपःशक्त्या दधौ शिलाम् ॥४७॥

व्यन्तरस्तत्तपःशक्तिं, व्यालोक्याऽऽकुलमानसः ।
एत्य तं प्रणनामोच्चैः, सञ्जहार शिलां च ताम् ॥४८॥

वचनान्नागकेतोश्च, व्यन्तरः शान्तिमीयिवान् ।
राजानं च पटूकृत्य, द्राग् ययौ स्थानमात्मनः ॥४९॥

तपोलब्ध्या नृपस्याऽपि, नमस्कर्तव्यतां गतः ।
नागकेतुरथाऽन्येद्युः, श्रीजैनभुवने ययौ ॥५०॥

यथाविधि जिनेन्द्रस्य, पूजां कुर्वन्तमात्मना ।
पुष्पमध्यस्थितः सर्पस्तं ददंशाऽङ्गुलौ दृढम् ॥५१॥

नागकेतुर्गताऽऽशङ्कस्तं सर्प्पं न्यस्य कुत्रचित् ।
जिनेन्द्रमूर्तेः पुरतो, ध्यानमालम्ब्य तस्थिवान् ॥५२॥

पवनविजयाद्धीनं, ममार तन्मनः क्षणात् ।
घातिकर्मक्षयाज्जातं, केवलज्ञानमस्य च ॥५३॥

ततः शासनदेव्याऽस्य, चारित्रलिङ्गमर्पितम् ।
भव्यान् प्रबोधयन् सैष, विजहार भुवस्तले ॥५४॥

इह लोके परलोके यद्दुष्प्रापं च सारभूतं च ।
तत्तपसा सुलभं स्यात्तपसि यतध्वं ततो भावात् ॥५५॥

**इति तपसि नागकेतुकथा ॥**

# अतपसि मानपुञ्जकथा ।

यस्तु कुर्यान्न शक्त्याऽपि, तपःकर्म सुधर्मकृत् ।
सोऽपमानपदं गच्छेन्मानपुञ्जपुमानिव ॥१॥

अस्ति पूः कमला नाम, यत्र धर्मरता जनाः ।
मानपुञ्जाऽभिधोऽत्राऽस्ति, पुमान् गीतप्रियः सदा ॥२॥

द्रव्येणाऽऽकार्य गीतज्ञान्, प्रगायन् गापयत्यसौ ।
इत्थं सर्वं धनं तेन, भक्षितं गीतमोहिना ॥३॥

क्षीणद्रव्यो नृणामग्रे, गायनीभूय गायति ।
यत्तत्र लभते वित्तं, विटभोज्यं करोति तत् ॥४॥

दासीमेकामथाऽऽदाय, ययौ देशान्तरं प्रति ।
पुरे ग्रामे परिभ्राम्यन्, गायनत्वेन जीवति ॥५॥

कस्याऽपि राजपुत्रस्य, गीतविश्रम्भमीयुषः ।
मानपुञ्जेन मुक्तास्रक्, चोरिताऽभूद्दुरात्मना ॥६॥

राजपुत्रेण विज्ञाय कलावित्त्वाद्धतो नहि ।
किन्तु निर्वास्य मुक्तोऽथ, लज्जया स ययौ वनम् ॥७॥

फलाऽऽहारेण तत्राऽयं, जीवन् दासीयुतो वने ।
कलगीतेन हरिणानाकर्षति सुदूरतः ॥८॥

निष्ठितेषु फलेष्वेष, विश्रब्धान् हरिणांस्ततः ।
व्यापाद्य बुभुजे मांसं, नित्यशोऽपि स लोलुपः ॥९॥

तमाह दासी किं न्वेतान्, विश्वस्तान् हंसि नित्यशः ? ।
चलाऽन्यत्र पुरे क्वाऽपि, भविता तत्र भोजनम् ॥१०॥

मांसलुब्धस्तु पापीयान्, वनं त्यजति नैष तत् ।
तल्लुब्धा तदेकप्राणा, न तं त्यजति दास्यपि ॥११॥

एकदा च वने तत्र, शुकद्वन्द्वं कुतोऽपि हि ।
समागत्योपविष्टं तन्मानपुञ्जाऽऽश्रितं तरुम् ॥१२॥

शुकः प्राह शुकीमद्य, चतुर्मासकपर्व तत् ।
उपवासोऽद्य मे त्वं तु, भोक्ष्यसे यदि भुङ्क्ष्व तत् ॥१३॥

शुक्याह तदहं नाऽभिभोक्ष्ये स्थास्याम्युपोषिता ।
भुज्यमानं सदैवाऽऽस्ते, तत्कार्यं सुदिने तपः ॥१४॥

इति शुकशुकीवाचमाकर्ण्य दास्यचिन्तयत् ।
अहो ! बतैतयोः पश्य, तिरश्चोर्नियमः कियान् ? ॥१५॥

उत्पन्ना मानुषत्वेऽपि, तपोऽकार्षं कदाऽपि न ।
पशून् व्यापाद्य खादन्तः, पशवो वयमेव हि ॥१६॥

अद्य तपोदिने त्वाभ्यां, कथिते न मया खलु ।
भोक्तव्यं नाऽपि पत्येऽस्मै, पक्तव्यं मांसमात्मना ॥१७॥

इति निश्चयमादाय, दासी यावत् स्थिताऽस्ति सा ।
तावद्धन्तुं मृगं मानपुञ्जः कृताऽऽयुधोऽभवत् ॥१८॥

तमाह दासी मा माऽद्य, व्यापादय मृगं हहा !! ।
कृतं शुकाभ्यामप्यद्य, चतुर्मासीदिने तपः ॥१९॥

तेन वारितवामेन, प्रत्युत क्रौर्यमीयुषा ।
दास्याः सविधमानीय, मृगो व्यापादितो बलात् ॥२०॥

मांसं पचेति तेनोक्ता, पक्ष्ये नाऽद्येति साऽब्रवीत् ।
मया चक्रे तपः सर्वपापाऽऽरम्भविरामतः ॥२१॥

पक्त्वा स्वेनैव भुञ्जाने, मानपुञ्जे ततः शुकः ।
दध्यौ द्वाभ्यां श्रुता वाग्मे, परं दासी व्यधात्तपः ॥२२॥

मृगी चेयं वने जन्म, मुधा क्षिपति तन्मया ।
कर्त्तव्या कीर्त्तिराजस्य, राजपुत्रस्य गेहिनी ॥२३॥

निश्चित्येति दिनं तत्र, स्थित्वा सदयितः शुकः ।
ययौ वज्रपुरे यत्र, कीर्त्तिराजोऽस्ति राजसूः ॥२४॥

एह्येहि शुकराज ! त्वं, स्वागतं भवतः किल ।
कीर्त्तिराजे वदत्येवं, शुको नत्वाऽब्रवीदिति ॥२५॥

त्वदादेशाच्छुकीमेनामादायाऽऽगच्छता मया ।
प्रत्यासन्नवने दृष्टा, स्त्री दिव्यरूपधारिणी ॥२६॥

ततश्च कीर्त्तिराजेन, शुकेन सहिता नराः ।
प्रेषितास्तत्र कान्तारे, तामानेतुं क्षणादपि ॥२७॥

मांसाहारे च सा मानपुञ्जे विरक्तमानसा ।
प्रोक्ता शुकेन हे सुभ्रु !, राजपत्नी भवाऽधुना ॥२८॥

चल वज्रपुरे कीर्त्तिराजस्त्वां स्वीकरिष्यति ।
भुङ्क्ष्व संसारसौख्यानि, धर्माऽर्थकामभाग् भव ॥२९॥

शुके प्रत्ययिता साऽथ, मानपुञ्जे गतेऽन्यतः ।
सशुकैः पुरुषैः सार्द्धं, कीर्त्तिराजगृहं ययौ ॥३०॥

पुण्येन वल्लभा साऽभूत्, कीर्त्तिराजस्य सर्वदा ।
ततो मनसि सा दध्यौ, तदेतत्तपसः फलम् ॥३१॥

तया प्रत्ययमाख्याय, तपसि प्रेरितस्ततः ।
राजलोको यथाशक्त्या, चतुर्मासे तपो व्यधात् ॥३२॥

इतश्च मानपुञ्जः स, वियुक्तोऽपि तया सह ।
तत्रैणमांसलुब्धत्वाद्वनेऽस्थादेककोऽपि हि ॥३३॥

वर्षाऽऽरम्भेऽन्यदा तस्याऽऽकण्ठं मांसस्य भक्षणात् ।
अभूदुच्छ्वाससंरोधः, पपात निस्सहो भुवि ॥३४॥

तदैव पूरपूर्णायाः, सरितः श्रोतसा हृतः ।
वज्राऽऽख्यपूःसमीपस्थे, तटे क्वाऽप्यथ सोऽलगत् ॥३५॥

तदा च कीर्त्तिराजस्य, प्रतिस्कन्धिनराः कति ।
तत्राऽऽगतास्तमद्राक्षुर्निन्युश्च दयया गृहान् ॥३६॥

औषधाऽऽद्युपचारेण, कथञ्चिज्जीवितः स तैः ।
तेषामेव गृहेष्वस्थात्तत्पुत्र्यासक्तमानसः ॥३७॥

स च तैर्नीयते वोढुं, कीर्त्तिराजसुखाऽऽसनम् ।
उच्छिष्टं भोज्यते स्थालक्षालनं कार्यते सदा ॥३८॥

तत्राऽन्यदपि यन्नीचकार्यं स कार्यते भृशम् ।
तत्करोति विमूढाऽऽत्मा, तत्पुत्रीस्नेहलम्पटः ॥३९॥

कीर्त्तिराजेऽन्यदा हर्षाच्चलिते वनमीक्षितुम् ।
मानपुञ्जः श्वशुरेण, न्ययोज्यत सुखाऽऽसने ॥४०॥

या तस्य प्राक् प्रिया दासी, कीर्त्तिराजप्रियाऽभवत् ।
ढौकिते तेन साऽरुक्षत्तद्वस्त्रप्रावृतं मृदु ॥४१॥

अग्रतो गीयमानेन, गीतेनौजायिताऽऽशया ।
जगामोद्यानमध्यस्थश्रीजैनभुवनाऽग्रतः ॥४२॥

दासीभिर्दत्तहस्ताऽसावुत्ततार सुखाऽऽसनात् ।
ददृशे मानपुञ्जेन, ममेयं सा प्रिया खलु ॥४३॥

अहो ! पुण्यमहो ! पुण्यं, दासीमात्राऽप्यसौ यतः ।
अस्मिन्नेव भवे जाता, स्नेहपात्रं नृपप्रिया ॥४४॥

अहं त्वभूवमेतस्याः, सुखाऽऽसनस्य वाहकः ।
अत्र तिष्ठन्नहं लज्जे, मानपुञ्जोऽस्म्यहं यतः ॥४५॥

सुखाऽऽसनं परित्यज्याऽन्यत्र क्वाऽपि व्रजाम्यहम् ।
इति सोऽगाद्वने क्वाऽपि, ददर्श च मुनीनसौ ॥४६॥

मुनीनानम्य सोऽप्राक्षीद्धर्मं कथयत प्रभो ! ।
तैराख्यायि तपः कार्यं, यथाशक्त्या हितैषिणा ॥४७॥

मुनीनामग्रतः कृत्वैकभक्तं नित्यशोऽपि सः ।
अहर्निशं फलान्याददद्रसनेन्द्रियलौल्यतः ॥४८॥

एवं मायातपः कुर्वन्नेष मृत्वा पुरे क्वचित् ।
निःस्वनीचकुले जज्ञे, स्त्रीत्वेन स ततः परम् ॥४९॥

अङ्गोपाङ्गेषु सा व्याधिबाधाकीलककीलिता ।
आजन्मदिवसात्कष्टं, जुगुप्साऽङ्गी विवर्द्धते ॥५०॥

परप्रेष्यतया जन्म, क्षिपन्ती भाग्यवर्जिता ।
दुःखदौर्भाग्यदौर्गत्यभाजनं साऽभवत्ततः ॥५१॥

तस्मिन्नपि भवे दौःस्थ्यात्, कृत्वा कर्माऽशुभं महत् ।
आयुःक्षयेण सा मृत्वा, तृतीये नरके ययौ ॥५२॥

विना हि तपसा जीवः, प्राप्नोति न समीहितम् ।
तपश्छिनत्ति दुष्कर्म, तद्यतध्वं तपोविधौ ॥५३॥

**इत्यतपसि मानपुञ्जकथा ॥**

# भावनायां असम्मतकथा ।

मुक्तषट्जीवहिंसाऽङ्घ्रिर्भावनामालतीं गतः ।
आत्माऽयं भ्रमरो गच्छेद्रसाऽऽस्वादेन निर्वृतिम् ॥१॥

भवाऽन्तरसहस्रेषु, भ्रमणाद्रजसावृतः ।
भावनासरिति स्नायाच्चेदात्मा तच्छुचिर्भवेत् ॥२॥

यावत्प्राप्नोति नाऽऽत्माऽयं, भावनामुखचुम्बनम् ।
तावदन्यत्र संसक्तिः, स्यादस्येति न संशयः ॥३॥

यद्यात्मनि प्रसद्याऽऽत्मा, स्वीकरिष्यति भावनाम् ।
तदाऽयं लप्स्यते स्वार्थमसम्मतनराऽऽत्मवत् ॥४॥

अस्ति रत्नपुरे राजा, न्यायवानरिमर्दनः ।
यद्भ्रूभङ्गेन भङ्गः स्यात् ससैन्यानामपि द्विषाम् ॥५॥

ललिताऽङ्गः कुमारोऽस्ति, राज्ञोऽस्य प्राणवल्लभः ।
वसन्तसमये रत्नमुद्यानं सोऽन्यदा ययौ ॥६॥

क्रीडता तेन तत्रैका, ददृशे मन्त्रिगेहिनी ।
प्रशान्तस्याऽपि तस्याऽस्यां, बभूव मनसो रतिः ॥७॥

प्रेष्य मित्रं कथं तन्वि !, भावी नौ सङ्गमः क्व वा ? ।
अपप्रच्छत् कुमारस्तां, साऽपि प्राहाऽनुरागिणी ॥८॥

निःसर्त्तुं न गृहान्मेऽस्ति, क्षणो यदस्मि वेष्टिता ।
ईर्ष्यालुपतिनाऽस्या दृक् क्व यातीत्यवलोकिना ॥९॥

परमेको ह्युपायोऽस्ति, प्रेमकार्योऽतिदुष्करः ।
मत्सौधोपाऽन्ते कूपोऽस्ति, सुरङ्गा तत्र दाप्यताम् ॥१०॥

कूपाऽन्तःपुरुषाः स्थाप्याः, सुरङ्गायां च तारकाः ।
सार्द्धं कुटुम्बलोकेन, करिष्ये कलहं ततः ॥११॥

रुषित्वैकान्तमाश्रित्य, त्यक्त्वा लोकदृशं भृशम् ।
कूपे तत्र पतिष्यामि, सुरङ्गापुरुषैस्ततः ॥१२॥

पतन्त्येवाऽहमादेया, सुरङ्गानिःसृता क्षणात् ।
एष्याम्यहं कुमारस्य, सौधे सङ्गाऽभिलाषुका ॥१३॥

इति सङ्केतमाख्याय, तन्मित्रं च विसृज्य सा ।
क्रीडित्वा क्षणमुद्याने, ययौ द्राक् सौधमात्मनः ॥१४॥

कृत्रिमं कलहं कृत्वा, केनाऽप्यलक्षिताऽन्यदा ।
साऽयं कूपे ददौ झम्पां, सुरङ्गापुरुषैस्ततः ॥१५॥

पतन्त्येव गृहीता सा, नीता कुमारवेश्मनि ।
कथितं तैः कुमारस्य, पुरो राज्ञो निषेदुषः ॥१६॥

इतश्च पतितां कूपे, तां ज्ञात्वा मन्त्रिराडथ ।
पुरुषैः शोधयामास, नाऽदृश्यतावटे परम् ॥१७॥

पुरे वार्त्ता बभूवैषा, ज्ञातं राज्ञा च तत्तथा ।
स्त्रीहत्यापातकीत्येवं, राज्ञा मन्त्री न्यगृह्यत ॥१८॥

अलुण्ट्यत च सर्वस्वं, व्यडम्ब्यत कुटुम्बकम् ।
विलोक्यैवं कुमारोऽथ, चिन्तयामास चेतसि ॥१९॥

धिग् धिग् निरपराधोऽयं, नृपेणाऽजानता स्फुटम् ।
व्यापादितो हहा !! मन्त्री, स्त्रीनिमित्ते मदागसि ॥२०॥

धिग्मां येन रता यैषा, स्त्री स्त्रीव्यसनिनाऽर्थिना ।
धिगेनां च यया चक्रे, कूपपातादुपायता ॥२१॥

नाऽतः परं मया स्थेयं, गृहवासेऽत्र दुस्तरे ।
स्त्रीजाले पतितो मर्त्यो, मत्स्यवत् को न बध्यते ? ॥२२॥

विचिन्त्येति कुमारोऽथ, तामनुक्त्वैव सन्त्यजन् ।
यौवराज्यं परित्यज्य, विरागान्निर्ययौ पुरात् ॥२३॥

एकाकी स व्रजन् क्वाऽपि, वने साधुं ददर्श च ।
तं नत्वाऽऽह कुमारोऽथ, वैराग्याऽऽर्द्रमना मृदु ॥२४॥

व्यसनाऽतिभराऽऽक्रान्तं, मज्जन्तं मां भवाऽम्बुधौ ।
परमार्थोपदेशेन, साधो ! निस्तारयाऽधुना ॥२५॥

इति तेनाऽर्थितः साधुर्यतिधर्मं दिदेश सः ।
अगृह्णाच्च कुमारोऽथ, प्रव्रज्यां मुक्तिदूतिकाम् ॥२६॥

ओजायितमनाः सम्यग्, पश्यन् शुद्धिभाक् त्रिधा ।
ययौ क्षेमपुरे तत्रोद्यानेऽस्थात् प्रतिमाधरः ॥२७॥

पुरे तस्मिन्नथैकोऽस्ति, धनदुर्ललितः पुमान् ।
असम्मताऽऽख्यो यस्याऽभूत्, किञ्चनाऽपि न सम्मतम् ॥२८॥

मनुते पितरं नैव, मातरं भ्रातरं न च ।
न गुरून् देवतां नैव, महानास्तिकवादभृत् ॥२९॥

न जीवो न च पुण्यं च, न स्वर्गा नरकाश्च न ।
किन्तु भूतयोगाऽयोगाद्वस्त्वस्ति नाऽस्ति च स्थितेः ॥३०॥

वाग्मित्वेन धनित्वेन, निराकुर्वन्नसौ जगत् ।
देवानुत्थापयन् साधूनवजानन्नगान्मदम् ॥३१॥

इतश्च बहिरुद्याने, मुनौ तस्मिन्नवस्थिते ।
अकस्मादेव स महान्नद्यां पूरः समाययौ ॥३२॥

अगाधे पूरपयसि, तस्मिन् ममज्जुरङ्घ्रिपाः ।
क्रीडाशिखरिणश्चाऽन्ये, न ममज्ज मुनिः पुनः ॥३३॥

लोको विसिष्मिये दृष्ट्वा, साधुं जलोपरि स्थितम् ।
अहो ! तपःप्रभावोऽयं, साधुरुद्ध्वो जलेऽस्ति यत् ॥३४॥

पूरे कालान्निवृत्ते च, तथैवाऽऽस्ते मुनिर्भुवि ।
तपःप्रभावादासन्नाः, सान्निध्यं व्यन्तरा व्यधुः ॥३५॥

स दृष्टप्रत्ययो लोकस्तं साधुं द्राग् नमस्यति ।
जाते रोगे च तत्पादरजसा पटुता भवेत् ॥३६॥

असम्मतो नास्तिकत्वान्मुनावनुशयं दधन् ।
तपःप्रभावोऽप्यत्राऽस्तीत्यालोकनमतिं दधौ ॥३७॥

शृङ्खलाभिर्मुनेः पादौ, बद्ध्वा काष्ठतृणेषु सः ।
रात्रावसम्मतस्तत्र, वह्निमुज्ज्वालयत् क्षणात् ॥३८॥

उज्ज्वालः सोऽज्वलद्वह्निरार्द्रानपि तरून् दहन् ।
साधुं प्रदक्षिणीचक्रे, भक्त्यैव परितः स्फुरन् ॥३९॥

अन्यदार्द्रमनार्द्रं वा, ददाह दहनः क्षणात् ।
तपःप्रभावान्नाऽधाक्षीन्मुने रोमाऽपि सोऽनलः ॥४०॥

दवीयसि स्थितो देशेऽसम्मतो मुनिमैक्षत ।
वह्नेः परिवेषाऽन्तःस्थं, ध्याने लीनं तथैव हि ॥४१॥

तपःप्रभावं वीक्ष्याऽसौ, नास्तिकोऽपि चमत्कृतः ।
तस्मिन् साधौ दधौ श्रद्धां, तपसा को न रज्यते ? ॥४२॥

निर्वाणेऽग्नौ ततः शीघ्रमागत्याऽसम्मतः पुमान् ।
पपात पादयोः साधोर्भूतलन्यस्तमस्तकः ॥४३॥

मुनेश्च पादयोर्बद्धां, सुदृढां लोहशृङ्खलाम् ।
स्वेनैवच्छोटयन् प्राप, चिन्तामेतादृशीं हृदि ॥४४॥

यथा ह्यस्य मुनेः कायो, नदीपूरे ममज्ज न ।
न चाऽनेनाऽग्निना दग्धो, मनागपि तथा खलु ॥४५॥

मन्येऽन्यस्याऽपि विघ्नास्तु, दूरे स्युस्तपसैव हि ।
लोके यान्यत्र सौख्यानि, तपसा तान्यपि ध्रुवम् ॥४६॥

ईदृशं न तपश्चक्रे, यैर्मन्ये तेऽत्र दुःखिनः ।
यैस्तु चक्रे तपस्तांस्तु, पश्यन्नस्मि सुतेजसः ॥४७॥

भवेऽस्मिन्न तपश्चक्रे, परमास्ते प्रतापवान् ।
पूर्वचीर्णस्य तन्मन्ये, प्रभावं तपसो ह्यदः ॥४८॥

ततश्चाऽऽत्माऽस्ति यस्य स्यात्, स्वकृततपसः फलम् ।
भुङ्क्ते भवान्तरेष्वेत्य, ततः पुण्यं च मन्यते ॥४९॥

पुण्यात् सम्भाव्यते स्वर्गो, यथा स्वर्गस्तथाऽऽत्मनः ।
शाश्वतं स्थानमाख्यायि, योऽसौ मोक्षोऽस्ति सोऽपि हि ॥५०॥

इति तत्त्वे मनो लीनं, तथा तस्य महात्मनः ।
यथा मोक्षाऽर्गलाघातिकर्मव्रातो ह्यभज्यत ॥५१॥

ततो मोक्षप्रतीहारकेवलज्ञानमुज्ज्वलम् ।
प्रादुरासीत् क्षणादेवाऽसम्मतस्याऽपि सम्मतम् ॥५२॥

चराचरं जगत्तस्य, पश्यतः केवलात्स्फुटम् ।
शासनदेवताऽथैत्य, चारित्रलिङ्गमार्पयत् ॥५३॥

स तेन साधुना देवैरसुरैर्व्यन्तरैर्नरैः ।
भावेन प्रणतश्चक्रे, तत्त्वार्थधर्मदेशनाम् ॥५४॥

इति स सर्वतः कुर्वन्, प्रतिबोधं शरीरिणाम् ।
विजहार भुवं भव्यपद्माकरदिवाकरः ॥५५॥

**इति भावनायां असम्मतकथा ॥**

# अभावनायां वरुणकथा ।

विना तु भावनां जन्तोर्ददतोऽथ तपस्यतः ।
देवं पूजयतः साधून्, नमतोऽपि फलं नहि ॥१॥

निर्लावण्या यथा नारी, निस्तेजाश्च मणिः पुनः ।
निर्भावश्चित्रवद्धर्मो, वरुणस्येव निष्फलः ॥२॥

गन्धर्वपुरमस्तीह, तत्राऽस्ति विजयो नृपः ।
यद्बाहुदण्डे चण्डेऽपि, सुखेन श्रीर्वसत्यहो ! ॥३॥

तस्य राज्ये क्रमस्त्वेष, राजा दीपोत्सवे निशि ।
उपोषितो गोत्रदेवीमूर्त्तेरग्रे स्वपित्यथ ॥४॥

स्वप्ने सा कुलदेवी तु, ब्रूते वर्षगताऽऽयतिम् ।
शुभां वाऽप्यशुभां वाऽपि, तथा राजा प्रवर्तते ॥५॥

एवं विजयराजोऽपि, प्रतिदीपोत्सवं निशि ।
शेते पश्यति च स्वप्ने, वत्सराऽवधिमायतिम् ॥६॥

अन्यदा स नृपः सुप्तो, गोत्रदेवी त्वचीकथत् ।
स्वप्ने शुभाऽशुभं भावि, जजागार नृपस्ततः ॥७॥

प्रातःकृत्यं नृपः कृत्वा, यावत् संसदमासदत् ।
विसस्मार नृपस्याऽथ, स स्वप्नस्तत्क्षणादपि ॥८॥

निमील्य चक्षुषी चित्तैकाग्र्यादपि नृपः स्मरन् ।
न सस्मार तं स्वप्नं, निदध्यावाकुलस्ततः ॥९॥

संवत्सरेऽत्र यद्भावि, तद्देव्याऽऽख्यायि मेऽग्रतः ।
अधन्यस्य ममेदानीं, विस्मृतं हाऽत्र का गतिः ? ॥१०॥

ततोऽमात्यान्नृपः स्वप्नं, पप्रच्छ ब्रूत को मम ।
गोत्रदेव्या किलाऽऽख्यायि, स्वप्नः कीदृक्फलश्च सः ? ॥११॥

विज्ञायते कथं स्वामिन् !, स्वप्नोऽस्माभिस्त्वयेक्षितः ।
ज्ञानवेद्यो ह्यसौ बुद्ध्या, ज्ञायते नैव भूपते ! ॥१२॥

ततश्च डिण्डिमं राजाऽवादयच्चेति सर्वतः ।
यः स्वप्नं कथयत्येनं, स्वर्णलक्षाऽस्य दीयते ॥१३॥

ततश्च मन्त्रिणोऽन्येऽपि, चूडामण्यादिवेदिनः ।
शकुनप्रश्नहोराभिर्निरीक्षन्ते दिवानिशम् ॥१४॥

न कोऽपि लभते स्वप्नं, ततश्च कोऽपि मन्त्र्यथ ।
भक्तिं नगरदेवानां, ज्ञातुं स्वप्नं चकार सः ॥१५॥

देवो न कोऽपि चाऽऽचख्यौ, स्वप्नवार्तामपि स्फुटम् ।
ततः स मन्त्री बाह्यस्थं, यक्षमेकं विलोक्य तु ॥१६॥

दध्यौ यदस्य यक्षस्य, भग्नं वेश्माऽपि सर्वतः ।
मूर्त्तिश्च काकविष्ठाभिर्लिप्ता ह्यापादमस्तकम् ॥१७॥

सश्रीकं तु परं स्थानं, भाव्यत्र व्यन्तरस्ततः ।
स्वार्थायाऽऽराधयाम्येनं, चेत्पुनः कथयेन्मम ॥१८॥

इत्यसौ जलमानीयाऽपनीय च मलाऽऽदिकम् ।
स्नपयित्वा च कह्लारपत्रिकाभिरपूजयत् ॥१९॥

विनीतश्चाऽग्रतो भूत्वा, यक्षं प्रत्याह कोमलम् ।
मया नाथ ! पुराऽन्तःस्थाः, सर्वे देवा विलोकिताः ॥२०॥

परं केनाऽपि किमपि, न स्यादिति मतिर्मम ।
एवमेव जगत्तैस्तु, भक्ष्यते पश्यतोहरैः ॥२१॥

*ततश्च त्वं मया ज्ञातः, शिष्टत्वादविकत्थनः ।*
सप्रभावस्ततोऽहं त्वां, प्रपन्नोऽस्मि प्रभुं खलु ॥२२॥

तत्स्वामिन् ! साधयाऽर्थं मे, राजस्वप्नं समादिश ।
यद्राजा दास्यते दास्याम्यर्द्धं तस्य तवाऽपि हि ॥२३॥

यक्षो दध्यौ ममैतानि, दिनान्यासन् परं न हि ।
चक्रे केनाऽपि भक्तिर्मे, मां वेत्त्यपि न कोऽपि हि ॥२४॥

न भवत्यमुना किञ्चिदिति यक्षैः परैरहम् ।
उपहस्ये सदाऽप्येवं, ततोऽभूवं सुदुःखितः ॥२५॥

अनेन मन्त्रिणा चाऽद्य, पृष्टा देवाः परे न यत् ।
आख्यंस्तन्मम दैवेन, हुं पुण्याऽवसरो ददे ॥२६॥

पयश्छटाऽपि मेऽङ्गेषु, नाऽलगत् प्राक्कदाऽपि हि ।
केवलं धूलिविष्टाभिर्लिप्तत्वात्ताड्यते वपुः ॥२७॥

अधुना त्वेष मन्त्री मे, स्नपकः पूजकोऽभवत् ।
तदस्मै कथयाम्येनं, राजस्वप्नं यथास्थितम् ॥२८॥

इति सोऽवधिना ज्ञात्वाऽऽचख्यौ स्वप्नं तु मन्त्रिणे ।
मन्त्र्याख्यद्भूभुजे गत्वा, हर्षाद्राजाऽप्यमन्यत ॥२९॥

स्वर्णलक्षां ददौ तोषाद्राजा तस्मै सुमन्त्रिणे ।
सोऽप्यादाय वैवधिकैरागच्छन्नित्यचिन्तयत् ॥३०॥

मयाऽस्त्यर्द्धं हि यक्षस्य, मानितं तद्ददे यदि ।
तत्कुटुम्बव्ययानन्तमृणं कस्माद्ददाम्यहम् ? ॥३१॥

किं करिष्यति यक्षश्च ?, स्वर्णेनाऽद्य फलं तु मे ।
यक्षः क्रोत्स्यति चेत्तत्किं, कर्त्ता कार्यं न यत्पुनः ॥३२॥

इति ध्यात्वा ततो मन्त्री, ययौ वेश्म निजं मुदा ।
स्वेच्छया स व्ययत्यर्थं, सांसारिकसुखेच्छया ॥३३॥

आगाद्दीपोत्सवो भूयो, नृपोऽशेत तथैव सः ।
स्वप्नं ददर्श तत्रैष, विसस्मार तथैव च ॥३४॥

भूयः पप्रच्छ राजा तं, मन्त्रिणं प्रत्ययात्ततः ।
मन्त्र्याह कथयिष्यामि, सम्यग् ज्ञात्वा यथातथम् ॥३५॥

प्रतिज्ञायेति मन्त्र्येष, गेहं गत्वा व्यचिन्तयत् ।
प्रष्टव्यः स कथं यक्षो ?, दत्तमर्द्धं पुरा न यत् ॥३६॥

ततोऽन्तः किमपि ध्यात्वा, स दुग्धेक्षुरसाऽऽदिकम् ।
पुष्पाऽऽदिपूजाप्रकरं, लात्वा यक्षगृहं ययौ ॥३७॥

जलैः प्रक्षाल्य तन्मूर्त्तिं, दुग्धेनाऽस्नपयत्ततः ।
विलिप्य घुसृणेनाऽथाऽर्चयित्वा कुसुमैर्वरैः ॥३८॥

अगरुधूपमुद्ग्राह्य, प्राहेति कोमलं वचः ।
स्वामिन् ! यक्षेश ! सोढव्योऽपराधो मे सुदुस्सहः ॥३९॥

मया ह्यानीय गेहे स्वे, मुक्तं स्वर्णं ततः किल ।
यावद्दास्यामि ते तावद्विभज्य भक्षितं सुतैः ॥४०॥

अत्राऽर्थे न त्वया कोपः, कार्यः स्वाम्यसि येन मे ।
अपराधानहं कर्त्ता, त्वं सहिष्यसि सर्वथा ॥४१॥

नाऽतःपरं च कर्त्ताऽस्मि, मानितं त्वन्यथा खलु ।
प्रसीद कथय स्वप्नं, यन्मां पृच्छति भूपतिः ॥४२॥

इति मन्त्रिगिरा प्रीतो, यक्षः स्वप्नमचीकथत् ।
सोऽपि राज्ञे ततो राजा, स्वर्णलक्षद्वयं ददौ ॥४३॥

ततोऽमात्यस्तदाऽऽदायाऽऽगत्य चाऽर्द्धपथे स्थितः ।
यक्षे वाग्डम्बरः कार्यो, ध्यात्वेति गृहमाययौ ॥४४॥

पुनर्दीपोत्सवे राजा, तं स्वप्नं व्यस्मरत् क्षणात् ।
तमेव मन्त्रिणं भूयः, पप्रच्छ स्वयमादरात् ॥४५॥

ऊरीकृत्य ततः सोऽपि, ययौ स्वगृहमाश्वथ ।
आकार्य सूत्रधारान् द्रागादिदेश ससम्भ्रमः ॥४६॥

बहिःस्थितस्य यक्षस्य, योग्यं देवकुलं क्षणात् ।
निष्पादयत रम्यं च, परितो वप्रभूषणम् ॥४७॥

आदेशाऽनन्तरमेव, यक्षस्योपरि तक्षभिः ।
प्रासादो विदधे चित्रः, प्रोच्चैर्मण्डपमण्डितः ॥४८॥

ततः पौरजनान् मन्त्री, समाहूयाऽऽदिशत्त्विदम् ।
प्रातर्हर्षेण यक्षस्य, कर्त्तव्योद्यानिका ध्रुवम् ॥४९॥

ऋद्धो लोकस्ततस्तत्र, जगामाऽलङ्कृतः श्रिया ।
भुक्त्वा भोज्यानि चिक्रीड, नानाक्रीडाभिरुन्मदः ॥५०॥

आगत्य मन्त्री स्वेनैव, दुग्धसर्पिर्घटैरमुम् ।
स्नपयित्वा तमानर्च, पुष्पैः सौरभमन्दिरैः ॥५१॥

पुरतः कारयामास, सङ्गीतकमथाऽद्भुतम् ।
अश्रुताद्दृष्टं तच्छ्रुत्वा, यक्षोऽन्तर्मुमुदेऽधिकम् ॥५२॥

प्रेक्षणे क्रियमाणे च, मन्त्री यक्षाऽग्रमेत्य सः ।
ऊचे यक्षेश ! नाऽस्त्येव, कृतघ्नो मे समः परः ॥५३॥

त्वादृशस्य प्रभोश्चक्रे, लोभाऽन्धेन मया हहा !! ।
वञ्चना तत्र किं कुर्वे, कुटुम्बं मे हि खादकम् ? ॥५४॥

अथवा त्वादृशि स्वामिन्यपि न स्यात् कुटुम्बकम् ।
स्वेच्छोपभोगभाक् तत्क्वाऽन्यत्र तद्भविता सुखी ? ॥५५॥

किं बहूक्तैर्भवान् स्वामी, दास्यत्यविनया अपि ।
वयं च भक्षयिष्यामः, पितृपुत्रक्रमो ह्यसौ ॥५६॥

इत्थं सुधारसाऽऽस्वादपेशलां मन्त्रिणो गिरम् ।
निशम्य यक्षः प्रत्यक्षीभूय स्वप्नाऽर्थमादिशत् ॥५७॥

ततो मन्त्री नृपायाऽऽख्यच्चतुर्लक्षीं नृपो ददौ ।
लोभं त्यक्त्वा ततो मन्त्री, यक्षाऽग्रे तन्न्यचिक्षिपत् ॥५८॥

यक्षमूचे च सर्वं हि, गृहाण काञ्चनं प्रभो ! ।
नाऽतः परं करिष्यामि, भवता सह वञ्चनाम् ॥५९॥

ततो विहस्य यक्षः स, प्राह मन्त्रिन्नतः परम् ।
सम्भाव्यते शुभः कालश्चेतांस्यार्द्राणि चाऽङ्गिनाम् ॥६०॥

एतावन्ति दिनान्यासीत्कालो दुष्टस्ततो भुवि ।
कालाऽनुसारतोऽभूवन् सन्तोऽप्यनृतभाषिणः ॥६१॥

किं मे कार्यं सुवर्णेन ?, गृहाणैतत्त्वमेव हि ।
इति प्रोक्तः स यक्षेण, तदादाय गृहं ययौ ॥६२॥

ऋद्धस्तेन सुवर्णेन, मत्तो राजप्रसादतः ।
मोक्षसौख्यपदांस्तीर्थकरानप्यवमन्यते ॥६३॥

विना भावं करोत्येषोऽर्हतां पूजां प्रसिद्धये ।
ददाति कीर्त्तये दानं, न पुनर्भावतः क्वचित् ॥६४॥

एवं हि कुर्वतस्तस्याऽभूद्द्रव्यव्यय एव हि ।
नाऽभूत्परभवोन्नत्यै, पुण्यलेशोऽपि सर्वथा ॥६५॥

इत्यभावनया मन्त्री, वरुणाऽऽख्यः क्रमेण सः ।
मृत्वा जातो व्यन्तरेष्वल्पर्द्धिषु क्रूरमानसः ॥६६॥

**इत्यभावनायां वरुणकथा ॥**

# अभिग्रहे सिद्धकथा

मनो हि दारुवद्वक्रं, नानाऽभिग्रहयन्त्रतः ।
तपस्तापेन शनकैरभङ्गात् समतां नयेत् ॥१॥

सर्वदाऽपि मनो रोध्यं, स्वल्पाऽऽरम्भैर्विवेकिभिः ।
जीवाऽऽकुलासु वर्षासु, विशेषाच्छुभमिच्छुभिः ॥२॥

न्यायाऽर्थोपार्जने मासान्निर्गमय्याऽष्ट धार्मिकैः ।
सिक्तो वर्षासु धर्मः स्यात्, सिद्धस्येवेष्टपूर्त्तये ॥३॥

वैभारपर्वतेऽस्त्येकः, सिद्धाऽऽख्यस्तस्करेश्वरः ।
सोऽन्यदाऽगात्तरङ्गिण्यां, पुर्यां चौर्याय निर्भयः ॥४॥

गच्छन्नितस्ततः सोऽगादेकस्य वणिजो गृहम् ।
शुश्राव च वणिक्पुत्रं, ब्रुवाणं पितरं प्रति ॥५॥

अपुण्यात्तात ! मे सम्पत्, सम्पन्ना नोद्यमादपि ।
पतितोऽस्मि गृहद्वन्द्वे, मर्त्यजन्मफलं न मे ॥६॥

न चाऽत्र गुरवः सन्ति, धर्मो येभ्यो निशम्यते ।
तदादिश विधेयं मे, येनाऽऽत्मा निर्मलो भवेत् ॥७॥

इति पृष्टे सुतेनाऽथ, सिद्धचौरे च शृण्वति ।
पिता प्राह मुदा वत्स !, शृणु त्वं कुलमण्डन ! ॥८॥

व्यवसायो गृहस्थानां, भवेज्जीवनहेतवे ।
महारम्भं तथाऽपि त्वं, वर्षासु मा कृथाः सुत ! ॥९॥

किन्तु वत्स ! यथाशक्त्या, कुरुष्वाऽभिग्रहानिह ।
देवपूजादिसत्कृत्ये, मुच्यसे कल्मषात्ततः ॥१०॥

वणिक्पुत्रः पितुः पार्श्वे, जग्राहाऽभिग्रहान् कति ।
सिद्धचौरस्ततो दध्यौ, पुत्रस्य विनयः कियान् ? ॥११॥

वात्सल्यं च पितुः पुत्रे, कियद्धिग् मामलक्षणम् ।
नाऽस्ति यस्य गृहे वृद्धो, माता पिताऽथ शिक्षकः ॥१२॥

एनमेव किलाऽऽदेशं, करिष्येऽहं खलु स्वयम् ।
अनेनाऽऽप्तेन पुत्रायाऽऽदिष्टं स्यादायतौ हितम् ॥१३॥

इति ध्यात्वा स तं वृद्धमुपेत्य च प्रणम्य च ।
भक्त्योवाचोपदेशस्ते, प्रतीष्टः शिरसा मया ॥१४॥

परमाऽऽलम्बनं किञ्चिदादिशाऽस्मन्मनः स्थिरम् ।
स्यादित्युक्तेऽमुना वृद्ध, आख्यत्पञ्चनमस्कृतिम् ॥१५॥

पत्रे क्वाऽपि लिखित्वा तां, सिद्धचौरो गृहान् [हं] ययौ ।
स्वमनःश्रद्धया सम्यग्, जग्राहाऽभिग्रहानिति ॥१६॥

पापकार्यं मया कार्यं, न वर्षासु स्थिराऽऽत्मना ।
नित्यमेकाऽऽसनस्थेन, गुण्या पञ्चनमस्क्रिया ॥१७॥

प्रारेभे च तथैवैष, प्रावृषि त्यक्तचौरिकः ।
पञ्चनमस्कृतीश्चित्तनिरोधात् परिवर्तयन् ॥१८॥

तस्मै चाऽभिग्रहस्थाय, कुटुम्बं क्रुध्यति क्षणात् ।
चौर्यं कुर्वति तस्मिन् हि, पूर्यते तस्य वाञ्छितम् ॥१९॥

खादकत्वाच्च तल्लोकः, प्रत्यहं द्वेष्टि तत्क्रियाम् ।
अन्यदा सिद्धभार्या तत्पत्रं पञ्चनमस्कृतेः ॥२०॥

गृहीत्वाऽचिन्तयत् पत्रेणाऽनेन विप्रतारितः ।
मत्पतिस्तत्क्षिपाम्येतत्, कूपेऽगाधे क्वचित्ततः ॥२१॥

कार्याऽर्थमन्यतः सिद्धे, गते सा निर्ययौ गृहात् ।
कूपं प्रति चचालाऽऽशु, श्मशानोपान्तवर्त्मना ॥२२॥

इतश्च कस्यचिद् ग्रामपतेर्दयितयैकया ।
अन्तर्वत्न्याः सपत्न्या द्रागीर्ष्यया प्रददे विषम् ॥२३॥

विषेण गुर्विणी साऽथ, पपात मूर्च्छयाऽवनौ ।
पितृश्वशुरवर्गश्च, ददौ तस्या विषौषधम् ॥२४॥

नाऽभूत्तेन गुणः कोऽपि, न चाऽप्यन्येन केनचित् ।
ववृधे किन्तु मूर्च्छाऽस्यास्ततोऽभूद्गतचेतना ॥२५॥

मृतेति संस्कारं कर्तुं, निन्युस्तत्स्वजना बहिः ।
कूपाऽऽसन्ने श्मशानेऽत्र, काऽप्येका व्यन्तरी ततः ॥२६॥

दृष्ट्वा सिद्धप्रियां पञ्चनमस्कारोज्झनोद्यताम् ।
व्याषेद्धुं तामुपायेन, व्यन्तरी ह्यौत्सुकायत ॥२७॥

दृष्ट्वा तां गर्भिणीं जीवद्गर्भां विषोर्मिमूर्च्छिताम् ।
सा जातकृपा स्त्रीरूपमाधायैषां पुरोऽभवत् ॥२८॥

उच्चैराक्रन्दतस्तांश्च, प्रोवाच व्यन्तरी स्वयम् ।
मा मा रुदित दीनाऽऽस्या, अस्त्यस्या जीवने क्रिया ॥२९॥

पश्यतां याति या स्त्रीयं, महामन्त्रोऽस्ति तत्करे ।
तन्मन्त्रपत्रमेतस्या मुच्यतामुदरे क्षणात् ॥३०॥

यथैषा निर्विषोत्थाय, पद्भ्यां याति गृहं निजम् ।
श्रुत्वेति गर्भिणीलोकोऽधावीत् सिद्धवधूं प्रति ॥३१॥

त्यक्तुकामा पुराऽप्येषा, सदैन्यं प्रार्थिता तु तैः ।
परमेष्ठिनमस्कारपत्रं तान् प्रत्यथाऽक्षिपत् ॥३२॥

ततस्तैः श्रद्धया पत्रं, न्यस्तं तदुदरे किल ।
उत्तस्थौ गतमूर्च्छाऽहो !, प्रभावः परमेष्ठिनाम् ? ॥३३॥

सर्वेषां विस्मयो जज्ञे, व्यन्तरी सा तिरोदधे ।
सिद्धभार्याऽपि तद्वीक्ष्य, चित्ते सम्भावनां दधौ ॥३४॥

किमयं हि महामन्त्रो यत्प्रभावान्मृताऽप्यसौ ।
जीविता तदयं ग्राह्यो न त्याज्य इति तं ललौ ॥३५॥

ततश्च ग्रामपतिना, प्रियाजीवनतुष्टितः ।
प्रददे सिद्धभार्यायै, पारितोषिककाञ्चनम् ॥३६॥

अन्यैश्च बन्धुभिस्तस्याः, प्रदत्तं काञ्चनं बहु ।
गृहीत्वा तन्नमस्कारपत्रं स्वर्णं च सा ययौ ॥३७॥

यथास्थानं तया मुक्तं, तत्पत्रं श्रद्धया गृहे ।
सिद्धाय कथयित्वा तत्, तं भक्त्याऽऽराधयत्स्वयम् ॥३८॥

यथा गृहीतान् सिद्धोऽपि, नियमान् पालयन् स्फुटम् ।
आत्मानं निर्मलीचक्रे, पापपङ्कविशोधनात् ॥३९॥

वर्षाकाले निवृत्तेऽथ, तद्ग्रामे समवासरत् ।
विहरन् केवलज्ञानी, देवाऽसुरपुरस्कृतः ॥४०॥

ततश्च सिद्धचौरोऽपि, तत्राऽगाद्भावनावृतः ।
प्रणिपत्योपविष्टश्च, बभाषे ज्ञानिना स्वयम् ॥४१॥

महात्मन् ! सिद्ध ! यच्चक्रे, विशुद्धो नियमस्त्वया ।
लप्स्यसे तेन निर्वाणसम्पदं पदमात्मनः ॥४२॥

इति ज्ञानिगिरा तस्य, कर्णे प्रविष्टमात्रया ।
निर्वास्य घातिकर्माणि, केवलज्ञानमाहितम् ॥४३॥

एत्य देवतया लिङ्गेऽर्पिते केवलिनस्ततः ।
उपविष्टः समे स्वर्णसिंहासने स केवली ॥४४॥

ततो ज्ञानी स्वयं चख्यौ, प्रतिबोधाय देहिनाम् ।
सिद्धोऽयं नियमान् सम्यक्, प्रपाल्य निर्मलोऽभवत् ॥४५॥

अस्मद्वाचि श्रुतायां च, भाव्यस्य केवलं ततः ।
वयमत्राऽऽगताः स्वेन, जातमस्याऽपि केवलम् ॥४६॥

इतीत्थं चित्तपञ्चाऽक्षनिग्रहान्नियमो हृदि ।
योऽपि सोऽपि ग्रहीतव्यः, पुण्यानुबन्धकृन्नृभिः ॥४७॥

**इत्यभिग्रहे सिद्धकथा ॥**

## पद्मनृपस्य कथाऽनुसन्धानम् ।

श्रुत्वेति देशनां पद्मः, संसारोत्तारणक्षमाम् ।
अग्रहीत् स परिव्रज्यां, युगन्धरगुरोः पुरः ॥१॥

विहिताऽभिग्रहो दान्तो विहितेन्द्रियनिग्रहः ।
स्वविग्रहेऽप्यनाकाङ्क्षश्चिरं सोऽपालयद्व्रतम् ॥२॥

ततश्च तीर्थकृन्नामगोत्रकर्माऽर्जितं दृढम् ।
साधुना तेन पद्मेन, विंशत्या स्थानकैरिति ॥३॥

अयशस्त्यागभूताऽर्थस्तवाभ्यामर्हतोऽर्चनम् [१] ।
सिद्धानां त्विह वात्सल्यं, सम्यक् सिद्धत्वकीर्त्तनम् [२] ॥४॥

बालयत्याद्यनुग्रहाद्भक्तिः प्रवचने तथा [३] ।
वस्त्राऽऽदिदानस्तुत्यादिवात्सल्यं किल सद्गुरोः [४] ॥५॥

पर्यायाऽयुःश्रुतैस्त्रेधा, स्थविराणां सुभक्तता [५] ।
स्वस्माच्छ्रुताऽधिकानां च, वात्सल्यं विनयाऽऽदिना [६] ॥६॥

विश्रामणाऽऽदिवात्सल्यं, तपस्विनां महात्मनाम् [७] ।
द्वादशाङ्ग्यां तु सूत्रार्थोभयोपयोगशालिता [८] ॥७॥

शङ्काऽऽदिदोषरहितं, सम्यग्दर्शनमेव च [९] ।
ज्ञानदर्शनचारित्रोपचारैर्विनयस्तथा [१०] ॥८॥

इच्छामिथ्याद्यावश्यकेष्वनतिचारिताऽपि च [११] ।
मूलोत्तरगुणेष्वेवमतीचारविवर्जनम् [१२] ॥९॥

शुभध्यानस्य करणं, क्षणे क्षणे लवे लवे [१३] ।
शरीरचित्तसौस्थ्येन, यथाशक्ति तपोऽपि च [१४] ॥१०॥

अन्नादीनां संविभागो मनःशुद्ध्या तपस्विषु [१५] ।
आचार्याऽऽदीनां दशानां, वैयावृत्त्यं सुनिश्चितम् [१६] ॥११॥

सङ्घस्याऽपायविध्वंसात्, समाधिर्मनसोऽपि च [१७] ।
अपूर्वाऽपूर्वज्ञानस्य, ग्रहणं चित्तनिग्रहात् [१८] ॥१२॥

अश्लाघोच्छेदाच्छ्रद्धानाच्छ्रुतज्ञानस्य भक्तता [१९] ।
विद्याधर्मकथाऽऽद्यैश्च, शासनस्य प्रभावना [२०] ॥१३॥

अप्येकं तीर्थकृन्नामकर्मणो बन्धकारणम् ।
मध्यादेभ्यः स पुण्याऽऽत्मा, सर्वैरपि बबन्ध तत् ॥१४॥

कालेन क्षपयित्वाऽऽयुर्व्रतद्रोः प्रथमं फलम् ।
विमानं वैजयन्ताऽख्यं, स जगाम महातपाः ॥१५॥

ततश्च वैजयन्तस्थः, स जीवः पद्मभूपतेः ।
पूरयित्वाऽऽयुर्जातोऽस्मि भवेऽस्मिन्नेष तीर्थकृत् ॥१६॥

इति पूर्वभवौ स्वस्येत्युक्त्वाऽर्हन्नष्टमः क्रमात् ।
क्षेत्रे चन्द्रप्रभासाऽऽख्ये, तीरेऽब्धेः समवासरत् ॥१७॥

समवसरणाऽऽधानं, सर्वदेवैः कृतं ततः ।
सिंहासनमलङ्कृत्य, चक्रे स्वामीति देशनाम् ॥१८॥

# जीवदयायां मन्त्रिदासीकथा ।

धर्मेषु प्रथमो धर्मः, प्राणिरक्षा यतस्तया ।
नीरोगः सर्वदा लोकोऽनुरागाच्छ्रीयते श्रिया ॥१॥

सत्यां दयायामन्ये स्युर्धर्मा वाञ्छितदायिनः ।
सति वह्नौ यदेधांसि, कर्त्तुमुद्योतमीशते ॥२॥

जीवरक्षावशाद्भव्यः, प्राप्नोतीष्टपदं भुवि ।
निर्वाणसम्पदोऽमुत्र मन्त्रिदासीव तद्यथा ॥३॥

अस्त्येला नगरं तत्र, राजाऽस्ति रिपुमर्दनः ।
यद्दानपद्मे राज्यश्रीर्यशोहंसश्च खेलति ॥४॥

तस्य राज्ञः सुताऽस्त्येका, कामलेखेति नामतः ।
तन्मन्त्रिमन्त्रसारस्य, पुत्री चाऽस्त्यचलाऽभिधा ॥५॥

बाल्यादपि तयोः स्नेह ऐकात्म्यप्रतिभूरभूत् ।
भुञ्जाते च रमेते च, शयाते च सहैव ते ॥६॥

सारिद्यूतेन खेलन्त्योरन्यदा ह्यनयोस्ततः ।
आकाशादचलादास्युत्सङ्गे कङ्कणमापतत् ॥७॥

तदुत्थाय तदुत्सङ्गाद्गृहीतं कामलेखया ।
ततो जहास दैवज्ञः, पुरासीनस्तदन्तिके ॥८॥

राजपुत्र्या ततः पृष्टो हासकारणमाह सः ।
कङ्कणं परिधाता या, तद्दासी त्वं भविष्यसि ।।९।।

परिधास्यति का त्वेनमिति राजसुतोदिते ।
एषा मन्त्रिसुतादासीत्याख्यत्तच्छ्रवणात् स तु ।।१०।।

तद्वाक्यप्रत्ययात् कामलेखाऽभूच्चिन्तयाऽऽकुला ।
क्रीडां मुमोच किञ्चोच्चैः, शुशोचात्मनमात्मना ।।११।।

धिग्मां या राजपुत्रीति, व्यपदेशमवाप्य हि ।
स्वदुष्कर्मपरीणामाद्दासीदासी तु भाविनी ।।१२।।

अहो ! असारता कीदृक्, संसारस्य दुरात्मनः ? ।
आत्मानो यत्र पच्यन्ते, मुहुर्दुःखहठाऽग्निना ।।१३।।

अथवा– दुष्कर्मनिर्मितदुरक्षरदुर्ललाटवाचाटशासनशिलां शिरसा बिभर्षि ।
चेत्तत्प्रमाणवशतः प्रभवत्यनिष्टं, दोषः सकारितकृतः किमसारतायाः ? ।।१४।।

इति चिन्तापरां राजपुत्रीं विज्ञाय कारणात् ।
ऊचे मन्त्रिसुता मा स्म, शोचस्त्वं शृणु मद्वचः ।।१५।।

दासीमेनामुपायेन, हनिष्ये दोषदानतः ।
पश्चात्त्वं कथमेतस्या दास्या दासी भविष्यसि ? ।।१६।।

इत्यनुज्ञाप्य तां गेहे, ययौ दासीयुताऽचला ।
दास्याऽनयाऽत्र वस्त्वेतदात्तं स्यादित्यचिन्तयत् ।।१७।।

त्वयैतदात्तमित्येनां, घटसर्पमकर्षयत् ।
दोषवत्त्वादहिर्दासीं, ददंश सा ततोऽपतत् ।।१८।।

सा तामत्याजयन्नद्यां, नरात् सोऽपि कृपापरः ।
निम्बभारकमध्यस्थां, प्रावाहयदिमां जले ।।१९।।

पुण्यान्निम्बाम्बुयोगेन, सा जाता निर्विषा क्रमात् ।
लग्ना तीरश्मशाने च, निःसृता निम्बभारकात् ।।२०।।

ततश्च राक्षसः कश्चिद्दधावेऽत्तुमिमां द्रुतम् ।
प्राणभीत्या ननाशाऽऽशु, साऽप्येलानगरं प्रति ॥२१॥

किलाऽद्याऽपि हि रक्षस्तन्मामन्वेतीति भीतिभाक् ।
व्याघुट्यैलापुरप्रान्तवनेऽगाद्यक्षमन्दिरम् ॥२२॥

यक्षश्च सर्वभक्षाऽऽख्यः, शुषिरः पक्वमृन्मयः ।
ततस्तन्मूर्त्तिमुत्पाट्य, तदन्तः साऽविशद्भयात् ॥२३॥

अरुणोदयवेलायामथैका राजवल्लभा ।
दुग्धकुम्भानसौ स्नाने, यक्षमूर्ध्नि व्यलोठयत् ॥२४॥

यक्षाऽङ्गच्छिद्रैः परितः, क्षीरमन्तः पतत्तु सा ।
पायं पायमभूत्तृप्ता, दासी मध्येऽस्ति या भयात् ॥२५॥

राजपत्नी च यक्षस्य, विलिप्तपूजितस्य सा ।
पुरतो महिषाऽजाऽऽदीन्निहन्तुमादिशन्नरान् ॥२६॥

अथ सान्तःस्थिता दासी, दध्यौ मेऽभूद्यथा व्यथा ।
घातकाद्राक्षसात्तद्वत्, स्यादेषां प्राणिनामपि ॥२७॥

तत्किलाऽहमेव यक्षीभूता निवारयाम्यमूम् ।
इत्युचे प्रोच्चैः सा राज्ञीं, न वध्या मत्पुराऽङ्गिनः ॥२८॥

अतः परं च चेत्कोऽपि, मदग्रे प्राणिनः खलु ।
हनिष्यति हनिष्यामि, सकुटुम्बं तमाश्वहम् ॥२९॥

यतो मयाऽद्य विज्ञातं, तत्त्वं जीवदयैव हि ।
दुग्धस्नानाऽर्चनाऽऽद्यैश्च, प्रीतः कर्त्ताऽस्मि वः प्रियम् ॥३०॥

किल यक्षः स्वयं वक्ति, मत्वेति राजगेहिनी ।
भीता व्यसर्जयद्वध्यान्, यक्षं नत्वा च सा ययौ ॥३१॥

नित्यमभ्येत्य सा राज्ञी, दुग्धेन स्नपयत्यमुम् ।
तद्वल्लोकः किलाऽन्योऽपि, दासी सा त्वपिबत्पयः ॥३२॥

सर्वदर्शनसङ्गीता, जीवरक्षा कृताऽमुना ।
यक्षेणेति मुदा लोकस्तदर्चातत्परोऽभवत् ॥३३॥

इतश्च राजपुत्री सा, दैवज्ञवचनाऽऽकुला ।
मन्त्रिपुत्र्या ततः प्रोचे, बुद्धिं मे शृणु हे सखि ! ॥३४॥

सर्वभक्षाऽऽख्ययक्षोऽयं, कङ्कणं परिधाप्यते ।
तद्दासीत्वं तु दुःखाय, न स्याद्यद्देवता ह्यसौ ॥३५॥

इति मन्त्रिसुतावाचं, कामलेखाऽभिनन्द्य सा ।
तया सार्द्धं ययौ सायं, यक्षवेश्म सकङ्कणा ॥३६॥

द्रागेष मण्ड्यतां यक्षः, कङ्कणेनेति तद्वचः ।
दासी निशम्य विज्ञाय, राजमन्त्रिसुते उभे ॥३७॥

स्वहस्ते बन्धयिष्यामि, कङ्कणं सेति दास्यथ ।
अन्तःशुषिरयक्षाऽग्रहस्तं भङ्क्त्वा प्रयोगतः ॥३८॥

यक्षदोर्मध्यगं स्वं तु, कराऽग्रं निरसारयत् ।
बबन्ध तत्करे राजपुत्री च कङ्कणं स्वयम् ॥३९॥

भूयास्त्वमेव मे स्वामीत्युक्त्वा सा ससखी ययौ ।
यक्षाऽग्रहस्तं दासी च, तथैव समयोजयत् ॥४०॥

ततो विद्याधरौ द्वौ च, यक्षवेश्माऽग्रमेत्य तौ ।
बहिर्मुक्त्वा विमानं च, यक्षोपान्तमथेयतुः ॥४१॥

एकः प्राह सखे ! कुन्दप्रभ ! त्वं वेत्सि वा न वा ? ।
कङ्कणाऽऽख्यानमाहाऽन्यो, रत्नाऽङ्गद ! न वेद्म्यहम् ॥४२॥

ततो रत्नाऽङ्गदश्चख्यौ, किलैषा कङ्कणद्वयी ।
विद्याधरपतेर्दत्ता, तुष्टेनोरगभर्तृणा ॥४३॥

प्रभावश्चाऽस्या य एते, द्वे अलङ्कुरुते पुमान् ।
दक्षिणोत्तरश्रेण्योः स, वैताढ्ये प्रभुतां व्रजेत् ॥४४॥

अथैकं तत्पुरश्रेणेरेकस्याः स प्रभुर्भवेत् ।
तद्वशेन च सर्वर्द्धिस्तस्य सम्पद्यतेऽचिरम् ॥४५॥

ततो विद्याभृतो व्योम्ना गच्छतः स्वप्रियां प्रति ।
चपेटाप्रेरिताद्धस्तात्, पपातैकं हि कङ्कणम् ॥४६॥

वीक्षितं बहुशोऽप्येतन्नाऽऽप विद्याधरेश्वरः ।
य एतत्प्राप्यते भावी, स एकश्रेणिभूपतिः ॥४७॥

श्रुत्वेति तद्वचो दासी, सस्मार कङ्कणं हि तत् ।
राजपुत्र्याऽन्तिके मेऽङ्के, यदेतत्पतितं किल ॥४८॥

अहो ! मे जीवरक्षायाः, फलं जातमिहैव यत् ।
प्राप्तं कङ्कणमस्माच्च, विद्याधरर्द्धिराप्स्यते ॥४९॥

ध्यात्वेति साऽब्रवीद्रत्नाऽङ्गदं तवेदमर्पये ।
वर्त्तसे चेन्मदादेशात्ततो रत्नाऽङ्गदोऽवदत् ॥५०॥

स्वामिन् ! यक्ष ! यद्ब्रूषे त्वं, करिष्ये तदहं सदा ।
इत्युक्ते तेन सा प्राह, तर्हि शृणु वचो मम ॥५१॥

त्वं स्वस्थानं गतः स्वस्मिन्, विमाने द्रक्ष्यसि स्त्रियम् ।
सकङ्कणां ततस्त्वं तां, कुर्या भार्यां सदा प्रियाम् ॥५२॥

नाऽपमान्या त्वया सैषा, वर्त्तितव्यं तदाज्ञया ।
इत्युक्त्वा शनकैः साऽथ, निर्ययौ यक्षमध्यतः ॥५३॥

ध्वान्ते ताभ्यामदृष्टा सा, तद्विमानं समेत्य हि ।
निलीयाऽस्थात् क्वचित्स्तम्भाऽन्तरे न दृश्यते यथा ॥५४॥

ततो रत्नाऽङ्गदः किञ्चित्, स्थित्वा विमानमासदत् ।
यक्षेणोक्तं तथैवेति, स मत्वा तदतत्वरत् ॥५५॥

स स्वस्थानं क्षणात्प्राप, दासी प्रादुर्बभूव सा ।
स तां सकङ्कणां वीक्ष्य, यक्षोक्ते विस्मितोऽभवत् ॥५६॥

एह्येहि तन्वि ! यक्षेण, त्वं मे दत्ताऽसि वल्लभा ।
इत्याश्लिष्य स तां रेमे, यक्षाऽऽदेशान्नतोऽभवत् ॥५७॥

प्रातः कङ्कणमाहात्म्यादेकाऽऽप्ता श्रेणिरात्मना ।
एत्य रत्नाऽङ्गदयुतां, तां दासीं स्वामिनीं व्यधात् ॥५८॥

जीवरक्षाकृतं पुण्यं, दासी चेतसि कुर्वती ।
आधिपत्यं गताऽप्येषा, दयाधर्मपराऽभवत् ॥५९॥

दासीत्वाऽपगमात् स्वाम्याधिगमान्मुदमीयुषी ।
अन्यदा निशि पल्यङ्के, सैषा सुष्वाप निर्भरम् ॥६०॥

क्षणेन गतनिद्रेयमथैकां स्त्रियमैक्षत ।
संवाहयन्तीं चरणौ, दासीमिव क्रमाऽऽगताम् ॥६१॥

तया प्रोचे हले ! का त्वं ?, सा प्राह तेऽस्मि दास्यहम् ।
त्रायस्व स्वामिनि ! त्वं मां, गतिस्त्वं मेऽत्र नाऽपरः ॥६२॥

मन्त्रिदासी बभाषे तां, क्वत्यास्यत्राऽऽगताऽसि किम् ? ।
त्रातव्याऽसि कुतो ब्रूहि, कान्दिशीके ! बिभेः स्म मा ॥६३॥

ततः सा रुदती प्राह, शृणु देवि ! प्रसादतः ।
रिपुमर्दनस्य राज्ञः, सुताऽस्म्येलापुरेशितुः ॥६४॥

कामलेखाऽभिधा साऽहमेकदाऽगां सखीयुता ।
नद्यां हि जलकेल्यर्थमारूढा नावमायताम् ॥६५॥

ततोऽभून्मरुदुद्दण्डो नौः पुस्फोटाऽमुना हता ।
मदीयः स सखीवर्गः, क्वाऽप्यगात्तन्न वेद्म्यहम् ॥६६॥

अहं फलकमेकं च, प्राप्याऽऽरूढाऽस्मि तद्दृढम् ।
विद्याधरेण केनाऽपि, दृष्टा तेन हृताऽस्मि च ॥६७॥

आनीय ह्यस्तनदिने, मुक्ताऽस्म्यस्मिन् गृहेऽन्तिके ।
हरिष्यति स मे शीलमिति भीस्त्वामिहाऽऽगमम् ॥६८॥

तद्रक्ष रक्ष मां तस्मादेषा दास्यस्मि ते ध्रुवम् ।
मन्त्रिदासी ततः प्राह, मा भैषीस्तेऽस्मि रक्षिका ॥६९॥

तां तूपलक्ष्य दध्यौ यज्जीवरक्षाफलं कियत् ? ।
प्राप्तं विद्याधरैश्वर्यं, सैषा दासी च मेऽभवत् ॥७०॥

इति जीवदयातत्त्वे, तस्याः संलीनचेतसः ।
भवितारः क्रमात्स्वर्गमोक्षसौख्यानि निश्चितम् ॥७१॥

**इति जीवदयायां मन्त्रिदासीकथा ॥**

# सत्यव्रते स्मरनन्दनकथा ।

सत्यमेव वदेद्यस्मादिहाऽमुत्र च देहिनः ।
जनानुऽरागादाढ्याः स्युर्भोक्तारश्च शिवश्रियः ॥१॥

सत्येन दुर्जनः स्वः स्यात्का कथा महतां सताम् ? ।
विषमप्युपयोगि स्यान्मन्त्रेण किं पुनः परम् ॥२॥

असत्यवादकः स्वोऽपि, परः स्यात् सत्यवादकः ।
परोऽपि स्वो भवेन्नूनं, स यथा स्मरनन्दनः ॥३॥

पुरं श्रीपुरमित्यस्ति, तत्राऽस्ति लक्ष्मणो नृपः ।
यत्करेऽसिवधूर्लग्नाऽगृह्णात् प्रत्यर्थिनां करान् ॥४॥

तस्य कामपताकाऽऽख्याऽस्ति राजमहिषी प्रिया ।
या स्वबिम्बोष्ठरागेणाऽरञ्जयत् कामिनां मनः ॥५॥

पुरेऽस्मिन्नन्यदा ज्योतिःशास्त्रेऽधीती शुकोत्तमः ।
समागात् सर्वदैवज्ञमूर्द्धाऽभिषिक्ततां गतः ॥६॥

यो यत्पृच्छति तज्जन्मग्रहचारात्तदाह सः ।
संवदत्येव तत्सर्वमुच्चैर्नीचैः कुलाऽऽदिकम् ॥७॥

यद्भूतं यस्य यद्भावि, तत्तस्मै कथयन् स्फुटम् ।
सभाक्षोभकरः कीरः, पौरलौकमरञ्जयत् ॥८॥

राजा विज्ञाय तं कीरमाजूहवत् स्ववेत्रिणा ।
नरात्तपञ्जरस्थोऽयं, राजसंसद्यगाच्छुकः ॥९॥

आलप्य कौतुकाद्राज्ञा, स्वाऽङ्कस्थस्य सुतस्य सः ।
पृष्टो जन्मग्रहफलं, समाख्यत् प्रश्नविच्छुकः ॥१०॥

सुतस्तेऽयं महीनाथ !, भविष्यति महाविटः ।
हास्यपात्रीकृताऽऽत्मा च, जीविता शरदां शतम् ॥११॥

श्रुत्वेति नृपतिः कीरवाक्प्रत्ययान्निजं सुतम् ।
शोचन् विषादमापन्नस्तस्थौ किञ्चिदधोमुखः ॥१२॥

ततः कामपताकाऽपि, कौतुकाच्छुकमात्मनः ।
जन्मस्वरूपमप्राक्षीदाधिपत्यप्रमोदिता ॥१३॥

आनाय्य प्रश्नमन्तस्तमवधार्य विशेषतः ।
ध्यानात् किमपि विज्ञाय, मौनेनाऽस्थाच्छुकश्चिरम् ॥१४॥

ततः कामपताका साऽपृच्छत् कीर ! वद द्रुतम् ।
कीरः प्राह शुभे ! मा त्वं, प्राक्षीर्मौनं समाश्रय ॥१५॥

आशङ्कितमनाः सा च, मा भूदस्मिन् श्रुते मम ।
मनसो दौस्थ्यमित्येषा, तस्थौ दाक्ष्येण मौनभाक् ॥१६॥

ततश्च लक्ष्मणो राजा, तज्ज्ञातुमन्तरुत्सुकः ।
बभाषे शुकमाख्याहि, यथास्थितं बिभेः स्म मा ॥१७॥

राजन्नेषा तवाऽत्यर्थं, प्रियेत्यस्या विरूपके ।
कथिते भावि ते दुःखं, तच्छङ्के कथयन्नहम् ॥१८॥

इत्युक्ते शुकराजेन, कृत्वैकान्तं नृपोऽवदत् ।
यद्दृष्टं भवता सम्यक्, प्रश्नात्त्वं कीर ! तद्वद ॥१९॥

शुकः प्राह नृपैषा ते, प्रियाऽन्त्यजकुलोद्भवा ।
अस्याः संसर्गतो जातः, सलोको मलिनो भवान् ॥२०॥

श्रुत्वेति शुकवाचं स राजाऽन्तःखेदमावहन् ।
नगराद्बहिरभ्येत्य, तस्थिवान् दुःस्थमानसः ॥२१॥

कामपताकाऽथ दध्यौ, न वेद्मि स्वं कुलं क्व वा ।
तच्छृणोमि यद्राजाऽयं, बन्दिनीं मामुपायत ॥२२॥

शुकश्च सर्ववित्त्वेन, ख्यातो ब्रूते यदत्र तत् ।
लोकः प्रत्येति तत्कीरवाक् कार्या कथमन्यथा ? ॥२३॥

इति साऽऽलोच्य चित्तेनाऽजूहवन्मुख्यमन्त्रिणम् ।
शुकवाचं निवेद्याऽस्मै, स्वाऽभिप्रायं न्यवेदयत् ॥२४॥

मन्त्रिन् ! कीरगिरा राजा, ह्यविचार्यैव निर्ययौ ।
दैवात्त्यक्तेऽमुना राज्ये, न त्वं नाऽहं च राज्यभाक् ॥२५॥

तदेषा क्रियते बुद्धिर्यत्र जानन्ति किञ्चन ।
ते हि दत्त्वाऽर्थमत्यर्थं, क्रियन्ते शीघ्रमात्मसात् ॥२६॥

ततो राज्ञः पुरस्तात्ते, भाण्यन्ते प्रोच्चकैरिदम् ।
यदेष पक्षी सर्वत्र, राजन् ! ब्रूते मृषावचः ॥२७॥

यदस्माभिर्निमित्तानि, वीक्षितानि बहून्यपि ।
असत्या शुकवाग् नूनं, तानीत्याख्यान्ति भूरिशः ॥२८॥

इति सा मन्त्रिणा सार्द्धमालोच्याऽऽकार्य सत्वरम् ।
वित्तैः सन्मान्य दैवज्ञान्, यद्वक्तव्यमशिक्षयत् ॥२९॥

ततश्च मन्त्रिणा सार्द्धं, ते पुरो नृपतेर्ययुः ।
शुकवाचं निराकर्त्तुमूचुः सम्भूय भूपतिम् ॥३०॥

तिर्यग्जातिरसौ कीर इत्यस्य प्रत्ययोऽत्र कः ? ।
ईक्षितं सम्यगस्माभिरसत्या शुकगीः खलु ॥३१॥

ऊचे मन्त्री ततो राजन् !, गम्यतां सौधमात्मनः ।
आचारेणैव कथिता, त्वत्प्रिया सुकुलोद्भवा ॥३२॥

राजाऽऽह मेऽत्र सन्देहोऽभूत् सोऽन्यैर्न निवर्त्त्यते ।
जानाम्यसत्याः सर्वेऽपि, नूनं नैमित्तिका अमी ॥३३॥

अस्त्यत्र नगरे श्रेष्ठी, विमलस्तस्य विद्यते ।
स्मरनन्दन इत्याख्यो मानितः पुत्रको गुणी ॥३४॥

स बालब्रह्मचार्येव, सम्यक्त्वाऽऽराधनाप्रियः ।
स यत्पृच्छति तत्कर्णे, ब्रूते शासनदेवता ॥३५॥

स चेन्मे कथयत्येतत्ततः प्रत्येमि नाऽन्यथा ।
तद्वचांसि विना राज्यं, त्यक्त्वा तीर्थानि गम्यहम् ॥३६॥

मन्त्री श्रुत्वेति भूपोक्तं, राजपत्नीमुपाययौ ।
आचख्यौ राजवाचं च, साऽथ श्रेष्ठिनमाह्वयत् ॥३७॥

आख्याय शुकवृत्तान्तमभाणीच्छ्रेष्ठिनं तु सा ।
तव पुत्रकवाक्येन, प्रत्येति नृपतिस्ततः ॥३८॥

तथा त्वया स आदेश्यः, शुकवाचं यथाऽन्यथा ।
कृत्वा प्रत्यापयत्येष, राजानं ग्रहिलाऽऽग्रहम् ॥३९॥

गत्वा कारय शीघ्रं तदित्यादिश्य स्वयं तु सा ।
सन्मान्य श्रेष्ठिनं वस्त्राऽऽदिभिर्द्राग् विससर्ज च ॥४०॥

गत्वा श्रेष्ठ्यप्यभाणीत्तं, स्मरनन्दनमेष च ।
शासनदेवीमाराध्याऽपृच्छद्व्यतिकरं हि तम् ॥४१॥

तयाऽऽख्यायि यदेषा हि, नृपभार्याऽन्त्यजाऽन्वया ।
कार्यो नैवाऽत्र सन्देहः, प्रमाणं शुकवाग् खलु ॥४२॥

ततश्च श्रेष्ठिना सार्द्धं, समेत्य स्मरनन्दनः ।
चख्यौ तस्यै हि यत्कीरवाचः स्युरन्यथा नहि ॥४३॥

कामपताकाऽथ प्रोचे, यद्यप्येवं तथाऽपि हि ।
राज्ञोऽग्रे शुकवाक्कथ्या, मिथ्या मदुपरोधतः ॥४४॥

तां स्मराऽऽत्मभवः प्राह, नैवाऽसत्यं वदामि यत् ।
धर्मोक्षा दुःखरक्ष्यः स्यात्, सत्यवाग्वृत्तिभङ्गतः ॥४५॥

कामपताका तं प्रोचे, पापं भावि यदत्र ते ।
तन्मे भूयाद्यद्वाग्दत्तं, लभ्यते हि शुभाऽशुभम् ॥४६॥

लौकिकव्यवहारोऽयं, नाऽऽगमा ब्रुवते ह्यदः ।
सत्याऽसत्यफलप्राप्तिर्वक्तुस्तन्न ब्रुवे मृषा ॥४७॥

स्मरस्य नन्दनेनेति, प्रोक्ता प्रोवाच कोपतः ।
मद्वाचं चेन्न कर्त्ताऽसि, तदकाले मरिष्यसि ॥४८॥

स्मरस्य नन्दनोऽवादीद्विधेहि यद्यथोचितम् ।
वरं हि मृत्युमिच्छामि, न त्वसत्यं वदाम्यहम् ॥४९॥

कामपताका तु नीचैर्गोत्रा सुलभदुर्नया ।
एनं प्राबन्धयद्गाढं, कशाभिर्द्रागताडयत् ॥५०॥

तथाऽप्यमन्यमानोऽसौ, नृपाऽऽदेशाद्गवेषकैः ।
राजाऽध्यक्षैस्तत्र दृष्ट्वा, नीतो द्राग् नृपतेः पुरः ॥५१॥

पृष्टश्च तद्क्षणाद्राज्ञा, सत्या वा शुकवाग् न वा ? ।
ततो दध्यौ स्मरसुतः, कुर्वेऽत्र किमहं किल ? ॥५२॥

कथयिष्यामि चेत्सत्यं, विलक्षो नृपतिस्तदा ।
कर्त्ता विरूपं पत्न्यां तत्सत्यमप्यहितं मृषा ॥५३॥

अथवा ज्ञायते वाग्भिर्नृपो वैराग्यवानभूत् ।
कर्त्ता नैवाऽहितं क्वाऽपि, किन्तु कर्त्ता शुभं खलु ॥५४॥

इत्यालोच्य स्मरसुतः, प्रोवाच शुकवाग् नृप ! ।
भाति सत्येव किञ्च त्वं, मालिन्यं मास्म मन्यथाः ॥५५॥

कर्मप्रभावादात्माऽयं, व्यवहारोत्तमाऽधमान् ।
प्रविशन् विग्रहगृहान्, नैव स्यान्मलिनः खलु ॥५६॥

किन्तु दुष्कर्मभिः स स्यान्मलिनोऽथ सुकर्मभिः ।
स्यान्निर्मलस्ततः कार्यं, सुकर्मोपार्जने मनः ॥५७॥

वदत्येतत्स्मरसुते, समागात् कोऽपि केवली ।
राजानं प्रति चक्रे स देशनां शुद्धिदायिनीम् ॥५८॥

ततो राजा प्रबुद्धः स तदन्ते जगृहे व्रतम् ।
कामपताकाऽपि श्रुत्वा, जगृहे व्रतमुत्तमम् ॥५९॥

अन्याऽन्वयोद्भवायाऽपि, सत्यत्वात् स्वीकृताय तु ।
स्मरपुत्राय दत्त्वर्द्धिं, प्राव्राजीद्विमलोऽपि हि ॥६०॥

अथ स स्मरपुत्रोऽपि, गृहस्थव्रतधारकः ।
सत्यव्रतं प्रपाल्यैव, व्रतादानाद्ययौ शिवम् ॥६१॥

**इति सत्यव्रते स्मरनन्दनकथा ॥**

# अदत्तादाने दानप्रियकथा ।

अदत्तेन परस्वेन, लोभादात्तेन देहिनाम् ।
लुट्यते धर्मसर्वस्वं, ग्राह्यं नाऽदत्तमत्र तत् ॥१॥

अदत्तग्राहिताऽदोषोऽधिरूढः सकृदेव हि ।
नैवाऽपनीयते जन्तोः, शीतांशोरिव लाञ्छनम् ॥२॥

सत्क्लेशोपार्जनाऽऽदात्तमाशास्थानं धनं नृणाम् ।
हरतो नरकादन्या, न गतिः परजन्मनि ॥३॥

यस्त्यजेत् परसर्वस्वं, सुखग्राह्यमपि त्रिधा ।
स भवेद्विश्वविश्वासस्थानं दानप्रियो यथा ॥४॥

अस्ति नन्दापुरी तत्र, नन्दो नामाऽस्ति भूपतिः ।
यत्खड्गाऽम्बु जनाऽऽह्लादि, भिनत्ति स्तब्धभूभृतः ॥५॥

तत्राऽऽस्तेऽन्वयदारिद्र्यकष्टभ्रष्टकुलक्रमः ।
दुःखोत्पन्नाऽऽत्मभरणो दुर्गतो नाम पूरुषः ॥६॥

तस्याऽस्ति तनयो दानप्रियो नाम शिशुः स च ।
अन्यदा रममाणोऽभूदाढ्यपुत्रैः सह क्वचित् ॥७॥

अथैकस्याऽऽढ्यपुत्रस्य, रममाणस्य हस्ततः ।
पपात मुद्रिकारत्नं, धूलौ केनाऽप्यलक्षितम् ॥८॥

गतः स रन्त्वा गेहे स्वे, पश्चाद्दानप्रियेण तत् ।
दृष्ट्वा दध्यौ किलैतद्धि, रत्नं भाव्यमुकस्य तु ॥९॥

इत्यादाय कराऽग्रेण, परस्वमित्यसंस्पृशन् ।
आनीयाऽऽर्पयत्तद्बालपितृभ्यामेष तत्स्वयम् ॥१०॥

आढ्यो दध्यावहो ! अस्य, कीदृग् निःस्पृहता शिशोः ? ।
आददीत न बालोऽपि, कोऽन्यो लोभादिदं खलु ? ॥११॥

जातो निःस्वकुले नित्यं, म्रियमाणो बुभुक्षया ।
इदं यदेष नाऽगृह्णात्, तत्स्वीकार्यः सुशीलतः ॥१२॥

इत्याढ्येनाऽऽत्मना सार्द्धं, भोजयित्वा स षट्रसैः ।
उक्तस्तिष्ठेस्त्वमत्रैव, भव त्वं मत्सुताऽनुगः ॥१३॥

इत्याढ्येन स आदिष्टोऽनुज्ञातो जनकेन च ।
बभूव तत्सुतसखा स्नेहपात्रं सदैव हि ॥१४॥

अथाऽऽढ्येन निजः पुत्रः, पण्डितस्य समर्पितः ।
पठनाय ततोऽधीते, कष्टात् प्रज्ञाजडः स तु ॥१५॥

दानप्रियस्तु यत्किञ्चिदध्यापयति पण्डितः ।
तत्सर्वमर्थसूत्राभ्यां, चक्रेऽभ्यस्तं स्वनामवत् ॥१६॥

आढ्यश्रेष्ठी तु यद्दत्ते, द्रव्यं दानप्रियाय तु ।
दानप्रियत्वादेषोऽपि, दत्ते पात्रेषु तत्स्वयम् ॥१७॥

ततश्चाऽऽसन्नव्यन्तर्या, दध्ये दानप्रियो ह्यसौ ।
बालोऽपि निःस्पृहः कीदृक् ?, परीक्ष्योऽयं मया ततः ॥१८॥

ततः सा पुरुषीभूय, दानप्रियं बहिर्गतम् ।
पुरोभूयाऽवदद्यत्ते, पिता मेऽस्ति ऋणी खलु ॥१९॥

तदृणेन त्वमृणी मे, तद्द्रव्यं देहि मेऽधुना ।
इत्युक्त्वा सा करे धृत्वा, तं निनाय क्वचिद्गिरौ ॥२०॥

प्रोचे दानप्रियं साऽथ, द्रव्यं मे देहि सत्वरम् ।
स प्राह मे धनं नाऽस्ति, ततस्तत्ते ददे कुतः ? ॥२१॥

सा प्राह चेत्पुरे तेऽस्ति, द्रव्यं त्वं चल तत्र तत् ।
तत्राऽपि देहि मे द्रव्यं, मोक्ष्यामि त्वां हि नाऽन्यथा ॥२२॥

प्राह दानप्रियो ना, नो वा पुरेऽस्ति मे धनम् ।
तत्कुतस्तद्ददे त्वं तु यद्रोचते कुरुष्व तत् ॥२३॥

व्यन्तर्या स ततो बद्ध ऊर्ध्वपाद्वटभूरुहि ।
देहि मे द्रव्यमित्युक्त्वा, लताभिर्हन्यते स्म सः ॥२४॥

साऽथ मार्गे तदाऽऽसन्ने, यातोऽध्वन्यान् विनिर्ममे ।
विचक्रे पतितं भूमौ, तेभ्योऽथ रत्नकुण्डलम् ॥२५॥

दूरं गतेषु पान्थेषु, साऽऽह दानप्रियं ततः ।
अरे ! पश्यसि पान्थानां, कुण्डलं पतितं भुवि ? ॥२६॥

स्वेनाऽऽदाय तदेतच्चेद्दत्से मे ऋणशुद्धये ।
छुटिष्यसि तदा बन्धादित्थं ते मृत्युरन्यथा ॥२७॥

प्राह दानप्रियो नाऽहं, गृह्णेऽन्यस्वमनर्पितम् ।
एतन्निश्चयलीनस्य, मृत्युर्मे चेत्तदस्तु सः ॥२८॥

श्रुत्वेति व्यन्तरी बन्धादुन्मोच्य तं बुभुक्षितम् ।
कानने भ्रमयामासाऽविश्रान्तं द्रुतवेगतः ॥२९॥

शक्त्याऽथ दर्शयामास, सा क्वाऽपि प्रकटं निधिम् ।
तमाह च निधेरस्माद्देहि लभ्यं धनं मम ॥३०॥

प्राह दानप्रियो नेदं, मद्द्रव्यं तद्ददामि न ।
अभोजनान्मरिष्यामि, वरमत्र त्वया धृतः ॥३१॥

श्रुत्वैतद्व्यन्तरीक्रूरा, मठमेकं चकार सा ।
तदन्तर्बहुधा भोज्यस्वर्णवस्त्राऽम्बु च न्यधात् ॥३२॥

ततो दानप्रियं मध्ये, रत्नैरुद्योतिते मठे ।
प्रक्षिप्य तत्कपाटानि, दत्त्वा स्वेनाऽभवद्बहिः ॥३३॥

दानप्रियस्तु तत्प्रेक्ष्य, क्षुधितस्तृषितोऽपि हि ।
नाऽऽदातुं स्वं मनश्चक्रे, परवस्तुपराङ्मुखः ॥३४॥

प्रत्युताऽऽह स आत्मानं, मनः सर्वेन्द्रियाणि च ।
मा मा कार्षुः स्पृहामत्रोपनतेष्वन्यवस्तुषु ॥३५॥

इतश्च गान्धर्वपुरे, लक्ष्मीरङ्गाऽऽख्यभूपतेः ।
पुत्रस्याऽभूद्दाहज्वरो ह्यनिवर्त्त्यः किलौषधैः ॥३६॥

ततश्च तत्पुरप्रान्तपद्मयक्षस्य भूपतिः ।
विदधेऽभ्यर्थनां पुत्रज्वरशान्त्यै चटूक्तिभिः ॥३७॥

सम्यग्दृष्टिः स यक्षोऽथ, दध्यौ चेतसि यन्मया ।
न चक्रे जिनधर्मस्य, भवे क्वाऽपि प्रभावना ॥३८॥

तेनाऽस्म्यल्पर्द्धिको जातो हीनो व्यन्तरजन्मनि ।
जिनधर्मं विना किं स्युर्जन्तोः स्वर्गाऽऽदिसम्पदः ? ॥३९॥

तदिदानीं तथा कुर्वे, राजपुत्रज्वरत्रुटिम् ।
यथा जिनेन्द्रधर्मोऽत्र, सदाऽप्योजायते स्थिरः ॥४०॥

अस्त्येव किंवदन्तीयं, पुरेऽत्र यत्क्वचिद्भुवि ।
निखाताऽस्त्यादिमजिनमूर्तिश्चन्द्राऽश्मनिर्मिता ॥४१॥

नाऽन्यैः सा दृश्यते नैवाऽऽकृष्यते किन्त्वियं श्रुतिः ।
यो हि स्यान्निःस्पृहस्तस्य, मूर्द्धस्था निःसरत्यसौ ॥४२॥

कः सम्भाव्यस्ततस्तादृग्निःस्पृहोऽत्रेति विचिन्तयन् ।
स यक्षोऽवधिनाऽज्ञासीत्तत्र दानप्रियं मठे ॥४३॥

तं महानिःस्पृहं ज्ञात्वा, स यक्षो मुमुदेऽधिकम् ।
एतन्मूर्ध्ना प्रभोर्मूर्त्तिः, प्रादुःकार्येत्यचिन्तयत् ॥४४॥

साक्षाद्भूत्वा ततो यक्षो नृपायैवं न्यवेदयत् ।
चन्द्राऽश्ममयाऽर्हन्मूर्त्तिर्निर्गताऽद्य भुवस्तलात् ॥४५॥

उद्यच्चन्द्रांशुभिः स्पृष्टा, सा द्रवत्यमृताऽम्बु यत् ।
सिञ्चेस्त्वं तेन पुत्राऽङ्गं, यथा स्यान्निर्ज्वरः स तु ॥४६॥

ततस्त्वं नृप ! गच्छाऽऽशु, स्थानेऽमुष्मिस्तु तत्र च ।
दूरात्कारय भूशुद्धिं, प्रादुःष्यात् प्रतिमा यथा ॥४७॥

इत्यादिष्टः स यक्षेण, राजाऽगात्तत्र सत्वरम् ।
भूमिशुद्धिं विधाप्यैषोऽस्थाज्जनोऽन्योऽपि चाऽगमत् ॥४८॥

ततो यक्षः प्रभोर्मूर्त्तेर्दानप्रियमठस्य च ।
अन्तरालमहीमध्ये, सुरङ्गां शक्तितो ददौ ॥४९॥

यक्षः स्वेनैत्य तत्राऽऽशु, मठे दानप्रियं क्षणात् ।
सुरङ्गया समानीय, प्रभुमूर्त्तेरधो न्यधात् ॥५०॥

यक्षो दानप्रियं प्रोचे, पुरुष ! प्रतिमामिमाम् ।
मूर्ध्नोत्पाट्य चलोर्ध्वं त्वं, कर्त्ता सान्निध्यमस्मि यत् ॥५१॥

इति दानप्रियस्तेन, प्रोक्तः स्वशिरसा क्षणात् ।
उत्पाट्य प्रतिमां प्रौढां, भुवं प्रस्फोट्य निर्ययौ ॥५२॥

तन्मस्तकस्थितां प्रादुर्भवन्तीं वीक्ष्य तां क्षणात् ।
जय जय जिनेन्द्र ! त्वमिति प्रोचुर्नृपाऽऽदयः ॥५३॥

जातेऽथ हर्षतुमुले, लोकानां निर्ययौ भुवः ।
दानप्रियः सकलोऽपि, भारे तावत्यपि स्थिरः ॥५४॥

दृष्ट्वा दानप्रियं लोकः, प्रोचे कथमयं भुवि ।
प्रविष्टः ? कथमेतां च शशाकोर्द्धर्त्तुमेककः ? ॥५५॥

न शक्या सेयमुद्धर्त्तुं, निःस्पृहेण विना खलु ।
यदनेनोद्धृता तत्स्यादेषोऽतिनिःस्पृहः पुमान् ॥५६॥

ततो यक्षः प्रभोर्मूर्त्तिमुद्धर्तुं स्वर्णनिर्मितम् ।
दानप्रियप्रतिबिम्बं, विन्यस्याऽधश्चकर्ष तम् ॥५७॥

ततो दानप्रियं लोकोऽवददाशिषमुच्चकैः ।
वर्द्धयत्यक्षतैः पूर्णैर्जिनोद्धाराऽऽत्तपुण्यकम् ॥५८॥

उद्ययौ च ततश्चन्द्रः, स्पृष्टस्तद्रश्मिभिः प्रभुः ।
चन्द्रकान्तमयत्वेनाऽक्षरन्निर्झरवत्पयः ॥५९॥

ततश्च पयसा तेन, सिक्तो राज्ञा निजः सुतः ।
बभूव च पटुः सोऽथाऽन्योऽप्याशु रोग्यभूदरुक् ॥६०॥

ततो यक्षः क्षणात्तत्र, रत्नप्रासादमादधौ ।
आराध्योऽयं सदा भूपमित्यादिश्य तिरोदधे ॥६१॥

पुष्यन्मनोरथो राजा, लोकश्च स्वामिनं प्रति ।
आसीन्निबिडभक्तित्वात्पूजाऽऽराधनतत्परः ॥६२॥

समानीतोऽमुना स्वामी, भुवो मध्यादगाधतः ।
निःस्पृहाणां च धुर्योऽयं, तत्कुर्वे मन्त्रिणं ह्यमुम् ॥६३॥

इत्यालोच्य नृपः सम्यक्, चक्रे दानप्रियं मुदा ।
सर्वमुद्राव्यापारेषु, निसृष्टं मुख्यमन्त्रिणम् ॥६४॥

स निःस्पृहव्यापरणान्नाऽशुभैः समबन्धयत् ।
किन्तु नीत्या प्रजारक्षन्, यशोधर्ममुपार्जयत् ॥६५॥

इत्थं प्रभुत्वमासाद्य, परद्रव्यविवर्जनात् ।
जिनदीक्षामवाप्याऽन्ते, स्वर्गं दानप्रियो ययौ ॥६६॥

तस्मात्परधनवर्जननियमनयन्त्रे निधाय चेतोद्रुम् ।
शुभभावटङ्कघटनात्कुरु सुखपात्रं त्वमात्मानम् ॥६७॥

**इत्यदत्तादाने दानप्रियकथा ॥**

# चतुर्थव्रते मदनमञ्जरीकथा ।

प्रभवन्ति रुजो नाऽङ्गे, विलीयन्ते ह्युपद्रवाः ।
जायन्ते सिद्धयः सर्वा यस्मात्तद्ब्रह्म सेव्यताम् ॥१॥

निर्वाति ज्वलनो नीरपूरो व्यावर्त्तते द्रुतम् ।
व्याघ्राऽहिराक्षसाः स्निह्यन्त्यस्य यो ब्रह्मचर्यकृत् ॥२॥

अल्पाऽऽहाराद्वपुःशोषस्ततोऽक्षाणाममत्तता ।
मनःस्थैर्यं ततस्तस्माद्ब्रह्मरक्षा ततः शिवम् ॥३॥

ततो नियमकष्टानि, दुष्कराणि व्रतानि च ।
फलन्ति सेवनाद्यस्य, सेवध्वं ब्रह्म तत् स्थिरम् ॥४॥

तच्छीलाऽपरपर्यायं, सर्वव्रतशिरोमणि ।
जायते भविनां सिद्ध्यै, राजपुत्रकलत्रवत् ॥५॥

अस्ति पूर्वनरम्याऽऽख्या, यद्वनेषु जनेष्विव ।
दत्त्वा फलश्रियं नाऽभूत्पश्चात्तापः कदाचन ॥६॥

राजाऽभूत्तत्र भूभीमो, यस्य खड्गदवानलः ।
आयान्न स्खलितः क्वाऽपि, भूभृत्कटककोटिभिः ॥७॥

तस्य राज्ञः कुमारोऽस्ति, सूरसेनाऽभिधः सुधीः ।
मदनमञ्जरी नाम, कुमारस्याऽस्ति वल्लभा ॥८॥

अन्यदा कोऽपि योगीन्द्र इन्द्रजालविदांवरः ।
अदृश्यकाऽरिप्रयोगे, कुमारेणाऽन्वयुज्यत ॥९॥

स दध्यौ मायिकः साधु पृष्टं स्वेनाऽमुना ह्यदः ।
कृत्वाऽऽडम्बरमेवाऽत्र, साधयामि समीहितम् ॥१०॥

ततः प्राह कुमारं स मयाऽऽकृष्टं पतद्दिवः ।
प्रतीष्य व्यात्तवक्त्रेण, ऋक्षं यो भक्षयेत्पुमान् ॥११॥

तदैव च मया दत्तमन्त्रेण दीक्षितो निशि ।
यदाऽभीष्टमदृश्यः स्यात्, स तदा नाऽत्र संशयः ॥१२॥

निशम्येति कृतश्रद्धः, कुमारोऽभ्यासमादधौ ।
व्योम्न्युच्छाल्य पुनः पाति, पूगाऽऽद्यादातुमुन्मुखः ॥१३॥

ततः कृष्णचतुर्दश्यां, पुराऽऽसन्ननदीतटे ।
आलिख्य मण्डलं योगी, कुमारं स्वयमन्वशात् ॥१४॥

मया मन्त्रैः पात्यमानं, नक्षत्रमुन्मुखो गिलेः ।
त्वं मा दा दृशमन्यत्र, पश्यंस्तिष्ठेर्नभः पुनः ॥१५॥

ओमित्युक्त्वा कुमारेऽथ, पश्यत्यम्बरमुन्मुखे ।
योगी दिव्यौषधीपिण्डीं, चिक्षेपोच्चैर्नभस्यथ ॥१६॥

क्रमेणौषधपिण्डी सा, पतन्ती नभसो द्रुतम् ।
स्पृष्टाऽनिलेन जज्वाल, दिव्यौषधप्रभावतः ॥१७॥

एतन्नक्षत्रमभ्येति, सावधानो गिल [किल ?] द्रुतम् ।
इत्युक्तो योगिना शीघ्रं, कुमारस्तत्तथाऽकरोत् ॥१८॥

गिलिता च कुमारेण, सा दिव्यौषधपिण्डिका ।
सोऽभूच्च तत्क्षणात् स्वर्णपुरुषो गतजीवितः ॥१९॥

तं तथा वीक्ष्य योगीन्द्रो दध्यौ सिद्धं समीहितम् ।
तन्निःखनाम्यधो ह्येनं, यथा पश्यति नाऽपरः ॥२०॥

विलम्ब्य च ग्रहीष्यामि, तमिति न्यखनद्भुवि ।
कृत्वाऽभिज्ञानमन्यत्र, गत्वा सुष्वाप योग्यथ ॥२१॥

इतश्च नगरे तस्मिन् दरिद्रः कोऽपि तिष्ठति ।
तस्य जातास्तु पुत्र्योऽष्टावन्धाः पङ्ग्वश्च सन्ति ताः ॥२२॥

पिङ्गाऽक्ष्यः पिङ्गकेश्यश्च, कपिलाऽङ्ग्यः खरस्वराः ।
चिपिटनासिकाः स्थूलकुक्षिपादकराश्च ताः ॥२३॥

दरिद्रोऽपि दरिद्रत्वान्निर्विण्णस्तास्वचिन्तयत् ।
एता रण्डा हि मां भोक्तुमुत्पन्ना मम वेश्मनि ॥२४॥

स्त्रीहत्या भाविनी चेन्मे, तदस्तु सा तथाऽप्यहम् ।
क्वाऽप्येता निखनिष्यामि, यद्ग्रासं दातुमक्षमः ॥२५॥

अन्धाः पङ्ग्वस्तथैता हि, बाला दुष्कर्मणा कृताः ।
दुष्कर्मभिः समाप्यन्ते, ततो दोषो ममाऽस्ति न ॥२६॥

इति ध्यात्वा दरिद्रोऽसौ, शकटे न्यस्य तास्तदा ।
योगिन्यस्तः स्वर्णपुमान्, यत्राऽऽस्ते तत्र सोऽप्यगात् ॥२७॥

सुवर्णपुरुषस्थानं, खनित्रैरखनत् स तु ।
ततश्चाऽऽविर्बभूवाऽऽशु, सुवर्णपुरुषोऽत्र सः ॥२८॥

तं समीक्ष्य दरिद्रोऽथ, भयविस्मयहर्षवान् ।
दध्यौ किमिदमाश्चर्यं, यदसौ दृश्यते मया ॥२९॥

वेद्मि पूर्वाऽर्जिताऽऽत्मीयपुण्यमानं हि यादृशम् ।
न मे भावि सुखं भोज्याऽऽच्छादनाऽऽद्यैर्हताऽऽत्मनः ॥३०॥

किन्त्वासामन्धपङ्गूनां, पुत्रीणां कर्मभिः शुभैः ।
प्राप्तोऽयं तन्नयाम्येताः, पुनर्गेहे सहाऽमुना ॥३१॥

इत्यालोच्य दरिद्रोऽसौ, तं स्वर्णपुरुषं भुवः ।
आकृष्य न्यस्य शकटे, निनायौकसि हर्षतः ॥३२॥

एकान्ते तं विमुच्याऽथ, स चिच्छेद तदङ्गुलीम् ।
तत्कालं निःसृता साऽन्या, ततो निःस्वो जहर्ष च ॥३३॥

तत स्वर्णाऽङ्गुलीखण्डैरक्रीणाद्वस्तुसञ्चयम् ।
ततो भोजनवस्त्राऽऽद्यैर्दरिद्रः सोऽभवत् सुखी ॥३४॥

सुवर्णपुरुषाऽङ्गाणि, छित्त्वा विक्रीय नित्यशः ।
बभूवाऽऽढ्यतमः पुर्यामपर्याप्तपरिच्छदः ॥३५॥

ततः स दध्यौ पुत्रीणां, पुण्यैरासाद्यते ह्यसौ ।
बध्नाम्येतास्ततोऽस्यैवाऽङ्गेषु शृङ्खलया दृढम् ॥३६॥

ध्यात्वेति करपादेषु, बद्ध्वा स प्राह पुत्रिकाः ।
यदा याति तदा ह्येष, धार्यो युष्माभिरादरात् ॥३७॥

तं प्रतीदं च वक्तव्यं, चिराद्दृष्टः क्व यासि तत् ? ।
न मोक्ष्यामः कदाऽपि त्वामस्मद्भक्ष्यं यदस्यहो ! ॥३८॥

इति तच्छिक्षिताः पुत्र्यो बद्धास्तत्रैव भुञ्जते ।
क्रीडन्ति शेरते सौख्यसौहित्योपचिताऽङ्गिकाः ॥३९॥

ततश्चाऽदृश्यमानोऽसौ, सूरसेननृपाऽङ्गजः ।
परिच्छदेन विज्ञप्तो भूमीमस्य महीपतेः ॥४०॥

इतस्ततश्च तेनाऽपि, वीक्षितो राजपूरुषैः ।
स नाऽदर्शि ततो द्रङ्गरवोऽवाद्यत भूभुजा ॥४१॥

केनाऽप्यकथ्यमानेऽस्मिन्, द्वितीयनिशि योग्यथ ।
गत्वा गृह्णामि तमिति, स्वर्णपूरुषभुव्यगात् ॥४२॥

यावत्पश्यति तत्स्थानं, तावद्ददर्श नाऽत्र तम् ।
हा ! हतोऽस्मीती चाऽऽक्रन्द्य स योगी द्राग् मुमूर्च्छ च ॥४३॥

मूर्च्छाऽन्तेऽथ स दध्यौ च, नीतः पौरेण केनचित् ।
स मे सुवर्णपुरुषस्तद्राज्ञा लप्स्यते ह्यसौ ॥४४॥

निजशक्त्या कुमारं तं, कृत्वाऽस्मै दर्शयाम्यहम् ।
यथा तद्दर्शनतुष्टः, सोऽर्पयेत् स्वर्णपूरुषम् ॥४५॥

मत्वेति योगिना स्पृष्टो वाद्यमानः स डिण्डिमः ।
गत्वा च भूभुजं योगी, प्रोवाचेति गिरा मृदु ॥४६॥

ददासि चेद्वचः स्वं त्वं, मम शपथपूर्वकम् ।
मत्कार्यं कुरुषे चेत्तत्, कुमारं दर्शयाम्यहम् ॥४७॥

राजाऽऽह निश्चयाद्वाक् ते, योगिन् ! कार्या मया खलु ।
प्राणप्रियं कुमारं मे, दर्शय क्वाऽपि सत्वरम् ॥४८॥

योगी प्राह मया राजन् !, साधितः स्वर्णपूरुषः ।
मम स्थानात् स केनाऽपि, गृहीतो जीवितव्यवत् ॥४९॥

संशोध्याऽर्पय तं मे त्वं, पुरेऽस्मिंस्तस्कराऽऽकुले ।
तेनेत्युक्ते नृपः शीघ्रं, शोधयामास तं पुरे ॥५०॥

परं न प्राप्तः पुरुषस्ततश्चाऽऽकृष्टिकृत्पुमान् ।
राज्ञाऽऽदिष्टः स्वर्णनरमाकर्ष्टुं मण्डलं व्यधात् ॥५१॥

यथाविधि स आटोपात्तन्मन्त्रानुच्चरन्मुहुः ।
होतव्यं वस्तु चिक्षेप, वह्निकुण्डे स्थिराऽऽत्मकः ॥५२॥

ततः स स्वर्णपुरुषो निःस्वगेहाच्चलत् किल ।
आक्रोशन्निःस्वपुत्रीभिः, पाणिपादे धृतो दृढम् ॥५३॥

मन्त्रेणाऽथ समं ताभिः, स आकृष्याऽऽशु मण्डले ।
सनिर्घातं पुरः क्षिप्तः, पश्यतो भूभृतस्ततः ॥५४॥

उच्चैः प्रलप्य ताः प्रोचुश्चिराद्दृष्टः क्व यासि तत् ।
न मोक्ष्यामो वयं त्वां हि, येन नो भक्ष्यमस्यहो ! ॥५५॥

राजा श्रुत्वेति तद्वाचमात्मन्यपायभीरुकः ।
तासां दृष्ट्वा च तां मूर्त्तिं, ता व्यन्तरीरमन्यत ॥५६॥

भूपतिस्तद्भयान्नंष्ट्वा, गतोऽन्यत्राऽऽकुलोऽवदत् ।
एताभिर्व्यन्तरीभिर्भो !, भाव्यं तन्नश्यत द्रुतम् ॥५७॥
तदा च सार्द्धं केनाऽपि, दरिद्रस्तत्पिता बहिः ।
आगतोऽभूत्पुरा तत्र, तत्सोऽश्रौषीद्यथातथम् ॥५८॥
स एष स्वर्णपुरुषस्ता एताश्च सुता मम ।
आकृष्टा मान्त्रिकेणेति, ध्यात्वा निःस्वोऽवदन्नृपम् ॥५९॥
राजन् ! यदि त्वमेतासां, दत्से शासनपूर्वकम् ।
ग्रामं कमपि मां तत्र, प्रमाणं च करोषि चेत् ॥६०॥
तदा निवर्त्तयाम्येता इत्युक्ते तेन भूपतिः ।
शासने दापयामास, ग्रामं कमपि तत्क्षणात् ॥६१॥
ततश्च स दरिद्रोऽपि, गृहीत्वा निशि ताः सुताः ।
राज्ञा दत्ते तत्र ग्रामे, गत्वा ग्रामपतिस्त्वभूत् ॥६२॥
पश्चाच्च भूपतिर्दृष्ट्वा, तं स्वर्णपुरुषं स्थिरम् ।
परित्यज्य सुतस्नेहं, तस्मिन् लोभी बभूव सः ॥६३॥
अदत्त्वा दर्शनं राजा, प्रतीहारान्न्यवेदयत् ।
योगिने यन्न स स्वर्णपुरुषः प्रापि कुत्रचित् ॥६४॥
ज्ञात्वा योगी च राजानं, लोभिनं स्वर्णपूरुषे ।
निर्माय कुमारं शक्त्या, तस्मादभाषयन्नृपम् ॥६५॥
योगिना निर्मितः सोऽथ, कुमारः प्राह भूपतिम् ।
तातेदं स्यात् क्वचिद्यद्भोः !, स्वर्णाऽर्थं त्यज्यते सुतः ॥६६॥
अपहृतोऽस्मि योगिन्या, मन्मांसैर्होमवाञ्छया ।
तत्सकाशादयं योगी, मामाच्छिद्य त्विहाऽऽनयत् ॥६७॥
आबाल्यादस्मि ते प्राणप्रियस्तत्तात ! मां कथम् ? ।
विलक्षयोगिना भूयो नीयमानमुपेक्षसे ? ॥६८॥
एतस्य स्वर्णपुरुषमेतस्यैव तदर्पय ।
यथा हि मामयं योगी, मुक्त्वा याति यथारुचि ॥६९॥

त्वं मा भूर्लोभभूस्तात !, यत्र स्यादीदृशः पिता ।
एनं च योगिनो मत्वा, सन्धाभ्रष्टोऽत्र मा च भूः ॥७०॥
दुर्लभः स्वर्णपुरुषः, सन्ति पुत्रास्तु भूरिशः ।
इति लोभेन तूष्णीको राजाऽश्रौषीन्न तद्गिरः ॥७१॥
भ्रष्टोपायस्ततो योगी, कुमारं कृत्रिमं हि तम् ।
अचालयत् स्वहस्तेन, गन्तुं सोऽरण्यपर्वते ॥७२॥
न कोऽपि च कुमारं तमन्वगाद्भूपतेर्भयात् ।
कुलीनत्वात्तु तत्कान्ताऽन्वगान्मदनमञ्जरी ॥७३॥
मार्गे परिश्रमात् खिन्ना, यान्ती पत्यनुगाऽथ सा ।
कियदद्याऽपि गन्तव्यमित्याह स्वपतिं किल ॥७४॥
कृत्रिमः स कुमारस्तु, नाऽस्यै प्रत्युत्तरं ददौ ।
पर्वतोपत्यकां प्राप्य, योगी तं सञ्जहार च ॥७५॥
मदनमञ्जरी चाऽथ, कुमारं तत्र नेक्षते ।
किन्तु तं योगिनं ह्येकं, वीक्ष्याऽरोदीन्मुहुर्मुहुः ॥७६॥
लुब्धो योगी च तां प्राह, कुमारेणाऽर्पिताऽसि मे ।
स ययौ च स्वयं क्वाऽपि, तत्त्वं मन्यस्व मां पतिम् ॥७७॥
मदनमञ्जरी साऽथ, कूटं विज्ञाय योगिनः ।
हा ! हताऽस्मि शरण्यं कं, श्रयाम्यत्रेत्यचिन्तयत् ॥७८॥
स्थानादस्मात्तु नाऽन्यत्र, यास्यत्येषेति तत्र ताम् ।
मुक्त्वा योगी फलाऽऽहाराऽदानेऽथाऽन्तर्गिरं ययौ ॥७९॥
मदनमञ्जरी साऽथ, भ्राम्यन्ती तत्र पर्वते ।
कायोत्सर्गस्थितं साधुं, मूर्त्तं धर्ममिवैक्षत ॥८०॥
दध्यौ ततश्च सा साधु, साध्वभूत्साधुसङ्गमः ।
एतत्प्रभावान्मे शीलं, सुरक्षं भविता खलु ॥८१॥
इति सा तं मुनिं गत्वा, नत्वा भावान्नताऽङ्गिका ।
सामायिकं स्वयं मौनाज्जग्राह मुनिसाक्षिकम् ॥८२॥

परमेष्ठिनमस्कारपरावर्त्तनतत्परा ।
तस्थौ साऽत्र पुरः साधोर्निश्चलाऽऽसनमानसा ॥८३॥

निजकर्मपरीणामं, ध्यात्वा भवस्थितिं च सा ।
अभूज्जिनोक्तसिद्धान्ततत्त्वस्मृतिसुधाप्लुता ॥८४॥

इतश्च पर्वतमध्यात्, फलान्यादाय योगिराट् ।
वीक्ष्यमाणः स तां तत्र, दृष्ट्वाऽवादीद्गिरा मृदु ॥८५॥

फलान्यमृतकल्पानि, सन्त्यानीतानि तन्वि ! तत् ।
गृहाणैतान्यशान त्वं, यथा भवति निर्वृतिः ॥८६॥

तेनेत्युक्ताऽपि न ब्रूते, नेक्षते सा दृशाऽपि तम् ।
अन्धेवानेडमूकेव, किन्तु साऽभूत्समाधितः ॥८७॥

ततः स कुपितो योगी, क्षोभायाऽस्याः क्षणाद्व्यधात् ।
अनुकूलप्रतिकूलोपसर्गान् रतसिद्धये ॥८८॥

प्रभवन्ति न ते तस्यै, किमपि कर्त्तुमप्रियम् ।
विलक्षः स ततो योगी, चिन्तामाधाय तस्थिवान् ॥८९॥

ततश्च व्यन्तरः कोऽपि, प्राह योगिनमुच्चकैः ।
सतीयं शक्यते नैव, शीलाद्भ्रंशयितुं शठ ! ॥९०॥

इति व्यन्तरवाचं तां, श्रुत्वा योगी भयाऽऽकुलः ।
मदनमञ्जरीं नत्वा, ययावन्यत्र कुत्रचित् ॥९१॥

मदनमञ्जरी सा तु, भवं प्रति विरक्तिभाक् ।
तेनैव व्यन्तरेणाऽऽशु, साध्वीपार्श्वमनीयत ॥९२॥

सा जग्राह ततो दीक्षां, यथोक्तां तां प्रपाल्य च ।
स्वब्रह्मरक्षणाज्ज्ञानं, केवलं प्राप निर्वृता ॥९३॥

इत्येतां स्त्रीमपि श्रुत्वा, ब्रह्मचर्येण निर्वृताम् ।
ऐहिकाऽऽमुष्मिकसुखाकाङ्क्षिभिः पाल्यमत्र तत् ॥९४॥

**इति चतुर्थव्रते मदनमञ्जरीकथा ॥**

# परिग्रहपरिमाणे धर्ममतिकथा ।

धनं धान्यं स्वर्णरूप्यकुप्यानि क्षेत्रवास्तुनी ।
द्विपाच्चतुष्पाच्चेतिः स्युर्नव बाह्याः परिग्रहाः ॥१॥

रागद्वेषौ कषायाः शुग्घासो रत्यरती भयम् ।
जुगुप्सा वेद-मिथ्यात्वे, आन्तराः स्युश्चतुर्दश ॥२॥

बाह्यात्परिग्रहात् प्रायः, प्रकुप्यन्त्यान्तरा अपि ।
प्रावृषो वृश्चिक-सर्पविषजोपद्रवा इव ॥३॥

प्राप्तप्रतिष्ठानपि च, वैराग्याऽऽदिमहाद्रुमान् ।
उन्मूलयति निर्मूलं, परिग्रहमहाबलः ॥४॥

परिग्रहनिषण्णोऽपि, योऽपवर्गं विमार्गति ।
स हि लोहोडुपेनेवाऽम्भोधिं तरितुमिच्छति ॥५॥

बाह्याः परिग्रहाः पुंसां, धर्मस्य ध्वंसहेतवः ।
तज्जन्मानोऽपि जायन्ते, समिधामिव वह्नयः ॥६॥

बाह्यानपि हि यः सङ्गान्न नियन्त्रयितुं क्षमः ।
जयेत् क्लीबः कथं सोऽन्तःपरिग्रहचमूममूम् ? ॥७॥

यदीच्छसि सुखं धर्मं, मुक्तिसाम्राज्यमेव वा ।
तदा परपरीहारादेकामाशां वशीकुरु ॥८॥

अधीती पण्डितः प्राज्ञः, पापभीरुस्तपोधनः ।
स एव येन हित्वाऽऽशां, नैराश्यमुररीकृतम् ॥९॥

ते धन्याः पुण्यभाजस्ते, तैस्तीर्णः क्लेशसागरः ।
जगत्सम्मोहजननी, यैराशाऽऽशीविषी जिता ॥१०॥

सुखं सन्तोषपीयूषजुषां स्ववशिनां हि यत् ।
तत्पराधीनवृत्तीनामसन्तोषवतां कुतः ? ॥११॥

कृते परिग्रहे माने, सर्वव्रतकृतिर्भवेत् ।
सुखाऽऽस्वादश्च तस्य स्यात्, सम्यग्धर्ममतेरिव ॥१२॥

अस्ति कुमुद्वती नाम, पुरी कुमुदसोदरा ।
यद्दधाति श्रियं राज्ञा, लालिता मृदुभिः करैः ॥१३॥

रणे नम्रशिरश्चापं, चक्रे तदनुभूभुजः ।
येन सोऽस्ति नृपस्तत्र, रणसूराऽभिधो जयी ॥१४॥

रणसूरस्य पुत्रोऽस्ति, नाम्ना धर्ममतिः सुधीः ।
अन्यदा सदसि क्ष्मापः, सपौरः समुपाविशत् ॥१५॥

पप्रच्छ भूपतिर्द्वास्थं, कोऽप्यस्ति ज्ञानवित्पुरे ? ।
सन्ति दर्शनिनस्तेनेत्युक्तेऽथाऽऽकारयत् स तान् ॥१६॥

समागत्योपविष्टांस्तान्, राजा पप्रच्छ साऽञ्जसम् ।
त्रिकालज्ञानविषये, ब्रूत प्रत्ययमत्र मे ॥१७॥

ज्ञातृत्वोत्सेकवान् कोऽपि, द्विजः प्राह पुरैव हि ।
राजन् ! श्रेष्ठिधनाढ्यस्य, सायं भार्या मरिष्यति ॥१८॥

एष मे प्रत्ययो ज्ञाने, ततो बौद्धं नृपोऽवदत् ।
यदेष ब्राह्मणः प्राह, तत्सत्यं भविता न वा ? ॥१९॥

बौद्धः प्राह नृपैतद्वाग्, मिथ्यैव यद्वणिक्प्रिया ।
वर्षाणां विंशतिं सम्यग्, जीविष्यति ह्यतः परम् ॥२०॥

मिथो विरुद्धां तद्वाचं, निशम्याऽऽह महीपतिः ।
जैनाचार्यान् कतरस्य, वाक् सत्या भाविनी प्रभो !? ॥२१॥

राजोपरोधात्तेऽप्याऽऽशु, प्रयुज्याऽवधिमात्मना ।
ज्ञात्वा यथातथं प्रोचुः, सूरयो नृपतिं प्रति ॥२२॥

द्वयोरप्येतयोरुक्तं, भावि सत्यं महीपते ! ।
इदमतिविरुद्धमित्यभूद्विस्मयभाग् नृपः ॥२३॥

तान् दैवज्ञान् विसृज्याऽथ, राजा धनाढ्यमूचिवान् ।
याहि वेश्मनि पुम्भिस्त्वं, विलोकय दिनाऽत्ययम् ॥२४॥

कुरु यत्नं कलत्रस्यावहितीभूय पश्य च ।
एतेषां मध्यतः कस्य, वाचं सत्यापयेद्विधिः ? ॥२५॥

इत्युक्तो भूभुजा श्रेष्ठी, धनाढ्योऽथ गृहं ययौ ।
सोऽचीकथद्यथावृत्तं, गेहिन्यै स्नेहसद्मने ॥२६॥

दिनाऽत्यये स्वमृत्युं सा, निशम्य धैर्यभाक्ततः ।
पुण्याय कीर्त्तये चाऽथ, ददौ दानं यदृच्छया ॥२७॥

धनाढ्यश्रेष्ठिना चाऽथ, लग्नं किल निरीक्षितुम् ।
आरोपिताः स्वसौधाऽग्रे, नरा दिनात्ययक्षणे ॥२८॥

निर्वास्य लोकमेकोऽस्थाद्गेहे शस्त्रकरः स तु ।
भार्यारक्षापरो नाऽदात्प्रवेशमपरस्य हि ॥२९॥

इतश्च ग्रामे कस्मिंश्चित्, कश्चन ग्रामदारकः ।
कृषीवलस्य कस्याऽप्यासीच्छालिक्षेत्ररक्षकः ॥३०॥

चक्रे तेन च क्षेत्राऽन्ते, ह्यासितुं शयितुं तथा ।
द्विभूमं तृणकाष्ठौकस्तत्राऽशेत च सोऽन्यदा ॥३१॥

ततोऽकस्मान्नद्यां पूरः, समागात्तेन च क्षणात् ।
तत्सुप्तदारकं तार्णगेहमाकृष्यत भ्रमत् ॥३२॥

नदीस्त्रोतसि पतितं, वेगाद्गच्छति तत्तरत् ।
पूरेण महता तेनाऽऽकृष्टा जीवाः परेऽपि च ॥३३॥

मज्जन्तस्ते तु मार्जारसर्पाऽऽद्या जीविताऽऽशया ।
तद्दृष्ट्वाऽऽगत्य वेगेनाऽऽरुरुहुस्तृणवेश्मनि ॥३४॥

विरोधिनोऽपि तेऽन्योन्यं, तदा मृत्युभयात्पुनः ।
तस्थुः सङ्कुच्य सङ्कुच्य, मुक्तस्वचापलाः पृथक् ॥३५॥

दृष्ट्वा चेतस्ततस्तान् सः, चपलो ग्रामदारकः ।
मार्जारसर्पयोः पुच्छे, अन्योऽन्यं द्रागबन्धयत् ॥३६॥

दृढबध्यमानपुच्छपीडितेन ततोऽहिना ।
परावृत्य फटाऽऽटोपाददंशि ग्रामदारकः ॥३७॥

भयाऽऽकुलेन तेनाऽथ, दध्रे सर्पस्य तुण्डिका ।
दृष्टस्तत्र मणिस्तेनोद्वृत्त्याऽथ जगृहे करे ॥३८॥

अस्याऽभिषेकनीरेण, पीतेन क्षीयते विषम् ।
स ध्यात्वेति गृहाऽन्तःस्थे, घटके नीरमक्षिपत् ॥३९॥

मणिनाऽलोड्य तत्पाथोऽपाद्ग्रामदारकस्ततः ।
बभूव निर्विषः क्षिप्रं, जितकाशी च सोऽभवत् ॥४०॥

धृत्वा धृत्वा स तत्रस्थान्, बहून् सर्पान् घटेऽक्षिपत् ।
बबन्ध च घटद्वारं, वस्त्रखण्डेन निर्भरम् ॥४१॥

आगच्छत्तृणगेहं तत्सरिदुत्तारके क्वचित् ।
कुमुद्वतीपुरीप्रान्ते, लग्नं सोऽथोत्ततार च ॥४२॥

सरिदुत्तारके तस्मिन्, काऽपि पानीयहारिणी ।
एत्य द्विघटकं भृत्वा, व्यावृत्ता कोटराऽध्वना ॥४३॥

चापल्यात्तेन च ग्रामदारकेण जलेन सः ।
बहिः प्रक्षाल्य विहितश्लथाऽऽर्द्रमुखबन्धनः ॥४४॥

स्वयं कोटरोपरिस्थेनाऽलक्षितोऽतिभारवान् ।
पानीयहारिणीमूर्ध्नं उत्सार्योर्द्ध्वघटं शनैः ॥४५॥

मुक्तः सोऽहिघटस्तस्याः, शिरसि सा त्वजानती ।
कष्टादवाप्य पन्थानमृजुं याति पुरीं प्रति ॥४६॥

स ग्रामदारकोऽप्याशु, याति तामनुदूरतः ।
दध्यौ च दङ्क्ष्यते सर्पैर्यस्तस्य जीवकोऽस्म्यहम् ॥४७॥

पानीयहारिणी यान्ती, सस्मार यन्मयाऽद्य हि ।
द्विघटकानि देयानि, धनाढ्यश्रेष्ठिनो गृहे ॥४८॥

ततस्तत्र क्षिपाम्यम्भो ध्यात्वेति तद्गृहं ययौ ।
दत्तद्वारे च तत्राऽस्थात्, कुर्वती शब्दमुच्चकैः ॥४९॥

इतश्च ये धनाढ्येन, नरा दिनाऽत्ययक्षणे ।
मुक्ता आसन् गतोऽर्कोऽस्तमिति ते तालिका ददुः ॥५०॥

नाऽतः परं हि मे मृत्युर्मृत्योः पूर्णोऽवधिर्यतः ।
इति सा श्रेष्ठिभार्याऽभूत्, स्वचित्ते गतमृत्युभीः ॥५१॥

पानीयहारिणी साऽथ, शब्दमुच्चैर्मुहुर्व्यधात् ।
कोपादिव श्रेष्ठिभार्योर्ध्वघटोत्तारणे ययौ ॥५२॥

द्वारमुद्घाट्य क्रोशन्ती, घटकण्ठे न्यधात् करम् ।
गलनकमिति बन्धवस्त्रं तदुदसारयत् ॥५३॥

अधः किञ्चिद्गते हस्ते, सर्पास्तदङ्गुलीः पृथक् ।
बुभुक्षाऽन्धा इवाऽत्यर्थं, ददंशुः परिवर्त्तनात् ॥५४॥

तयाऽऽकृष्टे बहिर्हस्ते, लग्नास्तेऽप्याययुर्बहिः ।
तान् दृष्ट्वा तद्विषाऽऽक्रान्तदेहा सा मूर्च्छिताऽपतत् ॥५५॥

श्रेष्ठी चाऽन्ये च तल्लोका दधावुर्भृशरोदिनः ।
सर्पाश्च तद्भयान्नेशुर्विविशुर्विवरेषु च ॥५६॥

पानीयहारिणी सा च, पुरीं मुक्त्वा ययौ भयात् ।
स ग्रामदारको बाल्याद्गत्वाऽशेत क्वचिन्मठे ॥५७॥

अथ सा श्रेष्ठिना शीघ्रं, मान्त्रिकाणां प्रदर्शिता ।
मन्त्रौषधप्रयोगांस्ते, चक्रुस्तस्या विषच्छिदे ॥५८॥

अधिकाऽधिकमेषा तु, व्याप्यते स्म विषोर्मिभिः ।
त्रियामसमये रात्रौ, निश्चेष्टाऽभूत्तु सा ततः ॥५९॥

गतास्ते मान्त्रिकाः श्रेष्ठी, गत्वा राज्ञे व्यजिज्ञपत् ।
नाथ ! मद्गेहिनी सर्पदष्टा मृता च तिष्ठति ॥६०॥

अहो ! प्रथमदैवज्ञवाक् सत्यैवाऽभवत्कथम् ? ।
बौद्धजैनवचो जज्ञे, मिथ्येत्यचिन्तयन्नृपः ॥६१॥

बौद्धजैनौ ततो राजा, द्वास्थेनाऽजूहवत्तदा ।
अकथयच्च तच्छ्रेष्ठिभार्याया मरणं तयोः ॥६२॥

बौद्धः प्राह मया राजन् !, यद्दृष्टं वायुचारतः ।
तदाऽऽख्यायि परं किञ्च, दैवान्मृतोऽपि जीवति ॥६३॥

ततश्च बहवो राज्ञा, विषनिवृत्तिहेतवः ।
चक्रिरे श्रेष्ठिभार्याया नोत्तस्थौ तु वणिक्प्रिया ॥६४॥

ततः संस्कारयितुं तां, शिबिकास्थां सुविस्तरात् ।
पृष्ठधावत्कृताऽऽक्रन्दस्वजनैः पुरमध्यतः ॥६५॥

नीयमानां श्मशानेऽथ, स ग्रामदारकस्ततः ।
दृष्ट्वाऽस्या मत्कृतो मृत्युस्तत्सोऽनुतापवानभूत् ॥६६॥ [युग्मम्]

अस्तु द्राग् जीवयिष्यामि, किलैनां मणिपाथसा ।
इति विचिन्त्य स मठान्निर्ययौ विहितत्वरः ॥६७॥

श्रीखण्डागुरुचितायां, क्षिप्तां तां श्रेष्ठिगेहिनीम् ।
यावत्प्रज्वालयिष्यन्ति, तावदागादसौ शिशुः ॥६८॥

मा मा कुरुत पापं भो !, जीवत्स्त्रीदाहकर्मणा ।
जीवयन्तमिमां मां तु, वीक्षध्वं कृपयैव हि ॥६९॥

इति तद्वाचमाकर्ण्य, स्थितास्तत्स्वजनाः क्षणम् ।
सोऽप्येत्य मणिनाऽऽलोड्य, पानीयं तन्मुखेऽक्षिपत् ॥७०॥

असिञ्चत्तद्वपुस्तेन, पाथसा साऽथ तत्क्षणात् ।
विषमूर्च्छासमुच्छेदादुत्तस्थौ शयितेव च ॥७१॥

ततश्च मङ्गलतूर्यध्वानपूरितदिङ्मुखाः ।
ननृतुः स्वजना नार्यो, गायन्ति मङ्गलानि च ॥७२॥

व्याघुट्य राजमार्गेण, तां निन्युरुत्सवाद्गृहम् ।
सच्चकार ततः श्रेष्ठी, द्रव्यैस्तं ग्रामदारकम् ॥७३॥

श्रुत्वाऽथ भूपतिः श्रेष्ठिभार्याजीवितसङ्कथाम् ।
दध्यावहो ! त्रयोऽप्येते, सत्या ज्योतिर्विदोऽभवन् ॥७४॥

ततस्तुष्टो नृपो बौद्धब्राह्मणाभ्यां धनाद्यदात् ।
जैनाचार्येभ्योऽपि तथा, दददूचे स तैर्मृदु ॥७५॥

राजन्नकिञ्चनत्वेन, त्वस्माभिर्व्रतकारिभिः ।
तत्यजे धनभार्याभूवेश्माऽऽदिकं समप्यहो ! ॥७६॥

तदलं नः किलाऽमीभिः, परिग्रहनिबन्धनैः ।
प्रासुकाऽऽप्तभिक्षावस्त्रपात्रोपकरणा वयम् ॥७७॥

राजाऽऽह मेऽनुग्रहाऽर्थं, किमप्यादिशत प्रभो ! ।
ततश्च सूरयः प्रोचुर्नृप ! स्वार्थं समुद्धर ॥७८॥

अयं नस्ते किलाऽऽदेशो राजाऽऽह कीदृशोऽत्र सः ? ।
अथोचुः सूरयो राजन् !, शृणु स्वाऽर्थं यथातथम् ॥७९॥

सम्प्राप्य मानुषं जन्माऽऽर्ये देशेऽर्हद्गिरा ततः ।
दयापुरस्सरो धर्मः, कार्यः सम्यक्त्वभूषितः ॥८०॥

राजन्नेष किल स्वार्थो दुष्प्राप्यस्य नृजन्मनः ।
तद्यतस्वैहिकं मुक्त्वा, सुखे ह्यामुष्मिके भृशम् ॥८१॥

श्रुत्वेति राजा सुलभबोधिबीजः सुभावतः ।
जैनाचार्यान् गुरून् कृत्वा, सम्यक्त्वं जगृहे तदा ॥८२॥

अन्योऽपि राजलोकोऽथ, पौरलोकश्च भावतः ।
जैनाचार्योपदेशेन, जिनधर्मपरोऽभवत् ॥८३॥

राज्ञः प्राणप्रियः पुत्रो, नाम्ना धर्ममतिः स तु ।
परिग्रहपरीमाणं, मितमादाद्गुरोः पुरः ॥८४॥

सूरीन् विसृज्य राजाऽथ, बभूव धर्मतत्परः ।
धर्मान्मतिः कुमारोऽपि, किञ्चित्परिग्रहोऽभवत् ॥८५॥

आयुःपूर्त्तौ नृपो धर्मप्रभावात् प्रययौ दिवम् ।
ततोऽमात्यैर्नृपपदेऽभाणि धर्ममतिः स तु ॥८६॥

आत्ते राज्ये परिग्रहो भूयान् स्यादिति निःस्पृहः ।
कुमारो नाऽग्रहीद्राज्यं, परिग्रहनियन्त्रितः ॥८७॥

त्यक्तराज्योऽपि स जने, मान्योऽभूदिन्द्रवत्सदा ।
बुद्धिमांश्च प्रतापी च, धर्मे श्लाघां जगाम च ॥८८॥

त्रुटत्परिग्रहः सोऽथ, कुमारो गृहमेधिनाम् ।
प्रपाल्य व्रतमादाय, पूर्णायुर्दिव्यभूद्धरिः ॥८९॥

इति धर्ममतिः स्वल्पपरिग्रहव्रतो यथा ।
प्राप शक्रत्वमित्थं स्यादन्योऽपि निष्परिग्रहः ॥९०॥

**इति परिग्रहपरिमाणे धर्ममतिकथा ॥**

## दिग्विरतिव्रतादीनुद्दिश्य प्रभोर्देशना ।

**प्रथम गुणव्रतम् ।**

योऽङ्गीकृतोऽवधिर्दिक्षु, दशस्वपि न लङ्घ्यते ।
दिग्विरतिरिति प्रोक्तं, प्राच्यमेतद्गुणव्रतम् ॥१॥

तप्ताऽयोगोलतुल्यानां, गृहिणां सद्व्रतं ह्यदः ।
यच्चराचरजन्तूनां, मर्दनं क्रियते नहि ॥२॥

गन्तुं सर्वासु यो दिक्षु, विदध्यादवधिं सुधीः ।
स्वर्गाऽऽदौ निरवधयो जायन्ते तस्य सम्पदः ॥३॥

तदेतद्यावज्जीवं वा, सदव्रतं गृहमेधिनाम् ।
चातुर्मासाऽऽदिनियमादथवा स्वल्पकालिकम् ॥४॥

**द्वयं गुणव्रतम् ।**

क्रियते यत्र नैयत्यं, शक्त्या भोगोपभोगयोः ।
गुणव्रतं द्वितीयं तु, भोगोपभोगनामकम् ॥१॥

यः सकृद्भुज्यते सोऽन्नस्रगाऽऽदिर्भोग उच्यते ।
भोग्यो मुहुर्मुहुः स्त्र्यादिरुपभोगः स सम्मतः ॥२॥

मदिरामांसम्रक्षणमधूदुम्बरपञ्चकम् ।
अनन्तकायाऽन्यज्ञातफलानि भोजनं निशि ॥३॥

आमगोरससम्पृक्तद्विदलं पुष्पितौदनम् ।
दधि दिनद्वयाऽतीतं, कुथिताऽन्नं च वर्जयेत् ॥४॥

**तृतीयं गुणव्रतम् ।**

आर्त्तरौद्रध्यानाऽऽधिक्यं, पापव्यापारयोजनम् ।
हिंसोपकरणदानं, प्रमादाऽऽचरणं तथा ॥१॥

देहाऽद्यर्थदण्डभिन्नोऽनर्थदण्डो हि योपकृत् ।
सर्वथैव च तत्त्यागस्तृतीयं तद्गुणव्रतम् ॥२॥

**सामायिकव्रतम् ।**

आर्त्तरौद्रध्यानत्यागात्, सावद्यकर्मवर्जनात् ।
समता मुहूर्त्तं या तु, तत्सामायिकमुच्यते ॥१॥

सामायिकव्रताऽरम्भाद्गृहस्थोऽपि यतिर्भवेत् ।
सामायिकं मनःशुद्ध्या, तन्नित्यं परिशीलयेत् ॥२॥

यथाऽऽत्मा समतां प्राप्य, पञ्चेन्द्रियरिपूञ्जयन् ।
स्थिरीकुर्वन् मनः पश्येदात्मानमात्मना क्रमात् ॥३॥

सामायिकमुहूर्त्तेनोपासकेन कृतेन भोः ! ।
अत्रुट्यत् कालो मोक्षोऽपि, प्राप्यते किं पुनर्दिवः ? ॥४॥

**देशावकाशिकव्रतम् ।**

दिग्व्रते यद्भवेन्मानं, सङ्क्षेपस्तस्य यः सदा ।
दिने रात्रौ च तद्देशाऽवकाशिकव्रतं मतम् ॥१॥

आत्तेऽपि दिग्व्रतो भूयोऽप्येतस्याऽऽचरणं हि यत् ।
तन्नित्यमभयदानं, दत्तं स्यात्प्राणिनां नृभिः ॥२॥

**पौषधव्रतम् ।**

चतुर्थाऽऽदितपोऽष्टम्यां, चतुर्दश्यां सपर्वणि ।
ब्रह्मचर्यं स्नानपापकर्मत्यागो हि पौषधम् ॥१॥

पोषं धर्मस्य यो धत्ते, स पौषधश्चतुर्विधः ।
देशतः सर्वतश्चैव, कृतः पुण्याय जायते ॥२॥

गृहीते पौषधेऽवश्यं, क्षीयते कर्मसञ्चयः ।
गरुत्मति सदाऽऽसन्ने, क्वाऽपि नश्यन्ति पन्नगाः ॥३॥

पुण्यास्ते ये हि गृह्णन्ति, भावतः पौषधव्रतम् ।
यत्तस्मात्क्षीयते कर्म, ततः शाश्वतिकं सुखम् ॥४॥

**अतिथिसंविभागव्रतम् ।**

चतुर्विधाऽऽहारपात्रवस्त्रौकोदानमत्र यत् ।
अतिथिभ्यस्तदतिथिसंविभागव्रतं मतम् ॥१॥

अन्नाऽऽदीनामिदं दानमुक्तं धर्मोपकारिणाम् ।
धर्मोपकारबाह्यानां, स्वर्णादीनां न तन्मतम् ॥२॥

काले ह्युपासकः सर्वशुद्धं दानं ददत्किल ।
अविच्छिन्नान् भवे प्राप्य, भोगान् स लभते शिवम् ॥३॥

चत्वार्येतानि नित्यं तु, कार्याण्युपासकेन यत् ।
तच्छिक्षाव्रतसंज्ञानि, ह्यादिष्टान्यत्र यत्यताम् ॥४॥

**सप्ततत्त्वादेरुपदेशः ।**

ज्ञेयानि सप्ततत्त्वानि, श्रमणोपासकैः सदा ।
यथा तदनुसारेण, धर्मे सूक्ष्मक्रिया भवेत् ॥१॥

जीवाऽजीवाश्रवश्चाऽपि, संवरो निर्जराऽपि च ।
बन्धो मोक्षश्चेति सप्त, वित्त तत्त्वानि भो ! जनाः ! ॥२॥

तत्र जीवा द्विधा ज्ञेया, मुक्ताः संसारिणस्तथा ।
अनादिनिधनाः सर्वे, ज्ञानदर्शनलक्षणाः ॥३॥

मुक्ता एकस्वभावाः स्युर्जन्माऽऽदिक्लेशवर्जिताः ।
अनन्तदर्शनज्ञानवीर्याऽऽनन्दमयाश्च ते ॥४॥

संसारिणो द्विधा जीवाः, स्थावरत्रसभेदतः ।
द्वितयेऽपि द्विधा पर्याप्ताऽपर्याप्तविशेषतः ॥५॥

पर्याप्तयश्च षडिमाः, पर्याप्तत्वनिबन्धनम् ।
आहारो वपुरक्षाणि, प्राणो भाषा मनोऽपि च ॥६॥

स्युरेकाऽक्षविकलाऽक्षपञ्चाऽक्षाणां शरीरिणाम् ।
चतस्रः पञ्च षड् वाऽपि, पर्याप्तयो यथाक्रमम् ॥७॥

एकाऽक्षाः स्थावरा भूम्यप्तेजोवायुमहीरुहः ।
तेषां तु पूर्वे चत्वारः, स्युः सूक्ष्मा बादरा अपि ॥८॥

प्रत्येकाः साधारणाश्च, द्विप्रकारा महीरुहः ।
तत्र पूर्वे बादराः स्युरुत्तरे सूक्ष्मबादराः ॥९॥

त्रसा द्वित्रिचतुःपञ्चेन्द्रियत्वेन चतुर्विधाः ।
तत्र पञ्चेन्द्रिया द्वेधा, सञ्ज्ञिनोऽसञ्ज्ञिनोऽपि च ॥१०॥

शिक्षोपदेशाऽऽलापान् ये, जानते तेऽत्र सञ्ज्ञिनः ।
सम्प्रवृत्तमनःप्राणास्तेभ्योऽन्ये स्युरसञ्ज्ञिनः ॥११॥

स्पर्शनं रसनं घ्राणं, चक्षुः श्रोत्रमितीन्द्रियम् ।
तस्य स्पर्शो रसो गन्धो रूपं शब्दश्च गोचरः ॥१२॥

द्वीन्द्रियाः क्र[कृ]मयः शङ्खा गण्डूपदा जलौकसः ।
कपर्दाः शुक्तिकाऽऽद्याश्च, विविधाऽऽकृतयो मताः ॥१३॥

यूकामत्कुणमत्कोटलिक्षाऽऽद्यास्त्रीन्द्रिया मताः ।
पतङ्गमक्षिकाभृङ्गा दंशाऽऽद्याश्चतुरिन्द्रियाः ॥१४॥

तिर्यग्योनिभवाः शेषा जलस्थलखचारिणः ।
नारका मानवा देवा सर्वे पञ्चेन्द्रिया मताः ॥१५॥

मनोभाषाकायबलत्रयमिन्द्रियपञ्चकम् ।
आयुरुच्छ्वासनिःश्वासाविति प्राणा दश स्मृताः ॥१६॥

सर्वजीवेषु देहायुरुच्छ्वासा इन्द्रियाणि च ।
विकलाऽसञ्ज्ञिनां भाषा, पूर्णानां सञ्ज्ञिनां मनः ॥१७॥

उपपादभवा देवा नारका गर्भजाः पुनः ।
जरायुःपोताऽण्डभवाः, शेषाः सम्मूर्च्छनोद्भवाः ॥१८॥

सम्मूर्च्छिनो नारकाश्च, जीवाः पापा नपुंसकाः ।
देवाः स्त्रीपुंसवेदाः स्युर्वेदत्रयजुषः परे ॥१९॥

सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा ।
सूक्ष्मनिगोदा एवाऽन्त्यास्तेऽन्येऽपि व्यवहारिणः ॥२०॥

सचित्तः संवृत्तः शीतस्तदन्यो मिश्रितोऽपि च ।
विभेदैरान्तरैर्भिन्नो नवधा योनिरङ्गिनाम् ॥२१॥

प्रत्येकं सप्तलक्षाणि, पृथ्वीवार्यग्निवायुषु ।
प्रत्येकाऽनन्तकायेषु, क्रमाद्दश चतुर्दश ॥२२॥

षट् पुनर्विकलाऽक्षेषु, मनुष्येषु चतुर्दश ।
स्युश्चतस्रश्चतस्रश्च, श्वभ्रतिर्यक्सुरेषु च ॥२३॥

एवं लक्षाणि योनीनामशीतिश्चतुरुत्तरा ।
प्रोक्तानि ज्ञानदृश्यानि, सर्वेषामेव जन्मिनाम् ॥२४॥

एकाऽक्षा बादराः सूक्ष्माः, पञ्चाऽक्षाः सञ्ज्यसञ्ज्ञिन ।
स्युर्द्वित्रिचतुरक्षाश्च, पर्याप्ता इतरेऽपि च ॥२५॥

एतानि जीवस्थानानि, मयोक्तानि चतुर्दश ।
सम्यग् विज्ञाय पुण्याय,तद्रक्षां कुरुत स्फुटम् ॥२६॥ [जीवतत्त्वम्]

अजीवाः स्युर्धर्माऽधर्मविहायःकालपुद्गलाः ।
जीवेन सह पञ्चाऽपि, द्रव्याण्येते निवेदिताः ॥२७॥

तत्र कालं विना सर्वे, प्रदेशप्रचयाऽऽत्मकाः ।
विना जीवमचिद्रूपा, अकर्त्तारश्च ते मताः ॥२८॥

कालं विनाऽस्तिकायाः स्युरमूर्त्ताः पुद्गलं विना ।
उत्पादविगमध्रौव्याऽऽत्मानः सर्वेऽपि ते पुनः ॥२९॥

पुद्गलाः स्युः स्पर्शरसगन्धवर्णस्वरूपिणः ।
तेऽणुस्कन्धतया द्वेधा, तत्राऽबद्धाः किलाऽणवः ॥३०॥

बद्धाः स्कन्धा बद्धशब्दसौक्ष्म्यस्थौल्याऽऽकृतिस्पृशः ।
अन्धकाराऽऽतपोद्योतभेदच्छायाऽऽत्मका अपि ॥३१॥

कर्मकायमनोभाषाविष्टितोच्छ्वासदायिनः ।
सुखदुःखजीवितव्यमृत्यूपग्रहकारिणः ॥३२॥

प्रत्येकमेकद्रव्याणि, धर्माधर्मौ नभोऽपि च ।
अमूर्त्तानि निष्क्रियाणि, स्थिराण्यपि स सर्वदा ॥३३॥

एकजीवपरीणामसङ्ख्याऽतीतप्रदेशकौ ।
लोकाऽऽकाशमभिव्याप्य, धर्माऽऽधर्मौ व्यवस्थितौ ॥३४॥

स्वयं गन्तुं प्रवृत्तेषु, जीवाऽजीवेषु सर्वतः ।
सहकारी भवेद्धर्मः, पानीयमिव यादसाम् ॥३५॥

जीवानां पुद्गलानां च, प्रपन्नानां स्वयं स्थितिम् ।
अधर्मः सहकार्येषु, यथा छायाऽध्वयायिनाम् ॥३६॥

सर्वगं स्वप्रतिष्ठं स्यादाकाशमवकाशदम् ।
लोकाऽलोकौ स्थितं व्याप्य, तदनन्तप्रदेशभाक् ॥३७॥

लोकाऽऽकाशप्रदेशस्था भिन्नाः कालांऽशकास्तु ये ।
भावानां परिवर्त्ताय, मुख्यः कालः स उच्यते ॥३८॥

ज्योतिःशास्त्रे यस्य मानमुच्यते समयाऽऽदिकम् ।
स व्यावहारिकः कालः, कालवेदिभिरामतः ॥३९॥

नवजीर्णाऽऽदिरूपेण, यदमी भुवनोदरे ।
पदार्थाः परिवर्तन्ते, तत्कालस्यैव चेष्टितम् ॥४०॥

वर्तमाना अतीतत्वं, भाविनो वर्तमानताम् ।
पदार्थाः प्रतिपद्यन्ते, कालक्रीडाविडम्बिताः ॥४१॥ [अजीवतत्त्वम्]

मनोवचनकायानां, यत्स्यात् कर्म स आस्रवः ।
शुभः शुभस्य हेतुः स्यादशुभस्त्वशुभस्य सः ॥४२॥ [आस्रवः]

सर्वेषामास्रवाणां यो रोधहेतुः स संवरः ।
कर्मणां भवहेतूनां, जरणादिह निर्जरा ॥४३॥ [संवरनिर्जरे]

सकषायतया जीवः, कर्मयोग्यांस्तु पुद्गलान् ।
यदादत्ते स बन्धः स्याज्जीवाः स्वातन्त्र्यकारणम् [जीवाऽस्वातन्त्र्यकारणम्] ॥४४॥

प्रकृति-स्थित्यनुभाव-प्रदेशा विधयोऽस्य तु ।
प्रकृतिस्तु स्वभावः स्याज्ज्ञानाऽऽवृत्यादिरष्टधा ॥४५॥

निकर्षोत्कर्षतः कालनियमः कर्मणां स्थितिः ।
अनुभावो विपाकः स्यात्, प्रदेशोंऽशप्रकल्पनम् ॥४६॥

मिथ्यादृष्टिरविरतिप्रमादौ च क्रुधादयः ।
योगेन सह पञ्चैते, विज्ञेया बन्धहेतवः ॥४७॥ [बन्धतत्त्वम्]

अभावे बन्धहेतूनां, घातिकर्मक्षयोद्भवे ।
केवले सति मोक्षः स्याच्छेषाणां कर्मणां क्षये ॥४८॥

सुराऽसुरनरेन्द्राणां, यत्सुखं भुवनत्रये ।
स स्यादनन्तभागोऽपि, न मोक्षसुखसम्पदः ॥४९॥

स्वस्वभावजमत्यक्षं, यदस्मिन् शाश्वतं सुखम् ।
चतुर्वर्गाऽग्रणीत्वेन, तेन मोक्षः प्रकीर्त्तितः ॥५०॥ [मोक्षतत्त्वम्]

इति चन्द्रप्रभासाऽऽख्ये, स्थितः क्षेत्रे जिनेश्वरः ।
चन्द्रप्रभप्रभुर्धर्म्मं, चख्यौ द्वादशपर्षदम् ॥५१॥

ततोऽन्यत्राऽपरान् जीवान्, प्रबोधयितुमात्मना ।
स्वामी चचाल तत्स्थानाद्वृतो नरसुराऽसुरैः ॥५२॥

## प्रभोनिर्वाणकल्याणकम् ।

सर्वाऽतिशयसम्पूर्ण:, सर्वदेवपरिष्कृत: ।
विजहार जिनोऽन्यत्र, भुवि व्योम्नीव चन्द्रमा: ॥१॥

साऽर्द्धा द्विलक्षी साधूनां, साध्वी लक्षत्रयी पुन: ।
सहस्राऽशीतिसहिता, द्वे सहस्रे तु पूर्विणाम् ॥२॥

शताऽशीति: साऽवधीनां, मन:पर्ययिणां च सा ।
तथा दशसहस्राणि, केवलज्ञानधारिणाम् ॥३॥

जातवैक्रियलब्धीनां, सहस्राणि चतुर्दश ।
वादलब्धिमतां सप्तसहस्री षट्शतानि च ॥४॥

सार्द्धे लक्षे श्रावकाणां, श्राविका लक्षपञ्चकम् ।
सहस्रैर्नवतिर्न्यूनं,परिवारोऽभवत् प्रभो: ॥५॥

पूर्वलक्षं त्रिमासोनं, चतुर्विंश्यङ्गवर्जितम् ।
विहृत्य केवलात् स्वामी, ययौ सम्मेतपर्वतम् ॥६॥

ज्ञात्वा स्वं मोक्षकालं च, सहस्रमुनिसंयुत: ।
प्रपेदेऽनशनं स्वामी, मासं चाऽस्थात्तथास्थिति: ॥७॥

अवधिज्ञानतो ज्ञात्वाऽऽसनकम्पेन तत्क्षणात् ।
इन्द्रा जिनेन्द्रमभ्येयुश्चतु:षष्टिरपि द्रुतम् ॥८॥

तत्र प्रदक्षिणीकृत्य, जगन्नाथं प्रणम्य च ।
विषण्णाश्च निषण्णाश्च, तस्थुरालिखिता इव ॥९॥

नभस्यकृष्णसप्तम्यां, श्रवणस्थे निशाकरे ।
चन्द्रप्रभः प्रभुस्तस्थौ, ध्याननिष्कम्पमानसः ॥१०॥

तथा निषण्णः पर्यङ्काऽऽसने स्थित्वा च बादरे ।
काययोगे बादरौ वाक्चित्तयोगौ रुरोध च ॥११॥

सूक्ष्मेण काययोगेन काययोगं च बादरम् ।
रुद्ध्वा रुरोध सूक्ष्मौ च, योगौ वाक्चित्तलक्षणौ ॥१२॥

इति सूक्ष्मक्रियं नाम, शुक्लध्यानं तृतीयकम् ।
अमू सूक्ष्मतनूयोगं, क्रमात् प्रभुरसाधयत् ॥१३॥

ततश्च ध्यानमुच्छिन्नक्रियं नाम तुरीयकम् ।
पञ्चह्रस्वाऽक्षरोच्चारमितकालमशिश्रियत् ॥१४॥

सर्वदुःखपरित्यक्तः, केवलज्ञानदर्शनी ।
क्षीणकर्मा निष्ठिताऽर्थोऽनन्तवीर्यसुखर्द्धिकः ॥१५॥

बन्धाऽभावादूद्ध्र्वगतिरेरण्डफलबीजवत् ।
प्रभुः स्वभावादृजुना, पथा लोकाऽग्रमासदत् ॥१६॥

प्रपन्नाऽनशनास्तेऽपि, साधवो योगरोधिनः ।
सर्वेऽप्यासादयामासुः, स्वामिवत् परमं पदम् ॥१७॥

स्वामिनिर्वाणकल्याणान्निर्वाणो दुःखपावकः ।
अदृष्टसुखलेशानां, नारकाणामपि क्षणम् ॥१८॥

शक्रश्चकार रुदितं, महापूत्कारपूर्वकम् ।
अनुसङ्क्रन्दनं चक्रे, क्रन्दनं त्रिदशैरपि ॥१९॥

ततः सङ्क्रन्दनादेशान्नन्दनोद्यानतः क्षणात् ।
गोशीर्षचन्दनैधांसि, समानिन्युर्दिवौकसः ॥२०॥

इन्द्राऽऽदेशादथैन्द्रा ते, स्वामिदेहस्य हेतवे ।
वृत्तामारचयामासुश्चितां गोशीर्षचन्दनैः ॥२१॥

अन्येषामनगाराणां, कृते च त्रिदिवौकसः ।
चतुरस्त्रां चितां चक्रुरपरस्यां पुनर्दिशि ॥२२॥

इन्द्रः क्षीरोदपयसा, स्नपयित्वा प्रभोर्वपुः ।
विलिप्य चन्दनरसैर्दिव्यवस्त्रैरवासयत् ॥२३॥

अन्ये तु देवा अन्येषां, मुनीनां विदधुस्तथा ।
इन्द्रो रत्नशिबिकायां, चिक्षेप भगवद्वपुः ॥२४॥

अन्यस्यां तु शिबिकायामन्येषां व्रतिनां वपुः ।
उद्धधार हरिः स्वेन, स्वामिनः शिबिकां सशुक् ॥२५॥

मुनीनामपरेषां तु, शिबिकामपरे सुराः ।
देवा देव्यश्च चक्रुर्द्राक्, सङ्गीतनृत्तरासकान् ॥२६॥

अथ प्राचीनचितायां, वासवः स्वामिनस्तनुम् ।
स्थापयामास साधूनामन्येषामपरत्र तु ॥२७॥

अथेन्द्राऽऽदेशादग्निं च, न्यधुरग्निकुमारकाः ।
वायवो ज्वालयामासुः, कर्पूरं चिक्षिपुः सुराः ॥२८॥

मुक्त्वाऽस्थि धातवो यावद्दग्धास्तावच्चिताऽनलम् ।
व्यधापयन् सुराः क्षीराम्भोधीर्मेघकुमारकाः ॥२९॥

प्रतिमावत्पूजयितुं, स्वविमाने पुरन्दरः ।
अग्रहीदुपरितनीं, दंष्ट्रां वामेतरां प्रभोः ॥३०॥

ईशानोऽपि वामदंष्ट्रां, चमरोऽधस्तनीं पुनः ।
सव्यां तथा बलिर्वामामन्ये दन्तान् सकीकसान् ॥३१॥

ततो नन्दीश्वरद्वीपे, शाश्वतप्रतिमोत्सवम् ।
कुर्वाणास्ते तु गीर्वाणाः, सेन्द्राः स्वं स्वं पदं ययुः ॥३२॥

कौमारे पूर्वलक्षे द्वे, सार्द्धे राज्यस्थितौ पुनः ।
पूर्वलक्षाः षट् च सार्द्धाश्चतुर्विंशयङ्गसंयुताः ॥३३॥

चतुर्विंशत्यङ्गहीनं, पूर्वलक्षं पुनर्व्रते ।
इत्यायुः पूर्वलक्षाणि, दश चन्द्रप्रभप्रभोः ॥३४॥

सुपार्श्वस्वामिनिर्वाणाच्छ्रीचन्द्रप्रभनिर्वृतिः ।
शतेष्वर्णवकोटीनां, व्यतीतेषु नवस्वभूत् ॥३५॥

**इति श्रीदेवेन्द्राऽऽचार्यविरचिते श्रीचन्द्रप्रभस्वामिचरिते**
**भवत्रयवर्णनो नाम द्वितीयः परिच्छेदः ॥**

# ग्रन्थकर्त्तुः प्रशस्तिः ।

नागेन्द्रगच्छे विख्याताः, परमाराऽन्वयोत्तमाः ।
श्रीवर्द्धमाननामानः, सूरयोऽस्ताऽरयोऽभवन् ॥१॥

गुणग्रामाऽभिरामोऽथ, रामसूरिर्बभूव सः ।
यदाऽऽस्यकमलक्रोडे, चिक्रीडुर्वचनश्रियः ॥२॥

सिद्धान्ताऽऽदित्यमाश्रित्य, कलापूर्णः सुवृत्तभाक् ।
चन्द्रवत्प्रीतिदः सोऽभूच्चन्द्रसूरिस्ततः परम् ॥३॥

विद्यावल्लीमहावृक्षः, संयमप्रतिमारथः ।
संसाराऽब्धिसदायानं, देवसूरिर्गुरुस्ततः ॥४॥

सिद्धविद्यारसस्पर्शात्, सुवर्णत्वमुपागतम् ।
शिवायाऽभयसूरीणां, वचस्तारमुपास्महे ॥५॥

निर्वास्याऽन्यगिरश्चित्तान्यवष्टभ्य स्थिता नृणाम् ।
यद्वाक् सोऽभूज्जगत्ख्यातः, श्रीमद्धनेश्वरः प्रभुः ॥६॥

यद्वाग्गङ्गात्रिभिर्मार्गैस्तर्कसाहित्यलक्षणैः ।
पुनाति जीयाद्विजयसिंहसूरिः स भूतले ॥७॥

श्रीधनेशपदे सूरिर्देवेन्द्राऽऽख्यः स्वभक्तितः ।
पुण्याय चरितं चक्रे, श्रीमच्चन्द्रप्रभप्रभोः ॥८॥

व्योमस्थालतलस्थितिः प्रतिदिशं विक्षिप्य तारौदनं,
पीत्वा चन्द्रमहः पयो दधदवष्टम्भं च धात्र्यां करैः ।
बालाऽर्कः पतदिन्दुकन्दुकममावास्यासु धृत्वा
क्षिपेद्यावत्तावदिदं चरित्रमवनौ चान्द्रप्रभं नन्दतात् ॥९॥

चतुःषट्‌द्व्येकसङ्ख्ये च, "१२६४" जाते विक्रमवत्सरे ।
सोमेश्वरपुरेऽत्रैतद्द्विमास्यां चरितं कृतम् ॥१०॥ २१६१ ॥ सर्वसङ्ख्या ५३२५ ॥

*॥ श्रीचन्द्रप्रभस्वामिचरितं समाप्तम् ॥*

# પૂ. ગણિવર્યશ્રી દ્વારા સર્જિત - સંપાદિત સાહિત્ય

**લિખિત :**


સિદ્ધાંતોના ધનુર્ધારી ........ અપ્રાપ્ય
નહિ જોઈએ, ૨૬૦૦ની રાષ્ટ્રીય ઉજવણી ........ અપ્રાપ્ય
૬ માસથી અધિક ઉપવાસ જૈન શાસનને માન્ય ખરાં ? ........ અપ્રાપ્ય
૨૬૦૦નું ઝેરીલું આક્રમણ ........ અપ્રાપ્ય
મારી બાર પ્રતિજ્ઞાઓ (ત્રણ આવૃત્તિ)
(શ્રાવકના ૧૨ વ્રતની ટૂંકી અને સરળ સમજ) ........ રૂ. ૧૦/-
હાંકી કાઢો, ગિરનાર રોપ-વેને ........ અપ્રાપ્ય
સીમંધર સ્વામીની ભાવયાત્રા (ત્રણ આવૃત્તિ) ........ રૂ. ૧૦/-
ભાવાચાર્ય વંદના (બે આવૃત્તિ) ........ રૂ. ૫/-
જપો નામ, સૂરિરામ ........ રૂ. ૬૦/-
શ્રદ્ધાંજલિ ........ સાદર...
સમેતશિખરની ભાવયાત્રા ........ અપ્રાપ્ય
નૂતન અરિહંત વંદનાવલી ........ રૂ. ૫/-
પૂર્વ પુરુષોની અંતિમ આરાધના ........ સાદર...
કેટલાંક પૂર્વજન્મો ભાગ-૧-૨-૩-૪-૫-૬ ........ સાદર...
અષ્ટાપદતીર્થની ભાવયાત્રા-સચિત્ર (બે આવૃત્તિ) ........ રૂ. ૫૦/-


**પ્રાચીન ગ્રંથ + નૂતન ટીકા :**

**आत्मनिंदाद्वात्रिंशिका** + **तत्वरूचि टीका** + અન્વય + શબ્દાર્થ + ભાવાર્થ

**रत्नाकरपञ्चविंशतिका** + **मङ्गलमाला टीका** + અન્વય + શબ્દાર્થ + ભાવાર્થ

**सम्यक्त्वरहस्यप्रकरणम्** + **बोधिपताका टीका** + સટીકગૂર્જરાનુવાદ

**सुमतिसम्भवमहाकाव्यम्** + **मोक्षमञ्जरी टीका** + સટીકગૂર્જરાનુવાદ

**અનુવાદિત :**

તપા-ખરતર ભેદ

**સંપાદિત :**


સ્તુતિનંદિની
ગાયું, માનતુંગ સૂરિએ... ........ અપ્રાપ્ય
**धन्यचरित्रम्** (ગદ્ય) પ્રત
**कादम्बरी** - ૧ અને ૨ (સંસ્કૃત વોલ્યુમ)
શોભન સ્તુતિ (અન્વય-અનુવાદ સાથે) ........ અપ્રાપ્ય
**शोभनस्तुति-वृत्तिमाला** ખંડ-૧ અને ૨ (૫ ટીકા + ૧ અવચૂરિ સહિત)
**प्रबोधचिन्तामणिः** ........ અપ્રાપ્ય
**पार्श्वनाथचरित्रम् ( पू. हेमविजयगणिकृत )**
**चन्द्रप्रभचरित्रम्** - ૧ અને ૨
કુમારપાળ રાજાના રાસનું રહસ્ય


પ્રાપ્ય પુસ્તકો / ગ્રંથો પૂ. સાધુ-સાધ્વીજી ભગવંતોને તેમજ જ્ઞાનભંડારને ભેટ આપવામાં આવે છે. જેમને ખપ હોય તેમણે એક P.C. કુસુમ-અમૃત ટ્રસ્ટ, વાપીના સરનામે લખી પુસ્તક મંગાવી લેવા.

# પ્રાચીન ગ્રંથ + નૂતન ટીકા + સટીક અનુવાદવાળા ગ્રંથો












# સંપાદિત સાહિત્ય


प्रबोधचिन्तामणिः


पार्श्वनाथचरित्रम्


શોભન
સ્તુતિ


कादम्बरी
१


कादम्बरी
२


स्तुति
नंदिनी
- मुनि हितवर्धनविजय


शोभनस्तुति
वृत्तिमाला
प्रथमः खण्डः


शोभनस्तुति
वृत्तिमाला
द्वितीयः खण्डः


તપા-ખરતર ભેદ


કુમારપાળ રાજાના
રાસનું રહસ્ય







Tejas Printers
AHMEDABAD M. 98253 47620